एकोनचत्वारिंशोऽध्यायः ।

अथातो ज्वरप्रतिषेधं व्याख्यास्यामः ॥१॥

येनामृतमपां मध्यादुद्धृतं पूर्व्वजन्मनि ।
यतोऽमरत्वं सम्प्राप्तास्त्रिदशास्त्रिदिवेश्वरात् ॥
शिष्यास्तं देवमासीनं पप्रच्छुः सुश्रुतादयः ।
व्रणस्योपद्रवाः प्रोक्ता व्रणिनामप्यतः परम् ।
समासाद्व्यासतश्चैव ब्रूहि नो भिषजां वर ॥
उपद्रवेण जुष्टस्तु व्रणः कृच्छ्रेण सिध्यति ।
उपद्रवास्तु व्रणिनः कृच्छ्रसाध्याः प्रकीर्त्तिताः ।
प्रक्षीणबलमांसस्य दोषधातुपरिक्षयात् ॥
तस्मादुपद्रवान् कृत्स्नान् ब्रूहि नः सचिकित्सितान् ।
सर्व्वकायचिकित्सासु ये दृष्टाः परमर्षिभिः ॥२॥

अवसितन्तावत् कौमारतन्त्रं नाम, इदानीन्तु शल्यस्थानं मूलं कृत्वा तन्त्रमिदं कात्स्न्येन शुश्रूषणामस्माकमौत्सुक्यमपाकर्त्तुं द्विव्रणीये नाममात्रेणोपदिष्टेषु मध्ये परिशिष्टान् व्रणिनामुपद्रवान् कायचिकित्सापरिपठितत्वेन तद्व्याख्यानावसरे प्रपञ्चेनोपदिशतु भगवान्, इत्येवमनुनीतः प्राधान्याज्ज्वरप्रतिषेधमधिकरोति अथात इत्यादिना। प्रतिषेधशब्दोऽयं सान्निध्यात् ज्वरप्रतिषेध एव प्रवर्त्तत इति गम्यते तथाच ज्वरसहितः प्रतिषेधः ज्वरप्रतिषेधः इति तत् पुरुषो मयूरव्यंसकादित्वात् द्वन्द्वो वा ॥ १ ॥

ज्वरो हि रुद्रकोपाग्निसम्भूत इत्यतःपरं निवेदयिष्यते स्वयमेव, तस्य च प्रतिषेधकर्त्ते मनुध्यानमवश्यं बहुविघ्नं भवतीति ज्ञात्वा गुरोर्यथार्थां स्तुतिरपि भवत्येकान्तेन विघ्नविनाशायेति मन्वानो भगवतो धन्वन्तरे-

तेषां तद्वचनं श्रुत्वा प्राब्रवीद्भिषजां वरः।
ज्वरमादौ प्रवक्ष्यामि स रोगानीकराट् स्मृतः॥
रुद्रकोपाग्निसम्भूतः सर्व्वभूतप्रतापनः॥३॥

विष्णोरंशांशसम्भूतत्वं व्याजेनालोचयन्नभ्युपगमार्थसमन्वयाय प्रश्नोत्तरप्रकारं सूचयाम्बभूव येनेति। पूर्व्वजन्मन्यतीतसम्भूतौ क्षीराब्धेर्जन्मनीति यावत्। तत्र स्मृतिः "अथोदधेर्मथ्यमानात् काश्यपैरमृतार्थिभिः। उदतिष्ठन् महाराज पुरुषः परमाद्भुतः। * * * अमृतापूर्णकलसं बिभ्रद् वलयभूषितः। स वै भगवतः साक्षाद् विष्णोरंशांशसम्भवः। धन्वन्तरिः * * * *" इति भागवतं ८ स्कं ८ अ०। अमरत्वं सम्प्राप्ता अमृतादानेनेति शेषम्। नैव सुश्रुतस्यैव प्रष्टृत्वे सत्यपि सुश्रुतादय इत्यनुपपन्नम् "अस्माकमेकमतीनां मतमभिसमीक्ष्य सुश्रुतो भगवन्तं प्रक्ष्यति" इति प्रागुक्तेः पारतन्त्र्येणेतरेषामपि तथात्वात्। प्रोक्ता विपरीताविपरीतव्रणविज्ञानीये इति शेषः। ननु व्यर्थोऽयमनुयोगः प्रतिपित्सितानामर्थानां "उ० १अ" निर्द्दिष्टक्रमागतत्वेनाधुनैव व्याचिख्यासितत्वात्। न तावद् व्यर्थः शिष्याणामर्थमिमं व्याससमासाभ्यामाशुच श्रोतुं समुत्सुकत्वात्। तान् पुनरुपद्रवान् विशिनष्टि सर्व्वेति। पदमिदं शिष्टाष्वित्यवश्यं विशेषणीयं तास्वेवोपद्रवाणामुपदेशात्। "यदग्रे सन्दिग्धं तच्छेषान्निर्णीयते" इति हि न्यायः। तदयमर्थः शिष्टासु सर्व्वकायचिकित्सासु व्याचिख्यासितासु सतीष्वित्यर्थः॥ २॥

तेषामिति। कुतस्तु खलु ज्वरो रोगानीकराड़ुच्यते? आह— रुद्रेति। किन्तु खलु भगवन् "तृतीयात्तस्य नेत्राद्धि निःसृताग्निशिखोज्ज्वलः। भस्मसात् कृतवांस्तेन मदनं तावदेव हि" इति श्रवणाद् रुद्रेत्यादिपदेन मदनशरीरजो भस्मराशिरभिप्रेयते नेति विशिनष्टि सर्व्वेति। न खलु मदनशरीरजो भस्मराशिः सर्व्वाणि भूतानि प्रतापयति किन्तर्हि कामिजनानेवेत्याकूतम्। स्यादेतत् किन्तावत् प्राप्तम्? दक्षाध्वरध्वंसे कुपितस्य रुद्रस्य ललाटस्वेदजादग्नेः सम्भूतो रुद्रकोपाग्निसम्भूत इति। तथाच स्मृतिः "ततस्तस्य सुरेशस्य क्रोधादमिततेजसः। ललाटात् प्रसृतो घोरः स्वेदबिन्दुर्बभूव ह। तस्मिन् पतितमात्रे तु स्वेदबिन्दौ तदा भुवि। प्रादुर्बभूव सुमहानग्निः कालाः

तैस्तैर्नामभिरित्येषां सत्त्वानां परिकीर्त्यते ॥४॥
ऋते देवमनुष्येभ्यो नान्यो विषहते तु तम्।
कर्म्मणा लभते यस्मात् देवत्वं मानुषादपि ॥
पुनस्तेव च्युतः स्वर्गान्मानुष्यमनुवर्त्तते।
तस्मात् ते देवभागेन सहन्ते मानुषा ज्वरम् ॥
शेषाः सर्व्वे विपद्यन्ते तैर्य्यग्योना ज्वरार्हिताः ॥

नलोपमः। तत्र चाजायत तदा पुरुषः पुरुषर्षभ। * * * * ज्वरो नामैष धर्म्मज्ञ लोकेषु प्रचरिष्यति।" इति महाभारतं शान्ति० २८२ अं॥ ३ ॥

अथ किमिदमुच्यते यदि हि ज्वरः सर्व्वभूतप्रतापनः कथन्तर्हि नरामरैतरेषां केषाञ्चिदपि सत्त्वानां ज्वराभिधानो रोगः क्वचिदपि श्रोत्रं न विषयीकरोतीत्येव-माशंसूनपाकरोति तैरिति। परिरयं विभागार्थः। इत्येषज्वर एषां नागादीनां नरान्तानां सर्व्वेषां सत्त्वानां परि सामर्थ्यमभिसमीक्ष्य सोढुं शक्यत्वेन भागशः प्रकल्प्य तैस्तैः शीर्षाभितापादिभिर्ज्वरान्तैर्नामभिः कीर्त्यते तथाच स्मृतिः "ज्वरो नामैष धर्म्मज्ञ लोकेषु प्रचरिष्यति। एकीभूतस्य नत्वस्य धारणे तेजसः प्रभो। समर्था सकला पृथ्वी बहुधा सृज्यतामयम्।" इत्युपक्रम्य "शीर्षाभितापो नागानां * * * * मानुषेषु तु धर्म्मज्ञ ज्वरोनामैष भारत।" इति महाभां शान्तिं २८२ अं। ४ ॥

प्रकृतत्वात् तं ज्वरं पुनः शक्तितो निवेदयति ऋत इति। कथमित्याह कर्म्मणेति। कर्म्मणा अग्निष्टोमादिनेत्यर्थः। च्युतः क्षीणे पुण्ये इत्याकूतम्। स्मर्य्यते च "त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते। ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान् दिवि देव-भोगान्॥ ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्त्यलोकं विशन्ति। एवं त्रयीधर्म्ममनुप्रपन्ना गतागतं कामकामालभन्ते॥" इति भगवद्गीतासु ९अं २०।२१ श्लोकौ। अत्र मर्त्त्यलोकं मानुष्यलोकमिति गम्यते एवमित्यनन्तरोक्तः। एवञ्च "चण्डाल पुक्कशानान्तु ब्रह्महा योनि मृच्छति" इति स्मृतावपि तथाविध कर्म्मवत्त्वेन पापयोनीनामपि चण्डालादीनां पुण्ये कर्म्मणि योग्यतया-ज्वरसहिष्णुत्वमयोग्यतया च तैर्य्यग्योनानामसहिष्णुत्वम् इत्युपपन्नं भवति ऋत

जन्मादौ निधने चैव प्रायो विशति देहिनः ।
अतः सर्व्वविकाराणामयं राजा प्रकीर्त्तितः ॥ ॥५॥
स्वेदावरोधः सन्तापः सर्व्वाङ्गग्रहणं तथा ।
विकारा युगपद् यस्मिन् ज्वरः स परिकीर्त्तितः ॥६॥

इति । किमु खलु एतावानेव ज्वरस्य रोगानीकराट्त्वे हेतु नैत्याह जन्मादाविति । अत्र हि भगवदात्रेयान्तेवासिनः समामनन्ति "सज्वरा एव जायन्ते सज्वरा एव म्रियन्ते" इति चरकं नि १अ । तदिह प्रायः शब्दं पृथुदर्शिनो दर्शयन् प्रायुङ्क्तेति निश्चीयते यदाकस्मिके खड्गाद्यभिघातनिमित्तके मृत्यावपि युगपदुत्पलशतपत्रभेदवदणुना कालेन चोत्पन्नोज्वर एव प्राणानुत्क्रामयतीति बुद्धिमेषां नारोहति । न च तावत् कार्य्यकारणयो र्यौगपद्यमसाम्प्रतमिति वाच्यम् "यदा सन्तमसान्धकारे विद्युत्सम्पातमात्राद्व्याघ्रमभिमुखमतिसन्निहितं पश्यति तदा खल्वालोचनसंकल्पाभिमानाध्यवसाया युगपदेव प्रादुर्भवन्ति" इति तत्त्वकौमुद्याम् तत्रभवद्वाचस्पतिमिश्रोक्तेः । अथ चेदात्रेयवचनमिवानाकस्मिकमृत्युविषयमित्येवं ब्रवीषि तर्ह्यभ्युपगतहानं नाम दोष आपद्येत, अध्यायान्ते वक्ष्यति हि "अन्तसम्भवादन्तकोऽशेष भूतानां ज्वरः" इति तत्र हि नियतान्तकालवृत्तित्वेनान्तकेति संज्ञा ज्वरस्येति राद्धान्तः । उपसंहरति अतः इति । ५ ॥

सामान्यलक्षणतो ज्वरं निवेदयति स्वेदेति । तत्र कफावृते वायौ स्वेदो निरुध्यते, पित्तसमन्विते च तस्मिन् सन्तप्यते शरीरं, विगुणे पुनः व्याने कृत्स्नं शरीरं परिपीड्यते वेदनाविशेषेणेतिकृत्वा न तावत् स्वेदावरोधादीनां त्रयाणां युगपद् यत्र समवायः स ज्वरो नामेति व्याहर्त्तुं साम्प्रतं भवति, तथात्वे हि स्वेदागमात् लक्षणमिदं नाभिनिविशति पैत्तिकं ज्वरमेकान्तेन आहोस्वित् स्वेदावरोध सर्व्वाङ्गग्रहणयो रन्यतरव्याप्यावर्त्तको भवति । ज्वरस्य संसिद्धलिङ्गेन सन्तापेन सहानयो रेकस्यैवान्वयेन सन्तापकत्वेनोपदिष्टस्य पित्तावृतस्य समानस्य तथाविधस्यान्यस्य चावरोधात् तदेवं ब्रूमः, स्वेदावरोध इति सामान्येनोक्ते सत्यपि बुद्धिमता सम्प्रासव्याख्यायां स्वेदावरोध इति निरूपणीयं संप्राप्तिं प्रकृत्य वक्ष्यति च "रसस्वेदप्रवाहिणी

दोषैः पृथक् समस्तैश्च द्वन्द्वैरागन्तुरेव च।
अनेककारणोत्पन्नः स्मृतस्त्वष्टविधो ज्वरः॥
दोषाः प्रकुपिताः स्वेषु कालेषु स्वैः प्रकोपनैः।
व्याप्य देहमशेषेण ज्वरमापादयन्ति हि॥
दुष्टाः स्वहेतुभिर्दोषाः प्राप्यामाशयमूष्मणा।
सहिता रसमागत्य रसस्वेदप्रवाहिणाम्॥
स्रोतसां मार्गमावृत्य मन्दीकृत्य हुताशनम्।
निरस्य वहिरूष्माणं पक्तिस्थानाच्च केवलम्॥
शरीरं समभिव्याप्य स्वकालेषु ज्वरागमम्।
जनयन्त्यथ वृद्धिञ्च स्ववर्णांश्च त्वगादिषु॥ ७॥

स्रोतसां मार्गमावृत्य" इति। एवञ्च यत्र रोगे सम्प्राप्त्यवस्थायां स्वेदावरोधोऽनन्तरञ्च युगपत् सन्तापसर्व्वाङ्गग्रहणे दृश्येते स ज्वर इति निष्कर्षः। अथ चेत् युगपच्छब्दं त्रिभिरेवान्वेतु मभोप्ससि तर्हि सम्प्राप्तितो विसर्गं यावत् कालस्यैकत्वमभ्युपगच्छ तथाच सर्व्वमिदं निरवद्यं भवति। अत्र स्वेदावरोध इति शोणितगतं वातं निरुणद्धि, स हि सन्ताप-सर्व्वाङ्गग्रहणे जनयति न पुनः सम्प्राप्त्यवस्थायां स्वेदावरोधम्। वदन्ति हि "रुजस्तीव्राः ससन्तापा * * असृग्गतेऽनिले" इति। सर्व्वाङ्गग्रहणञ्च कुष्ठं व्यावर्त्तयति, कुष्ठपूर्व्वरूपे हि स्वेदो निरुध्यते, स च सम्प्राप्तिफलत्वेनाननुभवात् सम्प्राप्तिविषयामातिरिच्यते इत्यध्यवस्याम: शास्त्रमिदमवगाह्य। रूपे च "ओषचोषपरिदाहधूमायनानि" इति धूमायनशब्देन सन्तापो व्याहृतः नातः किमप्यव्यावर्त्त्यं भवतीत्यध्यवसेयम्। सर्व्वाङ्गग्रहणमनिर्व्वचनीयः सर्व्वाङ्गवेदनाविशेषः, स च सर्व्वं ज्वरमभिनिविशति नियमेन॥ ६॥

तं ज्वरं पुनरष्टधा भिनत्ति दोषैरिति। इदमत्रावधेयं वेदोत्पन्नावागन्तूनां शारीर-मानसत्वेन द्वित्वाभ्युपगमेऽपि धर्म्मद्वारेणैकत्व मभ्युपगम्याष्टविध इत्युपदिष्टम्। अनेककारणोत्पन्नः मिथ्यातियुक्तैरित्यादिना वक्ष्यमाणैरनेकविधकारणैः सम्भूतः। ज्वरसमूहस्य मध्ये क्रमागतत्वात् प्रथमं तावत्

मिथ्यातियुक्तैरपि च स्नेहाद्यैः कर्म्मभिर्नृणाम्।
विविधादभिघाताच्च रोगोत्थानात् प्रपाकतः॥
श्रमात् क्षयादजीर्णाच्च विषात् सात्म्यर्त्तुपर्य्ययात्।
ओषधीपुष्पगन्धाच्च शोकान्नक्षत्रपीड़नात्॥

दोषजानां सम्प्राप्तिमुपदिदिक्षति दोषा इति। स्वेषु कालेषु "सू० ६ अः" उक्तेषु वर्षादिषु। समासेनोक्तमर्थं स्फुटीकृत्यावगमयति दुष्टा इति। इदमत्रावधेयं यकृद्गतनाद्रक्ताग्निसर्गतो विविक्तं पित्तं पित्तकोष-मधितिष्ठत् तत्कोषसंसक्तेन ग्रहणीसंश्रितेन हंसपक्षनालाकारेण स्रोतसा ग्रहणीस्थामधिष्ठायोपरिष्टादामाशयेऽवस्थितं चतुर्व्विधमन्नपानं पचत्यामाशय सङ्कोचविकाशाभ्यामधःस्थोऽग्निः स्थाल्यामोदनायाम्बुतण्डुलमिव द्रवीभाव-मापादयितुम्। द्रवीभूतञ्च तदामाशयपार्श्वावलम्बिना च्छिद्रेणाधोगच्छत् ग्रहणीगतेन पित्तेन सह मिश्रीभूय विवेचयति रसमलम्। आमदोषदुष्टे चास्मिन्नन्नपाने पाचकं नाम तत् पित्तमामान्वयान्मन्दीभवत्येकान्तेनेत्य-वोचाम। ज्वरे तूत्पत्स्यत्यग्नेर्मान्द्यत्वात् दोषच्छन्नत्वाच्च स्थूलतरत्वेन स जातस्तदन्नपानरस ऊर्द्धाधः पित्तवहस्रोतो रसस्वेदवहा धमनीश्च निरुनद्धि। दोषाः पुनस्तदनिर्ह्रितपित्तेन रक्तेन सह सङ्गम्य सर्व्वं शरीरमनुसरन्तीति युक्तमुक्तं दुष्टा इति। अत्रोष्मा ग्रहणीस्थं पित्तं नत्वन्यत्। वदन्ति हि "उष्मा पित्तादृते नास्ति" इति। रस मागत्य धमनीगतमन्नपानरस माश्रित्य। रसो हि "दोष धातुमलानुसारी" इति शोणितवर्णनीये निरदिक्षत्। तदिह रसगतै-र्दोषैः रसस्वेदेत्यादिनोक्तः स्वेदवाहिस्रोतोवरोधो नानुपपन्नः। हुताशनं पाचक-समाख्यं पित्तं। मन्दीकृत्यामान्वयादित्याकूतम्। पक्तिस्थानादिति वहिर्योगे पञ्चमी। पक्तिस्थानाद् ग्रहणीतो वहिस्त्वगादिष्विति यावत्। निरस्य निःक्षिप्य। केवलं कृत्स्नं। समभिव्याप्य सर्व्वशरीरानुसारि तत् पित्त-समन्वितरक्ताश्रितत्वेनेत्युन्नेयम्। स्ववर्णं यथास्ववर्णं। अतिरोहितार्थमन्यत्॥७॥

अनेककारणोत्पन्न इत्यपरिस्फुटमर्थं स्फोरयन्नर्थान्तरं सूचयति मिथ्येति। मिथ्याशब्दोऽयं "मिथ्याहाराचारस्य" इति कुष्ठनिदानवत् व्याख्येयः। किन्तावत् प्राप्तम्, योगत्वेनाध्यस्तो भावो मिथ्यायोग इति। एवञ्च एतावतैवाति-योगस्याप्युपलब्धौ पृथगुपादानं प्रायेणाव्यभिचरितत्वमाख्यातुम्। अपि चेति

अभिचाराभिशापाभ्यां मनोभूताभिशङ्कया।
स्त्रीणामपप्रजातानां प्रजातानां तथाहितैः।
स्तन्यावतरणे चैव ज्वरो दोषैः प्रवर्त्तते॥
तैर्वेगवद्भिर्बहुधा समुद्भ्रान्तैर्विमार्गगैः।
विक्षिप्यमाणोऽन्तरग्निर्भवत्याशु बहिश्चरः॥
रुणद्धि चाप्यपां धातुं यस्मात् तस्माज्ज्वरातुरः।
भवत्यत्युष्णगात्रश्च न च स्विद्यति सर्व्वशः॥८॥

निपातसमुदायोऽनुक्तं मिथ्याहाराचारं समुच्चिनोति इति नेयम्, आम्नायते हि "मिथ्याहारविहारस्य * * * ज्वरदाः स्युः" इति। विविधादभिघातान्नख-दशनपतनाशनिदहनादिभिरभिहननात्, रोगोत्थानाद्रक्तपित्तादिरोगात्मकात् कारणात् तेषां तेषां रोगाणामुत्पत्तेर्व्वा। प्रपाकतो व्रणशोफादीनां, क्षया-दत्यन्तरमणादिना धातुक्षयात्, नक्षत्रपीड़नान्नक्षत्रविशेषे ग्रहविशेषावस्थानादिति तात्पर्य्यम्; वदन्ति हि "लग्नचन्द्राष्टमस्थाने रिपुस्थाने च यो ग्रहः। तद्दशायां भवेन्मृत्यु रथवा संशयो भवेत्" इति। अभिचारः मारणोच्चाटनादि-रूपस्तन्त्राथर्व्ववेदप्रसिद्धः कर्म्मविशेषः। अभिशापो द्विजगुरुप्रभृतिभिरनिष्टा-शंसनम्। मनः शब्देनेह विकारित्वात् कामादिनापहृतं चित्तम्। मनो-विकारित्वेनोपदिष्टाः कामादयो वाऽभिप्रेयन्ते, परमतः "कामजे चित्तविभ्रंशः" इत्याद्युक्तेः। भूतशब्देन च अभिषङ्गो देवादिर्देवाद्यभिषङ्गो वेति नेयम्। ताभ्यां तर्व्वा सहिता अभिशङ्का अतितरां भयं मनोभूताभिशङ्का, अत्र मनोग्रहणेनैव भयस्याप्युपलम्भेऽपि पृथगुपादानं प्रपञ्चार्थम्। स्त्रीणामिति। अप अयथा-कालमसुखं वा प्रजातं प्रजननं गर्भमोचनमस्यामासामित्यर्श आद्यचि अपप्रजाता, अत्र स्राववेदनादि प्राचुर्य्यादित्याकूतम्। स्तन्यावतरणे स्तन्यप्रादुर्भावे तद्वहानां धमनीनां विकाशित्वेन परिणमननिमित्ताद् वेदनाविशेषादित्यभिसन्धिः। ज्वरः प्रादुर्भूतः शारीर आगन्तुकश्च दोषै राजानं जातोत्तरकालञ्च दोषसंपृक्तत्वाद् दोषलिङ्गैरुपलक्षितः सन् प्रवर्त्तते वेगहानोदयतः प्रवाहरूपेण वृत्तिमान् भवति, उपशान्तेषु च दोषेषु निवर्त्तते इत्यर्थादाक्षिप्यते। स्यादेतत् किंनु खलु ज्वरितः सद्य एव नैसर्गिकाद् गात्रौष्ण्यादतितरां मौष्ण्यं स्वेदेन विना

श्रमोऽरतिर्विवर्णत्वं वैरस्यं नयनप्लवः।
इच्छाद्वेषौ मुहुश्चापि शीतवातातपादिषु॥
जृम्भाङ्गमर्द्दौ गुरुता रोमहर्षोऽरुचिस्तमः।
अप्रहर्षश्च शीतञ्च भवत्युत्पत्स्यति ज्वरे॥
सामान्यतो विशेषात् तु जृम्भात्यर्थं समीरणात्।
पित्तान्नयनयोर्दाहः कफान्नान्नाभिनन्दनम्॥
सर्व्वलिङ्गसमावायः सर्व्वदोषप्रकोपजे।
द्वयोर्द्वयोस्तु रूपेण संसृष्टं द्वन्द्वजं विदुः॥९॥
वेपथुर्विषमो वेगः कण्ठौष्ठमुखशोषणम्।
निद्रानाशः क्षवस्तम्भो गात्राणां रौक्ष्यमेव च॥
शिरोहृद्गात्ररुग्वक्त्र-वैरस्यं बद्धविट्कता।
जृम्भाध्मानं तथा शूलं भवत्यनिलजे ज्वरे॥१०॥

कृतत्वचाचाद्वतोत्याह ते रिति। यस्माद् वेगवद्भिः शीघ्रगैः समुद्भ्रान्तैः सम्यगुद्वेगकरैः, "उद्वेगः उद्भ्रमः" इत्यमरश्च. विमार्गगैः विकृतत्वादुत्पथमापन्नैः; विक्षिप्यमाण इतस्ततः प्रनुद्यमानोऽन्तरग्निः यकृद्गतेन शोणितेन मिश्रीभावमापन्नमामदोषाच्छन्नं पाचकसमाख्यं पित्तमाशु वहिश्चरो रक्ताश्रयतस्त्वङ्मांस शिरादिचरो भवति। अपां धातुं "रसस्वेदप्रवाहिनां स्रोतसां मार्गमावृत्य" इति प्रागुक्त स्मरणात् स्रोतोऽवरोधेन रसस्वेदौ रुणद्धि। तस्माद् ज्वरातुरः स्वाभाविकादुष्णादतितरा मुष्णं गात्रमस्येत्यत्युष्णगात्रो भवति। न च स्विद्यति स्वेदेन विनाकृतश्च भवति॥ ८॥

सामान्यतो विशेषतश्च ज्वरस्य पूर्व्वरूपमाह श्रम इति। श्रमोऽज्ञानायासे कर्म्मण्यायासः। अरति रनवस्थितचित्तत्वं। विवर्णत्वमव्यक्तदोषवर्णत्वम्। स्ववर्णश्च त्वगादिष्विति सम्प्रामुक्तं विशिष्टपूर्व्वरूपविषयमित्यदोषः। नयन प्लवोऽश्रुपूर्णनेत्रत्वम्। शीतेत्यादावादिशब्देनाम्बुज्वलनयोः परिग्रहः क्रियते "ज्वलनातपवाय्वम्बुभक्तिद्वेषावनिश्चितौ" इत्यात्रेयानुशासनात्। ज्वर

वेगस्तीक्ष्णोऽतिसारश्च निद्राल्पत्वं तथा वमिः ।
कण्ठौष्ठमुखनासानां पाकः स्वेदश्च जायते ॥
प्रलापः कटुता वक्त्रे मूर्च्छा दाहो मदस्तृषा ।
पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च ॥११॥
गौरवं शीतमुत्क्लेशो रोमहर्षोऽतिनिद्रता ।
स्रोतोरोधो रुगल्पत्वं प्रसेको मधुरास्यता ॥
नात्युष्णगात्रताच्छर्दिरङ्गसादोऽविपाकिता ।
प्रतिश्यायोऽरुचिः कासः कफजेऽक्ष्णोश्च शुक्लता ॥१२
निद्रानाशो भ्रमः श्वासस्तन्द्रा सुप्ताङ्गताऽरुचिः ।
तृष्णा मोहो मदः स्तम्भो दाहः शीतं हृदि व्यथा ॥

लिङ्गान्युपदिदिक्षुर्दोषेषु वातस्य प्रवर्त्तकत्वेन प्राधान्यात् प्रथमं तावद् वातज्वरमधिकरोति वेपथुरिति । विषमोवेगः कालबलतोऽनियता प्रवृत्तिः । क्षवस्तम्भः क्षवथूद्गारनिग्रह इत्येवं व्याख्येयं "क्षवथूद्गारनिग्रहः" इति चरकैकवाक्यत्वात् । शिरोहृद्गात्ररुगिति । हृच्छिरसोः पृथगुपादानं तत्र रुजातिशय्यख्यापनार्थम् । आध्मानं नि १अ० निरदिक्षत् ॥९—१० ॥

वेग इति । वमिरत्र पित्तस्थानादुद्गतस्य पित्तस्य च्छर्द्दनम् । नेह "न च स्विद्यति सर्व्वशः" इत्युपदेशात् "स्वेदश्च जायते" इतीहोक्तं विप्रतिषिद्धं भवति, स्वेदावरोधो ह्यामदोषनिरुद्ध-स्रोतोमार्गत्वाद् भवतीत्यवोचाम, अत्र तु प्रवृद्धत्वादतितरामुष्णं पित्तमोजसा तमामदोषमपाकृत्य स्रोतोमार्गं विस्फारयति, विलाययति च मेदः प्रायेण, विलायिते च तस्मिन् स्वेदसमाख्यस्तज्जलो लब्धपर्य्याप्तमार्गत्वात् स्वच्छन्दं निर्गच्छतीति । कटुता तिक्तत्वेनाप्रियता, "कटुःस्यादप्रियेऽपि च" इति त्रिकाण्डः । मदोऽनभिव्यक्त उन्माद इव ॥ १ . ॥

गौरव मिति । गौरवोत्क्लेशौ गुरुत्व-वान्ताभिलाषविशेषाविति तु "शां ४अ०" अभिषमीक्ष्याध्यवसितव्यम् । स्रोतोरोधः स्वेदादिवहानां स्रोतसां कफेनातितरा मवरोधः । प्रसेकः कफपूर्णाशयत्वेनास्यस्रवणम् । अविपाकिता नितरां कफेन पित्तवहस्रोतोवरोधादेकान्ततः पक्तिशक्तेरभावः ॥ १२ ॥

पक्तिश्चिरेण दोषाणामुन्मादः श्यावदन्तता ।
रसना परुषा कृष्णा सन्धिमूर्द्धास्थिजा रुजः ॥
निर्भुग्नकलुषे नेत्रे कर्णौ शब्दरुगन्वितौ ।
प्रलापः स्रोतसां पाकः कूजनं चेतनाच्युतिः ॥
स्वेदमूत्रपुरीषाणामल्पशः सुचिरात् स्रुतिः ।
सर्व्वजे सर्व्वलिङ्गानि विशेषश्चात्र मे शृणु ॥
नात्युष्णशीतोऽल्पसंज्ञो भ्रान्तप्रेक्षी हतस्वरः ।
खरजिह्वः शुष्ककण्ठः स्वेदविण्मूत्रवर्ज्जितः ॥
सास्रनिर्भुग्ननयनो भक्तद्वेषी हतप्रभः ।
श्वसन् निपतितः शेते प्रलापोपद्रवायुतः ॥
तमभिन्यासमित्याहुर्हतौजसमथापरे ।
सन्निपातज्वरं कृच्छ्रमसाध्यमपरे विदुः ॥
निद्रोपेतमभिन्यासं क्षीणमेनं हतौजसम् ।
संन्यस्तगात्रं संन्यासं विद्यात् सर्व्वात्मके ज्वरे ॥ १३ ॥

सन्निपातजमधिकरोति निद्रेति। कोटरागते सास्रत्वादिना आविले चेति निर्भुग्नकलुषे। तं पुनः सन्निपातं चतुर्द्धा भिनत्ति विशेष मिति। अत्र यस्मिंस्तेत्यूह्यम्, परतस्तमभिन्यास मित्युक्तेः। भ्रान्तप्रेक्षी चञ्चलदृष्टिः सरक्ते अन्तः प्रविष्टे च नयने यस्येति सास्रनिर्भुग्ननयनः। निपतितः नियतं शय्यायां पतितः श्वसन् शेते निद्रातीति तात्पर्य्यम्। तं सन्निपातमित्यर्थः। व्याचिख्यासितानां त्रयाणाम् व्याख्यातस्य च सन्निपातस्यासाध्यत्वमिदानीमभिधत्ते सन्निपातेति। अत्र व्याख्यातस्य सन्निपातस्यासाध्यत्वन्तु विबद्धदोषत्वादिना सम्पूर्णलक्षणत्वएव ज्ञेयम्। वदन्ति हि "दोषे विबद्धे नष्टेऽग्नौ सर्व्वसम्पूर्णलक्षणः। सन्निपातज्वरोऽसाध्यः" इति। परमतमपाकुर्व्वन् स्वमत मुदीरयति निद्रोपेतमिति। अत्र क्षीणमिति तत् करोतीति णिचि अचि च रूपम्, क्षयकारकमित्यर्थः। हतौजसं हतं विनष्टमोजोऽनेनेति हतौजास्तं तथोक्तं विद्यादिति परेणान्वयः। एवञ्च

ओजो विस्रंसते यस्य पित्तानिलसमुच्छ्रयात् ।
स गात्रस्तम्भशीताभ्यां शयने स्यादचेतनः ॥
अपि जाग्रत् स्वपन् जन्तुस्तन्द्रालुश्च प्रलापवान् ।
संहृष्टरोमा स्रस्ताङ्गो मन्दसन्तापवेदनः ॥
ओजोनिरोधजं तस्य जानीयात् कुशलो भिषक् ॥ १४ ॥
सप्तमे दिवसे प्राप्ते दशमे द्वादशेऽपि वा ।
पुनर्घोरतरो भूत्वा प्रशमं याति हन्ति वा ॥ १५ ॥
द्विदोषोच्छ्रायलिङ्गास्तु द्वन्द्वजास्त्रिविधाः स्मृताः ।
जृम्भाध्मानमदोत्कम्प-पर्व्वभेदपरिक्षयाः ।
तृट्प्रलापाभितापाः स्युर्ज्वरे मारुतपैत्तिके ॥ १६ ॥
शूलकासकफोत्क्लेश-शीतवेपथुपीनसाः ।
गौरवारुचिविष्टम्भा वातश्लेष्मसमुद्भवे ॥ १७ ॥
शीतदाहारुचिस्तम्भ-स्वेदमोहमदभ्रमाः ।
कासाङ्गसादहृल्लासा भवन्ति कफपैत्तिके ॥ १८ ॥

ज्वरोऽयं निष्प्रत्यनीक इति गम्यते ओजसः प्राणायतनत्वेनोपदेशात् "ओजः—प्राणायतनमुत्तमम्" इति "सू० १५ अ०"। सन्नास्तेति। सर्व्वात्मके ज्वरे सर्व्वात्मक ज्वरसमूहमध्य इति भगवद्गीतासु "द्वन्द्वः सामासिकस्य च" इतिवद् व्याख्येयम्। सन्नास्तमोजसो विस्रंसनात् स्तम्भशीताचेतनत्वेन परित्यक्तमिव गात्रमत्रेति सन्नास्तगात्र स्तथाविधं ज्वरं सन्नासं विद्यादिति हृदयम्। वक्ष्यतिहि "ओजोविस्रंसते यस्य" इति, विस्रंसते वहिर्निर्गच्छतीत्यर्थः। स्तम्भशीताभ्यामिति स्तम्भो जड़ीभावः, शीतं शीतलत्वं, ताभ्याम् उपलक्षितोऽचेतनो निःसंज्ञः। तमेव पुनः सन्नाससमाख्यं सन्निपातज्वरमवान्तरभेदेन भिनत्ति अपीति। अपिरयं समुच्चयार्थः। यस्यातुरो जाग्रदादिष्ववस्थासु प्रलापवत्त्वादिभि रित्येतै लिङ्गै रन्वीयते तस्य ओजोनिरोधजं ओजसः

आमाशयां ज्वरमुक्तानां मिथ्याहारविहारिणाम्।
दोषः स्वल्पोऽपि संवृद्धो देहिनामनिलेरितः॥
सततान्येद्युष्कत्र्याख्य-चातुर्थान् सप्रलेपकान्।
कफस्थानविभागेन यथासङ्ख्यं करोति हि॥
अहोरात्रादहोरात्रात् स्थानात् स्थानं प्रपद्यते।
ततश्चामाशयं प्राप्य घोरं कुर्य्याज्ज्वरं नृणाम्॥
तथा प्रलेपको ज्ञेयः शोषिणां प्राणनाशनः।
दुश्चिकित्स्यतमो मन्दः सुकष्टो धातुशोषकृत्॥ १९॥

कर्म्मावरोधनिमित्तं सन्त्रासं जानीयादिति तात्पर्य्यम्। समम इत्यादितः कफपैत्तिक इत्यन्तं निगदव्याख्यातम्॥ १३—१८॥

सम्प्रति दोषजत्वसाम्याद् व्याचिख्यासितेषु विषमातिदिष्टविषमेषु मध्येऽनन्तराभिहितानां सततादीनां चतुर्णां विषमज्वराणामतिदिष्टविषमज्वरस्य प्रलेपकस्य चोत्पत्तिप्रकारं प्रत्यव्यवस्थितं मतान्तरद्वितयं शिष्यवुद्ध्यभिवृद्धये आमूलमुपन्यस्य सर्व्वाभिमतत्वेनातीव स्पृहणीयं तात्त्विकमतमुपदिदिक्षति च्यामाणामित्यादिना कैश्चिदीरित इत्यन्तेन ग्रन्थसन्दर्भेण। अत्र सततादीनां चतुर्णां विषमत्वं प्रलेपकस्यातिदिष्ट विषमत्वञ्च परमतो "दोषोऽल्प" इत्यादिवचनव्याख्यानावसरे व्यक्तीकरिष्यामः। मतान्तराभिहितं सततादीनामुत्पत्तिक्रमद्वितयमुपदिशति कफस्थानेति। कफस्थानानि नामामाशयोरःकण्ठशिरःसन्धय इति (सू २१ अं) निरदिक्षत्, तेषां भागविशेषेणोपलक्षितो दोषो यथासंख्यं सततादीन् करोतीत्यर्थः। ज्वराणामेषां जनिं प्रत्येकशो हि्यः सर्व्वशश्च दोषाणां हेतुत्वे सत्यपि दोषत्वसामान्याद् दोष इत्येकवचनं नानुपपन्नम्। अत्र यथासंख्यं करोतीत्यनेनैतदुक्तं भवत्येकस्मिन्नामाशयादाववतिष्ठमान स्तथाविधो दोषः सततादीन् पञ्चविधान् ज्वरान् करोतीति॥

नन्वायुर्व्वेद इद मामनन्ति "सर्व्वएव ज्वरा आमाशयोत्थाः" इति "ज्वरोह्यामाशयोत्थः" इत्यात्रेयान्तेवासिनश्च (च विं ३ अं) इहापि च

कफस्थानेषु वा दोषस्तिष्ठन् द्वित्रिचतुर्षु वा ।
विपर्य्ययाख्यान् कुरुते विषमान् कृच्छ्रसाधनान् ॥ २० ॥

ज्वरसम्प्राप्तिं प्रकृत्य "दुष्टाः स्वहेतुभिर्द्दोषाः प्राप्यामाशयमूष्मणा" इत्युपदिदेश, तत् किमिदं मुच्यते कफस्थानविभागेनेति, नन्वञ्जसा उरआदिष्ववस्थिताद्दोषादुत्पन्नानामामाशयसमुत्थत्वं कथमप्युपपद्यते इत्येवमाशंसूनया—कुर्व्वन् सन्धिगतदोषजत्वेनोपदिष्टस्य प्रलेपकस्यामाशयसम्बन्धिस्नाय्वादि सन्धिसमुत्थत्वेनैव सततकवदामाशयसमुत्थत्वं निरङ्कुशमुपपन्नं भवतीति सम्प्रधार्य्य परिशिष्टं ज्वरवितयं प्रति विशिनष्टि अहोरात्रादिति । इद मत्राकूतम्—उरःस्थो दोषो दैनन्दिनमामाशयमागत्यान्येद्युष्कं करोति कण्ठस्थश्चाहोरात्रात् उर स्ततश्चापरस्मिन्नहनि आमाशयमधितिष्ठन् तृतीयकं करोत्यनयैव दिशा शिरःस्थश्च दोषश्चतुर्थेऽहनि चातुर्थकमित्येवञ्च यथाक्रमं दैनन्दिनं दिनान्तरं दिनद्वयानन्तरञ्चैषामुत्पत्तिः समन्विता भवति । तथेति । अत्र प्रलेपक इति नामधेयेनैव ज्वरोऽयं प्रायेणाविसर्गीति बुद्धि मारोहति । कुतः? बलवत्तरश्लेष्मसम्बन्धित्वेन शरीरं प्रलिप्येवावस्थानात्, तथाहि प्रलेपको नामामाशयसम्बन्धिस्नाय्वादिसन्धिस्थेन दोषेण क्रियत- इत्यवोचाम निपुणं विभाव्य । आमाशयः पुनः सर्व्वेषां श्लेष्मस्थानानां मूल मिति "सूं २१ अं" अभिसमीक्ष्य निरूपयामः । तथाच उत्पत्स्यमान- उत्पद्यमान उत्पन्ने च प्रलेपके सर्व्वशरीरगाः सन्ध्य स्वामाशयसन्धिगतेन दुष्टेन श्लेष्मणा विसृताः प्रदुष्यन्ते । प्रदुष्टाश्च ते शरीरमपि दूषयन्ति दुष्ट श्लेष्मार्पणेन प्रलेपकबलमभिवर्द्धयन्तः । प्रलेपकश्च श्लेष्मबहुलेन दोषेणोत्पद्यत इति परमतो निवेदयिष्यते, स च शोषिणां प्राणनाशन इत्युपदिश्यते शोषश्च श्लेष्मबहुल इति च विज्ञापयिष्यते स्वयमेव । श्लेष्मा च स्थिरत्वा- न्मन्दत्वादाश्लेषित्वाच्च सहसा न मुञ्चतीति तन्मूलेन शोषेण परिक्लिष्टे तथाविधे शरीरे शश्वदेव प्रलिम्पन्निव तिष्ठतीति व्युत्पत्त्या प्रलेपक इति संज्ञां लभत इत्युपपन्नं भवति प्रायेणाविसर्गीति अतएव तन्त्रान्तरेऽप्युक्तं "प्रलिम्पन्निव गात्राणि" इति ॥ १८ ॥

स्यादेतदिदानीञ्चिदमेव तावज् जिज्ञास्यं यदि हि अहोरात्रादहो- रात्रात् स्थानात् स्थानं प्रपन्नो दोषोऽन्येद्युष्कादिकं ज्वरत्रितयं कुरुते तर्हि

परो हेतुः स्वभावो वा विषमे कैश्चिदीरितः ॥ २१ ॥

वेगे समतिक्रान्ते सूक्ष्मत्वेन विवचितो दोषो दौर्ब्बल्यात् ततोऽधिकेन कालेन पुनः स्वस्थानं गन्तुमुत्सहत इत्यध्यवस्याम स्तथाच यथोपदेशमन्येद्युष्कादीनामुत्पत्तिर्नोपपद्यते शनैः शनैर्गमनेनातिक्रम्यते हि तथाविध गमनकालो वेगकालो वा तदात्वे, इत्येवं ये प्रत्यवतिष्ठन्ते तान् निरस्यन्नपरः स्वस्थानस्थित एव दोषः सप्रतिपच्चं विपर्य्यस्त मन्येद्युष्क-तृतीयक-चातुर्थक-समाख्यं विषमज्वर-त्रितयं जनयतीति पक्षान्तरमाश्रित्योपदिदिक्षति कफेति। अत्राद्यो वाशब्दः पक्षान्तर माशंसति शेषश्च प्रकृतमेव ज्वर-त्रितयं समुच्चिनोति, तदयमर्थः द्वित्रिचतुर्षु कफस्थानेषु वा दोषस्तिष्ठन् विपर्य्ययाख्यान् विषमान् अन्येद्युष्कादीन् त्रीन्, वा शब्दात् तथैवाविपर्य्यस्तांश्च त्रीन् ज्वरान् कुरुत आमाशयं प्रदूष्येत्यर्थादाक्षिप्यते तदन्तरेण ज्वरोत्पत्ते-रनुपपत्ते रित्यूनेयम्। एतावता उरःस्थ एव दोषः "अन्येद्युष्कस्त्वहो-रात्रात्" इत्यनागतावेक्षणात् यथा अन्येद्युष्कं नामाहोरात्रघटकीभूतं कमप्येककालं कुरुते तथैव विपर्य्ययाख्यञ्च तं अहोरात्रघटकीभूतं दिवावयवविशेषं रात्र्यवयवविशेषं वा कमपि कालद्वितयं कुरुत इत्येवमेव प्राप्तं भवति, न पुन दिवावयवभूतं रात्र्यवयवभूतञ्चेति वाच्यं तस्य "अहोरात्रे सततकः" इत्यनुशासनग्रस्तत्वात्। तृतीयकश्च तृतीयेऽह्नि इति नियमात्तद्विपर्य्ययस्तु दिनत्रयव्यापीति बुद्धिमता द्रष्टव्यम्। चातुर्थकः पुनः चतुर्थेऽह्नि भवतीत्यत स्तद्विपर्य्ययं प्रति "मध्येऽह्नौ ज्वरयत्यादावन्ते च मुञ्चति" इति तन्त्रान्तरीय मसंशयमादर्त्तव्यम् ॥ २० ॥

न हि पूर्व्वजो जल्पाकः पात्रविको वासौदित्यात्मनापि तथा भवितव्य-मतोऽत्रोच्यते येनोक्तं सततकवत् प्रलेपकस्यामाशयसमुत्थत्वं निरङ्कुश मुपपन्नमिति तं प्रति वक्तव्यम्, भवत्वामाशयसमुत्थोऽयं प्रलेपकः किन्तेनायातं पश्य, ज्वरोऽयं स्वेदेनानुबध्यत इति सूचयाम्बभूव "प्रलिम्पन्निव गात्राणि घर्म्मेण" इति तन्त्रान्तरञ्च। स च कफाधिकेन दोषेण जायत इति तु स्वयमेवोपदिदेश। न च कफाधिकेऽस्मिन् स्वेद उपपद्यते पित्तं हि स्वेदं प्रवर्त्तयति कफश्च तं निरुणद्धीत्येवञ्चामाशयसमुत्थत्वे सत्यपि स्वेदानुविद्धताऽस्य कथमपि नोपपद्यते नापिच सततकस्योत्पत्तिरपीति बुद्धि मारोहति, नन्वष्टसु दोषेषु मध्ये

आगन्तुश्चानुबन्धो हि प्रायशो विषमज्वरे ॥ २२ ॥
वाताधिकत्वात् प्रवदन्ति तज्ज्ञास्तृतीयकञ्चापि चतुर्थकञ्च ।
औपात्यके मद्यसमुद्भवे च हेतुं ज्वरे पित्तकृतं वदन्ति ॥

कस्याप्यामाशयगतत्वादेवैवंविधा शक्ति रुपलभ्यते यथाऽहोरात्रे द्विर्वेगं कर्त्तुमुत्सहत इत्यतः प्रतिपक्षयोर्द्वयोः प्रथमवादिसमयोऽपार्थकत्वान्निरस्त इदानीन्तु द्वितीयवादिसमयो निरस्यते। अत्र च द्विनिचतुर्षु कफस्थानेषु तिष्ठन्नेव दोषः सविपर्य्यासं मन्येद्युष्कादिकं ज्वरत्रितयं कुरुत इत्युपदिश्यते अत्र चेद् वादिनः श्रद्धा मनुरुध्यमाना उरश्चादिष्ववस्थितानां दोषाणामामाशयदूषकत्वं कथञ्चिदभ्युपगच्छेम तथापि नैव दोषान्निर्मोक्षोऽस्ति। दैनन्दिनादावामाशयं प्रदूष्य नियमेन दोषाणां तथा तथा ज्वरजनकत्वं प्रति विनिगमनाभावात् किन्तावत् प्राप्तं ? आह पर इति। वाशब्दोऽयमवधारणार्थः, विषमे प्रज्ञातत्वाद-चिन्त्योत्पत्तिप्रकारे चतुष्के सततकादौ विपर्य्ययाख्ये त्रितयेऽतिदिष्टविषमे प्रलेपके च स्वभावो दोषाणां नैसर्गिको भावविशेष एव परः प्रधानं हेतु स्तत्तद्भावविशेषं प्रतीत्याकूतम्। मतमिदं सर्व्वथा निरवद्यमित्यवधेयम्, कुतः ? अविमतं हि परमत मनुमतं भवतीति मतमिदं स्वपराऽभिमतत्वेनातीव सम्मत मित्याचिख्यापयिषता भगवता केचिदित्याख्यात मित्यर्थतत्त्वमाचक्षाणाः ख्यापयन्ति सर्व्वतन्त्रस्वतन्त्राः ॥ २१ ॥

दृश्यन्ते हि प्रायेणागन्तवोऽनुबन्धभूताश्च ज्वरा विषमज्वर चिकित्सितेनैव प्रशान्तिमापद्यन्ते तदिदमुच्यते आगन्तुरिति। हि शब्दोऽयमवधारणार्थः। विषमज्वरे इत्यस्येरित इति पूर्व्वेणान्वयः। तथा च विषमज्वरसामान्या-न्तर्गतत्वेनोपदिश्यते इत्यर्थनिष्कर्षः। अत्र प्रायश इति विशेषणं प्रधानमर्म्माभिघातादिजनितं ज्वरं व्यवच्छिनत्तीत्यूह्येयम्। ॥ २२ ॥

वातेत्यादि। वाताधिकत्वादित्यविशेषेणोपदेशात् त्रिदोषेष्वित्यूह्येयम्। आमनन्ति च "प्रायशः सन्निपातेन दृष्टः पञ्चविधो ज्वरः" इति "चं चिं श्चं"। एवञ्चात्र तृतीयकचातुर्थकयो रेवोपदेशात् शेषेष्वनियम इति अर्थादापद्यते। पर्व्वतस्यासन्ना भूमिरुपत्यकेत्यभिधीयते तत्र भव औपात्यको नाम तद्देशसंसिद्धो ज्वरविशेषः पित्तकृतं पित्तपर्य्यासं पित्तबहुलमित्येतत् तथाच "कृतं

प्रलेपकं वातबलासकञ्च कफाधिकत्वेन वदन्ति तज्ज्ञाः ।
मूर्च्छानुबन्धा विषमज्वरा ये प्रायेण ते द्वन्द्वसमुत्थितास्तु ॥२३॥
त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरे ।
तयोः प्रशान्तयोः पित्तमन्ते दाहं करोति च ॥
करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च ।
तस्मिन् प्रशान्ते त्वितरौ कुरुतः शीतमन्ततः ॥ २४ ॥
द्वावेतौ दाहशीतादौ ज्वरौ संसर्गजौ स्मृतौ ॥
दाहपूर्व्वस्तयोः कष्टः कृच्छ्रसाध्यतमश्च सः ।
प्रसक्तश्चाभिघातोत्थश्चेतनाप्रभवस्तु यः ॥ २५ ॥

युगेऽल्प मर्थेऽपि" इति मेदिनी। वातबलासकस्तु शोथिनामेव भवति यदाह "नित्यं मन्दज्वरो रूक्षः शूनक स्तेन सीदति। स्तब्धाङ्गः श्लेष्मभूयिष्ठो नरो वातबलासकी।" इति ॥ २३ ॥

त्वक्स्थाविति। अत्र संशयः किमिह ज्वरशब्दोऽयं प्रकृतत्वात् विषमज्वर मवगमयत्याहोस्विद्‌ऽविभज्योपदेशाज्ज्वरसामान्य मिति? किन्तावत् प्राप्तं ज्वरसामान्यमिति। कुतः? परमतोऽति विषमज्वरशब्दोपादानात्। यदि हि ज्वरशब्दोऽयं विषमज्वरबोधकोऽभविष्यत् तर्ह्यनन्तरं विषम-शब्दोपादानं नाकरिष्यत् ज्वरशब्देनैवाभीप्सितार्थोपलम्भात्। अथ चेद् विषमशब्द स्तत्र सन्निहिताऽभिघातचेतनाप्रभवज्वरमात्रपरिग्रहबुद्धेर्निराकर-णार्थमेव प्रयोक्ष्यते न पुनरिहोक्तेन ज्वरसामान्यवाचिना ज्वरशब्देन विषम-ज्वरस्य व्यवहितत्व मध्यवस्येत्येवं ब्रवीषि तथापि नैव दोषोऽस्तर्धत्ते, आरम्भादेवैवं-लक्षणयो र्ज्वरयोः साध्यासाध्यत्व दर्शनात्, नह्यारम्भत एव विषमाः कचिदपि साध्यता मायान्ति आमनन्तिच "आरम्भाद्विषमो यस्य * * हन्ति तम्" इति। त्वचि दोषसंसर्गाज्जातौ संसर्गजौ अथ चेत् आयुर्व्वेदे संसर्गशब्दो द्वयान्वये रूढ़ स्तर्हि गौण्या वृत्त्या संसर्गशब्दोऽयं सन्निपातं लक्षयतीति ब्रूमः सान्निपातिकत्वेना-नयोरन्यत्रोपदेशात् "अन्यत्र सन्निपातोत्थो यत्र पित्तं पृथक्स्थितम्। त्वचि"

रात्र्यह्नोः षट्सु कालेषु कीर्त्तितेषु पुरा यथा ।
प्रसह्य विषमोऽभ्येति मानवं बहुधा ज्वरः ।
स चापि विषमो देहं न कदाचिद्विमुञ्चति ॥ २६ ॥
ग्लानिगौरवकार्श्येभ्यः स यस्मान्न प्रमुच्यते ।
वेगे तु समतिक्रान्ते गतोऽयमिति लक्ष्यते ॥
धात्वन्तरस्थो लीनत्वान्न सौक्ष्म्यादुपलभ्यते ।
अल्पदोषेन्धनः क्षीणः क्षीणेन्धन इवानलः ॥ २७ ॥

इति "अष्टां हृं निं २ अ"। न तावदयमेव कष्टः, कृच्छ्रसाध्यतमश्चेत्याह प्रसक्त इति। आद्येन चशब्देनेह आद्यस्य कष्टत्वादिकं शेषेण च शेषस्य प्रसक्तत्वं कष्टत्वादिकश्चाक्षिप्यते इत्युन्नेयम्। प्रसक्तोऽविरतश्चेत्यनर्थान्तरम्। चेतना बुद्धिरिति पर्य्यायौ, सा चेह वैकारिकत्वान्मिथ्याज्ञाने प्रवर्त्तत इत्युच्यते, चेतनाप्रभवः शोकादिनिमित्तः॥ २४।२५ ॥

रात्र्यह्नो रिति। कीर्त्तितेषु ऋतुचर्य्योपदिष्टेषु षट्सु कालेषु पूर्व्वाह्णादिषु यथा पूर्व्वमुपदिष्टो वातादिनिमित्तो ज्वरसमूहोऽभ्येति तथैव विषमोऽपीत्येवं व्याख्येयम्। एतावता "दोषाः प्रकुपिताः स्वेषु कालेषु" इत्यादि प्रागुक्तस्मरणात् वातादिज्वरवत् विषमा अपि यथादोषं काल एव भवतीत्यायातम्। अत्र विषमं प्रति प्रसह्येति विशेषणं प्रायेणास्यापूर्व्वरूपकत्वमाख्यातुम् हठार्थो हि प्रसह्यशब्दः। अवस्थाविशेषे तं पुनर्व्विशिनष्टि स चेति। च शब्दोऽयं विशेषणार्थोऽपिशब्दश्च कदाचिदित्यनेनान्वेति। नेह स आतुरो यस्मात् ग्लानिप्रभृतिभ्यो न प्रमुच्यते प्रकर्षेण मुक्तो भवति तस्मात् पुनर्ज्वरः कदाचिदपि तस्य देहं न मुञ्चति ज्वरमन्तरेण तन्मूलानां ग्लानिप्रभृतीनां सद्भावानुपपत्तेरित्येवं व्याख्येयम्। तथात्वे हि विषमज्वरमात्रस्यैव सदातनत्वेन ग्लानिगौरवकार्श्यान्वितत्वप्रसङ्गात् प्रत्यक्षविरोधो दुरपनेयः स्यात्। किन्तर्हि यस्मादिति पञ्चमीयं ल्यब्लोपे यं विषमज्वरं प्राप्येत्यर्थः। शेषं समानम्। नन्वेतस्यैतत्त्वं कुतस्तर्हि वेगे समतिक्रान्ते कथमपि नोपलभामहे आह धात्वन्तरस्थ इति। अत्र दृष्टान्तः अल्पेति। अग्निसन्दीपनकाष्ठापरपर्य्यायोऽयमिन्धनशब्दोऽत्र

दोषोऽल्पोऽहितसम्भूतो ज्वरोत्सृष्टस्य वा पुनः।
धातुमन्यतमं प्राप्य करोति विषमज्वरम्॥ २८॥

कुशलादिशब्दवदेकदेशवृत्त्या दीपनमात्रे प्रवर्त्तत इति निश्चीयते तात्पर्य्यमभिसमीक्ष्येति नानुपपत्तिः। एवञ्च "मुक्तानुबन्धित्वं विषमत्व" मिति केनचिदुक्तं विषमज्वरसामान्यलक्षणं विगीतं भवति "न कदाचित् प्रमुञ्चति" इत्युक्तेः, अथ चेद् वेगापक्रान्तिरेव मुक्ति रुच्यते तथापि नैव दोषोऽन्तर्धत्ते सविरामज्वरमात्रविषयत्वेनातिव्याप्ति हि लक्षणमिदं समाहृणोत्येकान्तेन। नापि चैतावदेव विषमज्वरविषयं विगानं पश्यामो, वदन्ति हि—"यः स्यादनियतात् कालात् शीतोष्णाभ्यां तथैव च। वेगतश्चापि विषमो ज्वरः स विषमः स्मृतः" इति। इद मवाकूतम्, यदि हि लक्षणमिद माद्रियते तर्हि नियतकालवृत्तित्वात् सन्ततस्याविषमत्वं प्रसज्येत तस्मात् परिहर तावत् प्राकृतपुरुषोत्प्रेक्षामात्रनिबन्धनानि वाक्यान्येकान्तेन, तानि हि प्रायेण अप्रतिष्ठितानि दृश्यन्ते, नहि बालेन तलमलिनतादिभि र्व्योम्नि प्रकल्प्यमाने तलमलिनतादिविशिष्टमेव व्योमेति विमलमतिभि रध्यवसितव्यम्। किन्तावत् प्राप्तम्, दीर्घकालानुबन्धित्वेन दारुणत्वं विषमत्वमिति, व्युत्पत्ति मात्र मेतत्, वस्तुतस्तु विषमज्वरशब्दोऽयं सन्ततादिषु पञ्चसु ज्वरेषु रूढ़ः, प्रलेपकादौ चातिदिष्टः इति तीर्थकराणां प्रसिद्धमाहात्म्यानां वचनार्थतत्त्वमनुसन्धायाध्यवस्यामः, न चैतदश्रद्धेयं, विषमज्वरं प्रकृत्य परमतः सन्ततादीना मेव पञ्चानां विवक्षितत्वात्॥ २७॥

नन्विह पूर्व्वं आमाशयामित्यादिना मिथ्याहारविहारिणामेव सततादयो भवन्तीत्युपदेशात् ते ते ज्वरा रसगता इत्यध्यवसितम्, इदानीं पुनर्धात्वन्तरस्थो लीनत्वादित्युपदिश्यते तदत्र संशयः, किमेते रसगता आहोस्वित् धातुमात्रमधितिष्ठन्तीति न वयं नियमेनाध्यवस्याम स्तद्भूयोऽपि विशदं विज्ञापयतु भगवानित्येवमनुयुक्त आह दोष इति। सम्भूत उत्पन्नः इदञ्चेदञ्च नः सर्व्वेषां प्रत्यक्षं, ज्वरोत्सृष्टानामिव ज्वरितानां तथा ज्वरैकान्ततोऽसंसृष्टानाञ्चैते ज्वरा भवन्ति, तदिदं ब्रूमः। अत्र ज्वरोत्सृष्टानामुपदेशेनैव ज्वरितानां उपदेशः क्रियते कैमुतिकन्यायात्, तथाहि ज्वरोत्सृष्टानां चेदहितसम्भूतो दोषो ज्वरानेतानुत्पादयति तर्हि किमु वक्तव्यं परिक्लिष्टशरीरत्वेन तेभ्यो बलवत्तर-

सन्ततं रसरक्तस्थः सोऽन्येद्युः पिशिताश्रितः ।
मेदोगतस्तृतीयेऽह्नि त्वस्थिमज्जगतः पुनः ॥
कुर्य्याच्चातुर्थकं घोरमन्तकं रोगसङ्करम् ।
केचिद्भूताभिषङ्गोत्थं ब्रुवते विषमज्वरम् ॥ २९ ॥

दोषाणां ज्वरितानां पुनस्तथादोषे जाते, अन्यथा प्रधानस्य ह्रानादप्रधानस्योपादानाद्विषममधिष्टं ते व्यक्तकरोति वाक्पाटवमेकान्तेन, वाशब्दश्च ज्वरेनैकान्ततोऽसंसृष्टान् समुच्चिनोतीत्यवश्यं वक्तव्यम् । "आरम्भाद्विषमो यस्तु" इति तन्त्रान्तरीयस्मरणात् । एवञ्च सर्व्वेषां प्रत्यक्षपरिकलितानां विषमज्वराणामुत्पत्तिक्रम इह सूचितो भवतीति नेयम् ॥ २८ ॥

उक्त मर्थं स्फोरयन् दोषतो विषमज्वरपञ्चकं निरूपयति सन्ततमिति, परमतो वृत्तौ सन्ततानन्तरं सततकस्योपदेशात् सन्ततशब्दोऽयं परिभाषाविशेषेण यथा सन्ततं ज्वरं तथैव संक्रान्तिद्विरेफादिशब्दवत् लक्षितलक्षणया तद्वाच्यसातत्यस्य स्ववाचकसततशब्द-परिभाषाविषयत्वरूपसम्बन्धवत्त्वेन सततकमपि ज्वरं बोधयतीति ब्रूमः । एवञ्च सन्ततशब्देन परिप्राप्तयोः सन्ततसततकयोर्ज्वरयोर्यथासंख्यं रसरक्तस्थपदोपात्ततद्दोषद्वितयगतत्वे प्राप्ते दोषयोर्द्वयोर्दोषत्वमेकविधं भवतीति सम्प्रधार्य्योच्यते रसरक्तस्थ इति । न तावदेकपदोपात्तयोरर्थयोः पदार्थान्तराभ्यां यथासंख्येनान्वयोऽप्रसिद्ध इति वाच्यं चिन्तामणौ "गङ्गायां घोषमत्स्यौ स्तः" इति प्रसिद्धपदे तथा दर्शनात् तत्र हि गङ्गापदलक्ष्यार्थे तीरे घोषः सङ्केतोपस्थिते च प्रवाहे मत्स्योऽन्वीयत इत्यदोषः । अन्यस्मिन्नहनीत्यन्येद्युः, रोगसङ्करमिमं ज्वरपञ्चकं घोरं दुश्चिकित्स्यत्वाद् भयङ्करं मन्तकञ्च ब्रुवत इति परेणान्वयः । ये तु केचिदाचार्य्यदेशीया विषमज्वरसामान्यलक्षणं गन्धमात्रेणापि भूताभिषङ्गोत्थं ज्वरमालिङ्गत्यथवा नेति मानुसन्धायागन्तुकविशेषं ज्वरमिमं विषमज्वरत्वेनामनन्त्यनायासेन, व्याजेन तामपाकुर्व्वन् विषमज्वरं प्रत्युपदिष्टात् स्वाभिमतादनन्तरं तन्मतमुपन्यस्यति केचिदिति । विषमज्वरवाच्यत्वस्यास्य बाला अप्यध्यवस्यन्ति प्रतीकारविधौ भूतविद्यासमुद्दिष्टैरित्याद्युक्तेः, एवञ्च वचनमिदं व्याचक्षाणाः 'परवचनमप्रतिषिद्धमनुमतं' इत्युक्तेमेत्युपक्रम्य बहुधा प्रलपन्तः कथं नापत्रपेरन् । देवग्रहावेशादुत्पन्नो भूताभिषङ्गोत्थः॥ प्राक् चामाणामित्यादौ सततादिभिः सहोपदिष्टस्य प्रक्षेपकस्येहानुपदेशादतिदिष्टविषमत्वमस्य सूचितम् ॥ २८ ॥

सप्ताहं वा दशाहं वा द्वादशाहमथापि वा।
सन्तत्या योऽविसर्गी स्यात् सन्ततः स निगद्यते॥
अहोरात्रे सततको द्वौ कालावनुवर्त्तते।
अन्येद्युष्कस्त्वहोरात्रादेककालं प्रवर्त्तते॥
तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः॥ ३०॥

सन्ततादीनां लक्षणमुपदिदिक्षति सप्ताहमित्यादि। इदमत्र विचार्य्यते किमिह सप्ताहादयो विकल्पा दोषबलाबलविशेषमाश्रित्य उपदिश्यन्ते आहोस्विद् वातादिदोषभेदमिति। किन्तावत् प्राप्तं वातादिदोषभेदमिति, कुतः? "पित्त-कफानिलवृद्ध्या दशदिवस-द्वादशाह-सप्ताहात्। हन्ति विमुञ्चति वाशु त्रिदोषजोधातुमलपाकात्॥" इति तन्त्रान्तरीयैकवाक्यत्वात्। त्रिदोषजत्वञ्चास्य "प्रायशः सन्निपातेन दृष्टः पञ्चविधो ज्वरः" इति आत्रेयानुशासनाद् अभ्युपेतव्यम्, स्यादेतद्, यथात्र चेत् सप्ताहादयः शब्दाः स्वार्थमेवाभिदधीरन् तर्हि दोषाणां बलतारतम्यमनपेक्ष्य विशिष्टवातपित्तकफजत्वेन त्रेधा विभक्तस्य सन्ततस्य सप्ताहादिष्वविशेषेणोपशमात् तुल्यं भवति दोषबलतारतम्यज्ञानमज्ञानेनेत्यतो ब्रूमः अत्र सप्ताहादयो विकल्पा मध्यस्योभयभागित्वात् सप्ताहादिरूपं मध्यमं कालं बाहुल्यानुशयं वाश्रित्योपदिष्टा इत्यध्यवसितव्यम्। एवञ्च तथा तथा बलविशेषात् सप्ताहादिभ्य ऊर्द्ध्वमधो वा सन्तत्या अविसर्गी सन्तत इति राद्धान्तः। अहोरात्र इति अहश्च रात्रिश्चेत्यहोरात्र स्तत्र द्वौ कालाविति समुदितस्याहोरात्रस्य यामादिभेदेनानेकत्वे सत्यपि स्थूलं सन्निहितं च सहसा बुद्धिरारोहतीति कृत्वा समभिव्याहृताहोरात्रशब्दावगम्य महोरूपं रात्रिरूपञ्चेति कालद्वितय-मादित्सन्त्याचार्य्याः, आमनन्ति च "शब्देनोच्चार्य्यमाणेन यद्वस्तु प्रतिपद्यते। तच्च शब्दस्य तद्वस्तु न्यायतामर्थसंश्रया।" इति एवञ्चाहो रात्रिञ्चानु लक्ष्यीकृत्य यो ज्वरो वर्त्तते स सततकोनामेत्यापातत उपलब्धेऽप्यह्नो रात्रेश्चा-वयवानामपि तथात्वात् यस्मिन् कस्मिंश्चिद् भागे ज्वरोऽयं भवन् सदृश एव भवतीत्युन्नेयम् तथैव प्रत्यक्षपरिकलितत्वात्। तथा चाह्नि रात्रौ चाद्यौ वा मध्यौ वा ऽन्त्यौ वा सर्व्वमहः सर्व्वां वा रात्रिमनु लक्ष्यीकृत्य यो ज्वरो वर्त्तते स सततको नामेत्यर्थनिष्कर्षः। एवं प्राप्ते ब्रूमः "अह्नि द्वौ कालौ रात्रौ वा

वातेनोद्धूयमानस्तु यथा पूर्य्येत सागरः ।
वातेनोदीरितास्तद्वत् दोषाः कुर्व्वन्ति वै ज्वरान् ॥
यथा वेगागमे वेलां छादयित्वा महोदधिः ।
वेगहानौ तदेवाम्भस्तत्रैवान्तर्निधीयते ॥
दोषवेगोदये तद्वदुदीर्य्येत ज्वरोऽस्य वा ।
वेगहानौ प्रशाम्येत यथान्तः सागरे तथा ॥ ३१ ॥

अङ्गारककालं रात्राविककालं वा" इत्येवमर्थो येषां चेतसि चकास्ति न चकास्ति तेषां वैशारद्यमायुर्वेदेष्वित्यवधेयमिति । अन्येद्युष्क इति अहोरात्रं प्राप्येत्यहोरात्रात्, पञ्चमीयं ल्यब्लोपे ॥ ३० ॥

सम्प्रति प्रागुक्तेषु तेषु तेषु कालेषु ज्वरोत्पत्तिर्नासमञ्जसीति दृष्टान्तमुपन्यस्योपदिदिक्षति वातेनेति । उद्धूयमानः सालोड़मूर्द्धं नीयमानः, पूर्य्यते विरलावयवत्वेनोद्रिच्यते, तद्वदेव वातेनामाशयेतरगतेनेति गम्यते, आमाशयगतस्योदीर्य्यत्वेनोपदेशात् । दोषा आमाशयगता वातपित्तश्लेष्माणः, उदीरिता उद्रिक्ताः, ज्वरान् कुर्व्वन्ति वातेरितदोषकृतै स्वै स्वै ज्वरलिङ्गैः शरीरमिदं परिसृप्यत इत्याकूतम् । ननु किमिदमुच्यते यदि हि वातेरिता दोषा ज्वरान् कुर्व्वन्तीति ब्रवीषि तर्हि कतिचित् कालातिक्रमे कथमेतान्नोपलभामहे, न हि निर्हरणं संशमनं वा विहाय तन्मूलाना मुद्रिक्तानां दोषाणां शान्ति रुपदिश्यत इत्येवं विप्रतिपन्नाननायासेन न्याय्यां पदवीमानिनीषुः पूर्व्वोक्तमर्थं मनूद्य प्रकृत मनुसरति यथेति । वेगागमे चन्द्रमसा प्रवर्त्तितेन वातेनोन्नमनकारिण्युपस्थापिते गतिविशेषे । अन्तर्निधीयते संश्लिष्टावयवत्वेनेति नेयम् । दोषवेगोदये कालसचिवेनामाशयेतरगतेन वातेन विश्लेषितपरमाणुकत्वादिना दुष्टत्वाद्दोषाणां ज्वरकारिणि सर्व्वशरीरानुसारित्वे जाते, उदीर्य्येत यथाबलमभिव्यज्येत, वेति चार्थोऽयं वा शब्दः, वेगहानाविति संसिद्धायामित्येव, प्रशाम्येत दोषाणां संश्लिष्टावयवत्वेन पुन रामाशयानुसरणादित्यनुसन्धेयम् । पुनः पुनरुपदिष्टं हि शास्त्रं भूयो व्यवसायाभिवृद्धये प्रभवतीत्युक्तमर्थं मनुवदति यथेति, यथा सागरे सागरस्यान्तर्यथाम्भो निधीयते तथैवामाशये दोषानुसरणात्तज्ज्वरो

विविधेनाभिघातेन ज्वरो यः संप्रवर्त्तते।
यथादोषप्रकोपन्तु तथा मन्येत तं ज्वरम्॥
श्यावास्यता विषकृते दाहातीसारहृद्ग्रहाः।
अभक्तरुक् पिपासा च तोदो मूर्च्छा बलक्षयः॥
ओषधीगन्धजे मूर्च्छा शिरोरुक् वमथुस्तथा।
कामजे चित्तविभ्रंशस्तन्द्रालस्यमभक्तरुक्॥
हृदये वेदना चास्य गात्रञ्च परिशुष्यति।
भयात् प्रलापः शोकाच्च भवेत् कोपाच्च वेपथुः।
अभिचाराभिशापाभ्यां मोहस्तृष्णा च जायते।
भूताभिषङ्गादुद्वेग-हास्यकम्पनरोदनम्॥
श्रमक्षयाभिघातेभ्यो देहिनां कुपितोऽनिलः।
पूरयित्वाखिलं देहं ज्वरमापादयेद्भृशम्॥ ३२॥

ज्वर इत्यभिसन्धिः। अन्तान्तःसागर इति सागरस्याम्भोराशिविशेषत्वे सत्यपि कथञ्चिदेकदेश विवक्षया सप्तमीनिर्द्देशः, "इह वने तिलकाः" इतिवत्। नेह समुद्रस्य ह्रासवृद्धोर्दृष्टान्तत्वेनोपन्यासोऽनुपपन्नः, आम्नायते हि "स्थालीस्थमग्निसंयोगादुद्रेकिसलिलं यथा। तथेन्दुवृद्धौ सलिल मम्बुधौ मुनिसत्तम। न न्यूना नातिरिक्ताश्च वर्द्धन्त्यापो ह्रसन्ति च। उदयास्तमयेष्विन्दोः पक्षयोः शुक्लकृष्णयोः।" इति विष्णुपुराणम्। २य अंश ४र्थ अं। अत्र इन्दुवृद्धौ इन्दोर्व्वीक्ष्यातिक्रमे उदयात् परमवासतस्तत्समुद्रसन्निहितत्व इति यावत्। एतावता नैककालं सर्व्वसमुद्रेषु ह्रासवृद्धी प्रवर्त्तेते इत्युन्नेयम्। उदयास्तमयेषु रविस्तु तारतम्येन योगवियोगेष्वित्येव प्रत्येतव्यम्, स्मरन्ति हि "रविनास्तमयो योगो वियोग स्तूदयो भवेत्।" इति दीपिका॥ ३१॥

आगन्तवस्तु दोषान्वयादनन्तरं तत्प्रकोप मभिसमीक्ष्य शारीरवदुपदेष्टव्या इत्येवावेदयितुमिदमुच्यते विविधेनेति। तेषु च केषाञ्चित् विशिष्टलिङ्गान्युपदिदिक्षति श्यावास्यतेत्यादिना रोदनमित्यन्तेन ग्रन्थसन्दर्भेण। अभक्तेति-

रोगाणान्तु समुत्थानाद्विदाहागन्तुतस्तथा ।
ज्वरोऽपरः सम्भवति तैस्तैरन्यैश्च हेतुभिः ॥
दोषाणां स तु लिङ्गानि कदाचिन्नातिवर्त्तते ॥
गम्भीरस्तु ज्वरो ज्ञेयो ह्यन्तर्दाहेन तृष्णया ।
आनद्धत्वेन चात्यर्थं श्वासकासोद्गमेन च ॥
हतप्रभेन्द्रियं क्षामं दुरात्मानमुपद्रुतम् ।
गम्भीरतीक्ष्णवेगार्त्तं ज्वरितं परिवर्ज्जयेत् ॥
हीनमध्याधिकैर्दोषैस्त्रिसप्तद्वादशाह्निकः ।
ज्वरवेगो भवेत् तीव्रो यथापूर्व्वं सुखक्रियः ॥
इति ज्वराः समाख्याताः कर्म्मेदानीं प्रवक्ष्यते ॥ ३३ ॥

विरोधार्थोऽयं नञ्, तत् करोतीति णिचि अचि च रूपम् बहुव्रीहिर्व्वा; भङ्गद्वेषात्मिका रुगित्यर्थनिष्कर्षः। प्राक् कथान्तरप्रसङ्गेन परित्यक्तान् कांश्चिज्ज्वरोत्पादनवसरवशादुपदिशति श्रमेति। अभिघातशब्दोऽयं विप्रकृष्टमेवाभिघात मभिधत्त इत्यवश्यं वक्तव्यम्। अनिलस्य ज्वरकर्तृत्वेनोपदेशात्, सन्निकृष्टोह्यभिघात आगन्तुहेतुरित्युपदिश्यते, "आगन्तवोऽभिघातनिमित्ताः" इति ॥ ३२ ॥

सम्प्रत्यातङ्क ग्रहपीड़ादिकस्यापि निमित्तं कृत्वा अपरे ज्वराः सम्भवन्तीति निवेदयति रोगाणामिति। समुत्थानमतिवृद्धिः। विदाहो व्रणशोफादीनामेव। आगन्तुर्भग्नादिः। अन्यैर्ग्रहनक्षत्रपीड़ादिभिरित्युक्तेशम्। दोषाणामिति। तुकारोऽयं विशेषणार्थः। स जातः पुनर्ज्वर इत्यर्थः। गम्भीर इति। गम्भीरोऽन्तर्व्वेगः। आनद्धत्वेन दोषमलानां निबद्धत्वेनेत्यर्थः। "दोषवर्च्चो विनिग्रहः" इति तन्त्रान्तरञ्च। प्रभा दीप्तिः कान्तिरिति यावत्। हतानि प्रभेन्द्रियाण्यस्येति हतप्रभेन्द्रियम्। दुरात्मानं निश्चेष्टशरीरम्। आत्मा यत्नश्चेष्टेति हि पर्य्यायाः। त्रिसप्त-द्वादशाहेषु भव स्त्रिसप्तद्वादशाह्निकः "कालात् ठञ्" पां सूं ४।३।११ इति ठञ् ॥ ३३ ॥

ज्वरस्य पूर्व्वरूपेषु वर्त्तमानेषु बुद्धिमान् ।
पाययेत घृतं स्वच्छं ततः स लभते सुखम् ॥
विधिर्मारुतजेष्वेव, पैत्तिकेषु विरेचनम् ।
मृदु प्रच्छर्द्दनं तद्वत् कफजेषु विधीयते ॥
सर्व्वं द्विदोषजेषूक्तं यथादोषं विकल्पयेत् ॥
असंस्नेहनीयोऽशोध्यश्च संयोज्यो लङ्घनादिना ॥३४
रूपप्रागरूपयोर्विद्यान्नानात्वं वह्निधूमवत् ॥३५॥

चिकित्सितमधिकरोति ज्वरस्येति। अत्र पूर्व्वरूपेषु निरामेष्वितग्वश्यं विशेषणीयं, सामेषु स्नेहादिप्रतिषेधात्, वक्ष्यति च "असंस्नेहनीयोऽशोध्यश्च" इति, विकल्पयेत् यथादोषं पक्षतः प्रयोजयेदितग्र्थः। अत्र सर्व्वमित्यादिना द्विदोषजेषु यथा दोषं सर्पिःपानादीनां त्रयाणां द्वयोर्द्वयोरुपदेशात् त्रिदोषजेषु दोषबलमभिसमीक्ष्य त्रयाणामेव प्रयोज्यत्वमर्थादाक्षिप्यत इत्यत स्तदुपदेशं प्रति जोषमास्त इत्यनुसन्धेयम्। अत्र 'विवर्ज्जयेत् स्नेहपानं' इत्यादिना चिं ३१।१३ अं उक्तेन विधिना स्नेहादिभिः परिहर्त्तव्यान् प्रति विशिनष्टि असंस्नेहनीय इति। निगदव्याख्यातम् ॥ ३४ ॥

नन्वत्र प्राक्केवलेति नामधेयेन रूपं लक्षणतो व्याहर्त्तुं "प्राक्केवलो यः प्रागेवोत्पन्नो व्याधिरपूर्व्वरूपोऽनुपद्रवश्च" इति सूं ३५ अं निवेदयाम्बभूव। अथापूर्व्वरूपो व्यक्तत्वेन पूर्व्वरूपावस्था मतिक्रान्त इत्येवमेव प्राचीनमत मनुसृत्य व्याख्येयम्। यन्मत मवलम्ब्य तन्त्रान्तरीया अव्यक्तलक्षणत्वेन पूर्व्वरूपं व्याख्याय "तदेव व्यक्ततां यातं रूप मित्यभिधीयते" इत्याहुः। एवञ्च वृक्षाङ्कुराविव रूपप्राग्रूपे अपि केवलं व्यक्ताव्यक्तत्वमात्रेण भिद्येते न पुनः परमार्थत इति बुद्धिमारोहतीति जिज्ञास्यमेकमापन्नम्, यदि हि रूपप्राग्रूपे परमार्थतो न भिद्येते तत्कथं "ज्वरस्य पूर्व्वरूपेषु" इत्यादिना पूर्व्वरूपमात्रं प्रकृत्य प्रतीकारक्रममुपदिदिक्षसीत्येवं विप्रतिपत्तानपाकरोति रूपेति। नानात्वं परस्परभेद इत्यनर्थान्तरम्, वह्निधूमवदिति "द्वन्द्वेघि" इति पां सूं २।२।३२, पूर्व्वनिपातः, तदय-

प्रव्यक्तरूपेषु हितमेकान्तेनापतर्पणम् ।
आमाशयस्थे दोषेतु सोत्क्लेशे वमनं परम् ॥३६॥
आनद्धः स्तिमितैर्दोषैर्यावन्तं कालमातुरः ।
कुर्य्यादनशनं तावत् ततः संसर्गमाचरेत् ॥
न लङ्घयेन्मारुतजे क्षयजे मानसे तथा ।
अलङ्घ्याश्चापि ये पूर्व्वं द्विव्रणीये प्रकीर्त्तिताः ॥

अर्थः—यथा धूमनिमित्तकारणीभूतो वह्निः धूमतः परमार्थतः एव भिद्यते तथैव रूपनिमित्तकारणीभूतं प्राग्रूपमपीति निश्चिनुमः। एवञ्च प्राक्केवल-लक्षणे अपूर्व्वरूपः पूर्व्वरूपाद् भिन्न इत्येवं व्यपदेष्टव्यम्। न चैतदग्राह्यं यदि हि वृक्षाङ्कुरयोरिव रूपप्राग्रूपयोः परमार्थतोऽभेदोऽभविष्यत् तर्हि प्राग्रूपं विशेषयन् "जृम्भात्यर्थं समीरणाद्" इत्येवमुपदेशं नाकरिष्यत्, तदात्वे हि जृम्भायाः कथमप्यत्यर्थता न सम्भवति। अथ चेद् भवतः अत्रां समूलकाषं नाकषन् कथञ्चित् तदात्वेऽप्यस्या अत्यर्थतामभ्युपगच्छेयम् तथापि नैव दोषान्निर्मोचोऽस्ति पूर्व्वरूपाणामेव व्यक्तत्वे रूपत्वेनाभ्युपगमे पूर्व्व-रूपेतरेषां नितरां रूपत्वेनोपदेशानुपपत्तेः, तस्मात् रूपप्राग्रूपे वह्निधूमवदेव द्रष्टव्ये। न पुनः वृक्षाङ्कुराविवेति राद्धान्तोऽतः पृथक्त्वेन पूर्व्वरूप प्रतीकार-विधानं नानुपपन्नमित्यभिसन्धिः ॥ ३५ ॥

प्रव्यक्तेति। दोषे आमाशयस्थे सति प्रव्यक्तरूपेषु ज्वरेष्विति शेषः, सोत्क्लेशेतु तस्मिन् दोष इति सम्बन्धः। तुकारो विशेषणार्थः। उत्क्लेशोनाम "शां ४ अ" उत्क्लिश्यावम्" इत्याद्युक्तलक्षणः ॥ ३६ ॥

नन्विद मामनन्ति "ज्वरितं ज्वरमुक्तं वा दिनान्ते भोजयेल्लघु" इति तदिदं भिन्नार्थं पुनरापन्नम् प्रव्यक्तरूपेषु कियन्तं काल-मपतर्पणं कार्य्य-मित्याह आनद्ध इति। स्तिमितैः क्लिन्नैरचलैर्व्वा दोषैरानद्धो बद्धः। अत्रा-नद्धस्तिमिते गिति पाठेतु "खर्परेशरि विसर्गलोपो वा वक्तव्यः" इति विसर्जनीयलोपः। संसर्गं पेयादिसम्बन्धमाचरेत् विधिवत् प्रयोजयेदिति यावत्। नेति। लङ्घनमयं मनयम एव प्रवर्त्तते न पुनः "यत्किञ्चिल्लाघव-करं काये तल्लङ्घनं स्मृतम्" इति पारिभाषिके लङ्घन इति गन्तव्ये अथा

अनवस्थितदोषाग्नेर्लङ्घनं दोषपाचनम्।
ज्वरघ्नं दीपनं काङ्क्षारुचिलाघवकारकम्॥
सृष्टमारुतविण्मूत्रं क्षुत्पिपासाऽसहं लघुम्।
प्रसन्नात्मेन्द्रियं क्षामं नरं विद्यात् सुलङ्घितम्॥
बलक्षयस्तृषा शोषस्तन्द्रानिद्राभ्रमक्लमाः।
उपद्रवाश्च श्वासाद्याः सम्भवन्त्यतिलङ्घनात्॥३७॥
दीपनं कफविच्छेदि पित्तवातानुलोमनम्।
कफवातज्वरार्त्तेभ्यो हितमुष्णाम्बु तृट्छिदम्॥
तद्धि मार्दवकृद्दोष-स्रोतसां शीतमन्यथा।
सेव्यमानेन तोयेन ज्वरः शीतेन वर्द्धते॥
पित्तमद्यविषोत्थेषु शीतलं तिक्तकैः शृतम्।
गाङ्गेयनागरोशीर-पर्पटोदीच्यचन्दनैः॥३८॥

अनशन विधेरपवादत्वेनोपदेशात्। अतः प्रकृतत्वात् सामेष्वपि मारुतजादिष्वनियमेन भोजनञ्चेत् विधित्ससि तर्हि भवत एव वाग्वज्रो भवन्तं प्रहरत्यवैशारद्याविष्कारेण दोषच्छन्नतया विपक्तुमनीश्वरेणानलेन तेनापरिणतं हि भवद्विहितं तदन्नमसंशयमातुर मतिपातयत्यनायासेन, तस्मादेवं ब्रूमः, तत्र तत्र सामेष्वग्निबलमभिसमीक्ष्य लघ्वन्नं भोजयेत् न पुनर्गुर्व्विति, एवञ्चामान्वयबाहुल्यात् लघ्वशनमपि चेत् न परिणंस्यति इति बुद्धिमारोहति तर्हि अनशनमपि नानुपपन्न मित्यनुसन्धेयम्। अनवस्थितेति। लङ्घनशब्देनेह प्रकृतत्वादनशनस्योपलम्भेऽपि लघ्वशन मप्युपदिष्टं भवति तारतम्येनानयो रुभयोरेव दोषपाचनादित्वेनानुभवात्। दृश्यते ह्यनशनासहिष्णुत्वे लघ्वशनमपि कार्य्यकरं भवतीति॥ ३७॥

दीपनमिति। तृट्छिदमिति "इगुपधज्ञाप्रीकिरः कः" इति पा सू १।१।१२५ कः। पित्तेति। तिक्तकैः "सू ४२ अ" उपदिष्टैस्तिक्तवर्गाभिहितै द्रव्यैः, गाङ्गेयं मुस्तकं, तदादिभिर्व्वा शृतम्। अत्र शृतमित्य-

दीपनी पाचनी लघ्वी ज्वरार्त्तानां ज्वरापहा।
अन्नकाले हिता पेया यथास्वं पाचनैः कृता ॥
बहुदोषस्य मन्दाग्नेः सप्तरात्रात् परं ज्वरे ।
लङ्घनान्ते यवागूभिर्यदा दोषो न पच्यते ॥
तदा तं मुखवैरस्य-तृष्णारोचकनाशनैः ।
कषायैः पाचनैर्हृद्यैर्ज्वरघ्नैः समुपाचरेत् ॥३९॥

विशेषेणोपदिष्टेऽपि गाङ्गेयादिकं कर्षमात्रमाहृत्य प्रस्थपरिमिते जले पक्वा अर्द्धावशिष्टं कर्त्तव्यम्, पेयादिसाधनत्वेन पानीयत्वेन चोपयोक्तुं तथाभूतस्यैवोपदेशात्। वदन्ति हि "यदप्सु शृतशीतासु षड़ङ्गादि प्रयुज्यते। कर्षमात्रं ततो द्रव्यं साधयेत् प्रास्थिकेऽम्भसि। अर्द्धशृतं प्रयोक्तव्यं पाने पेयादि संविधौ" इति। अत्र शृतशीतासु यथोक्तभेषजसाध्यास्वित्यध्यवसेयम्, तासु कर्त्तव्यासु सतीष्वित्येवं व्याख्येयम्। ततः षड़ङ्गादितः। कर्षमात्रं द्रव्यमित्यन्वयः। तत इत्यस्य षड़ङ्गादिविशेषणत्वे द्वितीयान्तात् सार्व्वविभक्तिकस्तसिल् ॥ ३८ ॥

दीपनीति। पेयाया इहोपदेशो मध्यस्योभयभागित्वात् मध्यबलातुरं प्रतीत्यवेति प्रतेतव्यम्। दौर्ब्बल्ये हि जाते लघुतरत्वात् मण्डमेवाभिमन्यन्त्याचार्य्याः। अवस्थाविशेषे व्यवस्थितं पेयादिकं हित्वा कषायविशेषमुपदिदिक्षति वक्तीति। अत्र लङ्घनान्त इतरान्तशब्दो विनाशार्थं स्तदयमर्थः, बहुदोषस्यातएव मन्दाग्नेर्यस्यातुरस्य सप्तरात्रात् परं ज्वरे "ज्वरः सन्तापलक्षणः" इति स्मरणात् सन्तापमात्रे लङ्घनान्ते लङ्घनेन निरस्ते सति यदा यवागूभि रुपयुक्तैः पेयादिभि र्दोषो न पच्यते दोष लिङ्गानि नान्तर्दधते, नापि चाग्निर्व्विवर्द्धते तदा तमातुरमेवंगुणैः कषायैः समुपाचरेदुपपादयेत् ता यवागू र्हित्वेति हृदयम्। अत्र सप्तरात्रात् परमिति विशेषणं तत एव एवंविधमुख्यभेषजोपयोगविधानात्, वक्ष्यति हि "सप्तरात्रात् परं केचिन्मन्यन्ते देयमौषधम्" इति, एवं मासे सप्तरात्रं यावत् लङ्घनमथवा [illegible] लघुभोजनेन चोपपादयेदित्यर्थादापद्यते ॥ ३९ ॥

पञ्चमूलीकषायन्तु पाचनं पवनज्वरे।
सक्षौद्रं पैत्तिके मुस्तकटुकेन्द्रयवैः कृतम्॥
पिप्पल्यादिकषायन्तु कफजे परिपाचनम्।
द्वन्द्वजेषु तु संसृष्टं दद्यादथ विवर्ज्जयेत्॥
पीताम्बुर्लङ्घितो भुक्तोऽजीर्णी क्षीणः पिपासितः॥४०॥
मृदौ ज्वरे लघौ देहे प्रचलेषु मलेषु च।
पक्कं दोषं विजानीयाज्ज्वरे देयं तदौषधम्॥४१॥
दोषप्रकृतिवैकृत्यादेकेषां पक्कलक्षणम्॥४२॥

के नाम ते पाचनकषाया इत्येवमनुयुक्तो निदर्शनार्थं कांश्चिदुपदिदिक्षति पञ्चेत्यादिना दद्यादित्यन्तेन ग्रन्थसन्दर्भेण। कांश्चित् प्रति तांस्तान् कषायान् निवारयति अथेति। तुशब्दस्थानाधिष्ठानोऽयमथशब्दः। भुक्त इत्यकारो मत्वर्थीयो भुक्तवानित्यर्थः। इदमत्रावधेयम्। कषायो हि स पीताम्बोर्भुक्तवतो-ऽजीर्णिनश्चामाशयस्थेनाम्बुना अन्नपानेनाजीर्णरसेन च तेन मिश्रीभूयामाभि-वृद्धये प्रभवति सम्यक् लङ्घितस्य क्षीणस्य चाग्नेयत्वात् बलक्षय मापादयति पिपासितस्यार्वाक् पीतोदकत्वे पीताम्बोरिव पर्य्यवतिष्ठते, अपीतोदकत्वे तु कण्ठास्यशोषादय स्ते ते चं सू ७ अं उक्ताः पिपासानिग्रहजा विकारा उत्पद्येरन्निति तेषामापद मपनेतुं द्वितीयापत्ते रभेषजत्वेनोपपद्यते स्मरन्ति हि "सा चिकित्सा विकाराणां या नान्यं समुदीरयेत्" इत्यतः साम्प्रत मुक्तं विवर्ज्जयेदिति। एवञ्च मनाक् पीताम्बुप्रभृतीनां तथा तथानिष्टजनकत्वेना-ननुभवात्तेभ्यः कषायास्ते देया एव इत्यध्यवसितव्यम्॥ ४०॥

मृदाविति। औषधं मुख्यं भेषजम्। शेषमतिरोहितार्थम्। पक्कलक्षणं प्रति मतान्तरमवतारयति दोषेति। दोषलिङ्गानामपाटवमभिसमीक्ष्येति दोषप्रकृतिवैकृत्यात् "प्रकृतिर्योनिलिङ्गे च" तथा "विकृतो व्याधितोऽपटुः" इत्यमरः। आमलक्षणानां पक्कलक्षणप्रतियोगित्वे सत्यपि नहि तावत् पक्कलक्षणेषु मध्ये मृदुज्वरस्य प्रतियोगित्वेन दोषाप्रवृत्तिप्रसक्तिर्[illegible]

हृदयोद्वेष्टनं तन्द्रा लालास्रुतिररोचकः ।
दोषाप्रवृत्तिरालस्यं विबन्धो बहुमूत्रता ॥
गुरूदरत्वमस्वेदो न पक्तिः शकृतोऽच्युतिः ।
स्वापः स्तम्भो गुरुत्वञ्च गात्राणां वह्निमार्दवम् ॥
मुखस्याशुद्धिरग्लानिः प्रसक्तो बलवान् ज्वरः ।
लिङ्गैरेभिर्विजानीयाज्ज्वरमामं विचक्षणः ॥४३॥
सप्तरात्रात् परं केचिन्मन्यन्ते देयमौषधम् ।
दशरात्रात् परं केचिद्दातव्यमिति निश्चिताः ॥
पैत्तिके वा ज्वरे देयमल्पकालसमुत्थिते ।
अचिरज्वरितस्यापि देयं स्याद्दोषपाकतः ॥४४॥

लघुदेहत्वस्य प्रतियोगित्वेन हृदयोद्वेष्टनतन्द्रालस्याग्लानि-गुरूदरत्व-स्वाप-गात्रगुरुत्व-स्तम्भवह्निमार्दवानि प्रचलमलस्य च प्रतियोगित्वेन शेषाणि सर्व्वं-भिषजो विज्ञास्यन्तीति कृत्वा पक्वलक्षणेषूपदिष्टेष्वप्यामलक्षणान्युपदिदिक्षति हृदयेति। अत्र हृदयोद्वेष्टनमिति उरःपर्य्यायोऽयं हृदयशब्दः। "उरस्यपि च वुक्कायां हृदयं मानसेऽपि च" इति हेमः। तथाच हृदयोद्वेष्टनमुरोविबन्धो दोषाच्छन्नतयोरसो वैकृतो भावविशेष इति यावत्। दोषाणां या सम्यक् प्रकर्षेण वृत्ति र्दोषाप्रवृत्ति र्दोषलिङ्गानां यथावत् प्रवणतेति निष्कर्षः। विबन्धो मलमूत्रयोः सावशेषत्वम्। अग्लानिः "ग्लै हर्षक्षये" इति धात्वर्थ-स्मरणाद् आमदोषच्छन्नतयाऽङ्गानां हृष्टता चाकचक्यवत्त्वेति यावत् अदौर्व्वल्यं वा। "ग्लानिस्तु बलदीनता" इति हेमः ॥ ४१-४३ ॥

आपाततो विमतत्वेन प्रतिभातमपि परमतं प्रदर्श्य मानार्थतत्त्वानु-सन्धानात् स्वमतमिवाङ्गीकरिष्यतीति कृत्वा केषाञ्चिन्मतजातमुपन्यस्यति सप्तेति। निश्चितमाचक्षत इति निश्चिता णिच्यचि च रूपं तत्त्वार्थवादिन इत्यर्थः केचिदित्येवं ब्रूयुरिति शेषः। अत्र सप्तरात्राद्दशरात्रात् परमिति सामान्येनोक्त-मपि दोषपाकलिङ्गान्यभिसमीक्ष्येत्यवश्यं विशेषणीयम्, परमतो "देयं स्याद्दोषपाकतः" इत्युक्तः। दृश्यते हि दोषाः पुनर्बलतारतम्येन सप्तरात्राद्दश-

भेषजं ह्यामदोषस्य भूयो ज्वलयति ज्वरम्।
शोधनं शमनीयन्तु करोति विषमज्वरम्॥४५॥

रात्राश्च परमेव प्रायेण विपच्यन्त इति। तदिह कालद्वितयनिरूपणमपि नानुपपन्नम्। पैत्तिके तु ज्वरे संभिन्नेन वमनादिना दोषे निर्हृतेऽभिवृद्धेनाग्निना झटित्यामदोषो निरस्यते, तदिदं साम्प्रतमुक्तं पैत्तिके चेति। नच तावत् समेत्यादिनोक्तौ द्वौ कालाविह विवक्षितौ किन्त्वल्पस्तामदोषत्वमित्येव व्याजेनोपदेष्टुमिदमुच्यते अचिरेति। दोषपाकलिङ्गान्यभिसमीक्ष्येति दोषपाकतः॥४४॥

नन्विह दोषपाकत इत्युक्तं तत्कस्य हेतोरित्याह भेषजमिति। भेषजशब्देनेह "मुख्यभेषजसम्बन्धो निषिद्धस्तरुणे ज्वरे" इति स्मरणात् लङ्घनोष्णोदक स्वेदादीनामामावस्थायामुपयोगदर्शनाच्च विहितेतरत् पाचनशोधनशमनीय—समाख्यमेव प्रत्येतव्यम्, ज्वरिणं विशिनष्टयामदोषस्येति। भूयोऽत्यर्थं ज्वलयत्युद्दीपयति वर्द्धयतीति यावत्। आमाभिवृद्धेर्वेगप्रकर्षं दीर्घकालानुबन्धित्वञ्चापादयत् परतस्तु सन्तापमात्रेणोपशमय्य पौनःपुन्येनावर्त्तयेदिति हृदयम्। अनेनैवाशयेनामावस्थां परिहृत्य भेषजजातं प्रयोक्तुमुपदिदिक्षति भगवानात्रेयः—"पाचनं शमनीयं वा कषायं पाययेद् भिषक्। ज्वरितं षडहेऽतीते लघ्वन्नप्रतिभोजितम्।" इति। शमनाय हितं शमनीयं शोधनशमनसाधारणम्, षडहेत्याद्यं दिनं हित्वेति नेयम् "सप्तरात्रात् परं केचित्" इति प्रागुक्तैकत्वात्। लघ्वन्नप्रतिभोजितम् लघ्वन्नलेशं भोजितम् "सुप् प्रतिना मात्रार्थे" इति पां सू २।१।९ अव्ययीभावः। तेषु च भेषजेषु मध्ये पाचनं नाम सति सामे दोषे प्रयुक्तमपरिणामित्वादामं विवर्द्धयापि क्षातिविलम्बितं स्वगुणबलोत्कर्षात् परिणम्यमानं सदाममपि पचत्यनायासेनेति तद्धित्वा शेषयोर्द्वयोरेव विषमज्वरजनकत्वञ्चाचष्टे शोधनमिति। शोधनं वमनादिकम्। इदमत्राकूतम्—सत्यामान्वये प्रयुक्तं संसिद्धं ज्वरघ्नं शोधनं परिकरबन्धेन शरीरमिदं प्रपीड्यापि न सम्यङ्निर्हर्त्तुमीष्टे, ईष्टे चाग्नेर्मन्दत्वादिकमापादयितुम्। आम्नायते चात्रेयेण "सर्व्वदेहानुगाः सामा धातुस्थादुर्व्विनिर्हराः। दोषाः फलेभ्य आमेभ्यः स्वरसा इव सात्ययाः" इति। शमनीयमपि तथा प्रयुक्तं प्रभावात् प्रागुक्तशोधनवत् ज्वरमुपशमय्यापरिणामित्वादामाभिवृद्धये प्रभवतीति तदात्वेऽग्नेर्मन्दत्वादपरिणतेनाभ्यवहृतेनाहारजातेन प्रवृद्धो

च्यवमानं ज्वरोत्क्लिष्टमुपेक्षेत मलं सदा ।
अतिप्रवर्त्तमानञ्च साधयेदतिसारवत् ॥
यदाकोष्ठानुगाः पक्वा विबद्धाः स्रोतसां मलाः ।
अचिरज्वरितस्यापि तदा दद्याद्विरेचनम् ॥
पक्वोह्यनिर्हृतो दोषो देहे तिष्ठन् महात्ययम् ।
विषमं वा ज्वरं कुर्य्याद् बलव्यापदमेव च ॥
तस्मान्निर्हरणं कार्य्यं दोषाणां वमनादिभिः ॥४६॥

दोषो यं ज्वरं जनयति स एव "दोषोऽल्पोऽहितसम्भृतः" इत्यतिक्रान्तावेक्षणात् विषमज्वर उच्यते, इत्युपपन्नं भवति करोति विषमज्वरमिति पारम्पर्य्येणेति नेयम् ॥४५॥

न तावच्छोधनदोषानमुसन्धाय, ज्वरोत्तप्तत्वेन द्रवीभूय प्रवर्त्तमानं पुरीषं पुनः कथमपि प्रतिकर्त्तव्य-मित्याह च्यवमान मिति । उपेक्षेत प्रतीकारं प्रत्युदासीत, मलच्यवनं तद्द्वारीकृत्य ज्वरमपि समूलघातमुपहन्तुमिति हृदयम् । अथ चेन् मलच्यवनात्तस्मादात्ययिकं बलक्षयमाशङ्केत तर्हि तामाशङ्का-मपनेतुमिदमुच्यते अतीति । विषमज्वरजनकत्वेन न्यक्कृतमपि शोधनं क्वचिद्ग्राह्य-मित्यभिधत्ते यदेति । विरेचनशब्देनेह शोधनसामान्यं मलशब्देन च समूत्रपुरीषा स्त्रयो दोषा एवाभिप्रेयन्त इति निश्चीयते, वक्ष्यति हि "तस्मान्निर्हरणं कार्य्यं दोषाणां वमनादिभिः" इति कोष्ठानुगा आमाशयादाववस्थिताः, स्रोतसां तत्तत्-कोष्ठाश्रितानामित्येव, विबद्धा इति तत्करोतीति णिच्चि च नेयम्, निरोधकारिण इत्यर्थः अथ चेत् स्रोतसामिति शेषे षष्ठी तर्हि स्रोतःसंश्रितत्वेन विबद्धा मला इत्यर्थनिष्कर्षः । अपिना चिरज्वरितस्य का कथेत्याविष्क्रियते, एवञ्च विधिरयं चिराचिरज्वरितविषय इत्युन्नेयम् । अत्र हेतुः पक्व इति । इदमत्रावधेयं पुरीषादयो मलाश्चेदवरुध्यन्ते तर्हि तत्र पुरीषं मूत्रं पित्तश्लेष्माणौच स्वं स्वं विकृतं रसं उपश्लेषन्यायेन तानि तानि स्रोतांस्यनुप्रविश्य शोणितं दूषयन्ति वातञ्चा-श्वापनादिना प्रपीडयति, यतोयतः शरीरमिदं पञ्चभूतावशेषत्वेनापि पर्य्यवस्यति ; यदा तु मलास्ते गन्धमात्रेण विकुर्व्वन्ति तदात्वे मिथ्याहारविहार-मभ्यस्यतामसंशयं विषमज्वरमभिनिर्व्वर्त्तयन्ति, आमनन्ति हि "दोषोऽल्पोऽहित-

प्राक्कर्म्म वमनश्चास्य कार्य्यमास्थापनं तथा ॥
विरेचनं तथा कुर्य्याच्छिरसश्च विरेचनम्।
क्रमेण बलिने देयं वमनं श्लैष्मिके ज्वरे ॥
पित्तप्राये विरेकस्तु कार्य्यः प्रशिथिलाशये।
सरुजेऽनिलजे कार्य्यं सोदावर्त्ते निरूहणम् ॥
कटीपृष्ठग्रहार्त्तस्य दीप्ताग्नेरनुवासनम्।
शिरोगौरवशूलघ्नमिन्द्रियप्रतिबोधनम् ॥
कफाभिपन्ने शिरसि कार्य्यं मूर्द्धविरेचनम्।
दुर्ब्बलस्य समाध्मातमुदरं सरुजं दिहेत् ॥
दारुहैमवतीकुष्ठ-शताह्वाहिङ्गुसैन्धवैः।
अम्लपिष्टैः सुखोष्णैश्च पवने तूर्द्ध्वमागते ॥
रुद्धमूत्रपुरीषाय गुदे वर्त्तिं निधापयेत् ॥४७॥

सम्भूतः" इत्युपक्रम्य "करोति विषमज्वरम्" इति, ओजसो व्यापत्तिश्च मातुर्य्यैरेभिः सह जायत इत्यभ्युपगच्छेम, जायते हि सहैव आचरति वा सहज इव, अमुमेवार्थं मभिधातुं बलव्यापदमेवचेत्येवकारं प्रायुङ्क्तेत्युपपन्नं भवति अष्टात्ययं विषमज्वरं बलव्यापदश्च करोतीति, अत्र दोषत्वसामान्याद्दोष इत्येकवचनं, वा शब्दः पक्षान्तरसूचनार्थः, ओजःपर्य्यायश्चायं बलशब्दः, "त्रयोदोषा बलस्योक्ताः" इति सू० १५ अ०, निगमयति तस्मादिति ॥ ४६ ॥

प्रयोगसौकर्य्यार्थं सूक्तार्थविशदत्वाय च परः प्रयत्न आरभ्यते प्रागिति। क्रमेणेति प्रकर्षेणानवबद्धमलत्वेन श्लथतयाऽनुभूत आशयोऽस्येति प्रशिथिलाशयः, तथाविधे श्लैष्मिके ज्वरे वमनम्, पित्तप्राये तु विरेचनमिति योजना। उदावर्त्तोनाम व्याधिः परमतः '५५ अ०' निवेदयिष्यते। निरूहणमास्थापनमित्यनर्थान्तरम्। मूर्द्धविरेचनं सू० ३९, चि० ४० अ० अनुसन्धेयम्। दार्व्वित्यादि। हैमवती वचा, अम्लशब्देनेह काञ्जिकं मातुलुङ्गाभिनन्दन्ति कुशलाः। वर्त्तिः उ० ५५अ० द्रष्टव्या ॥ ४७ ॥

पिप्पलीपिप्पलीमूल यमानीचव्यसाधिताम् ॥
पाययेत यवागूं वा मारुताद्यनुलोमनीम् ॥४८॥
शुद्धस्योभयतो यस्य ज्वरः शान्तिं न गच्छति ।
सशेषदोषरूक्षस्य तस्य तं सर्पिषा जयेत् ॥
कृशस्यैवाल्पदोषस्य शमनीयैरुपाचरेत् ।
उपवासैर्बलस्थन्तु ज्वरे सन्तर्पणोत्थिते ॥
क्लिन्नां यवागूं मन्दाग्निं तृषार्त्तं पाययेन्नरम् ॥४९॥
तृट्छर्द्दिदाहघर्म्मार्त्तं मद्यपं लाजतर्पणम् ॥
सक्षौद्रमम्भसा पश्चाज्जीर्णे यूषरसौदनम् ॥५०॥
उपवासश्रमकृते क्षीणे वाताधिके ज्वरे ।
दीप्ताग्निं भोजयेत् प्राज्ञो नरं मांसरसौदनम् ॥
मुद्गयूषौदनश्चापि हितं कफसमुत्थिते ।
स एव सितया युक्तः शीतः पित्तज्वरे हितः ॥
दाड़िमामलमुद्गानां यूषश्चानिलपैत्तिके ।
ह्रस्वमूलकयूषेण भोजयेत् कफवातिके ॥
पटोलनिम्बयूषस्तु पथ्यः पित्तकफात्मके ॥
दाहच्छर्द्दियुतं क्षामं निरन्नं तृष्णयार्द्दितम् ।
सिताक्षौद्रयुतं लाजतर्पणं पाययेत च ॥

कर्म्मणैतेनोपशान्तेषु तेषु तेषु वातविकारेषु किं नामाहारमुपदिशन्तीत्याह पिप्पलीति । साधितां षड़ङ्गपरिभाषाश्रुतेन जलेनेति ज्ञेयम् । शुद्धस्येति । सर्पिषा वक्ष्यमाणेन कल्याणकादिना । सम्प्रत्यवसरवशात् "प्रथमरूपेषु हित-मिकान्तेनापतर्पणम्" इत्यस्यापवादमाह कृशमिति । शमनीयै रेवोपाचरे-दित्यन्वयः । तृड़िति पयसा लाजतर्पणं जलमिश्रैर्लाजधान्यभि सृसिजन्नम् ।

कफपित्तपरीतस्य ग्रीष्मेऽस्रक्पित्तिनस्तथा।
मद्यनित्यस्य न हिता यवागूस्तमुपाचरेत्।
यूषैरम्लैरनम्लैर्वा जाङ्गलैर्वा रसैर्हितैः॥
मद्यं पुराणं मन्दाग्नेर्यवान्नोपहितं हितम्।
सव्योषं वितरेत् तक्रं कफारोचकपीड़िते॥
क्रशोऽल्पदोषो दीनश्च नरो जीर्णज्वरार्द्दितः।
विबद्धः सृष्टदोषश्च रूक्षः पित्तानिलज्वरी॥
पिपासार्त्तः सदाहो वा पयसा स सुखी भवेत्॥
तदेव तु पयः पीतं तरुणे हन्ति मानवम्॥ ५१॥
सर्व्वज्वरेषु सप्ताहं मात्रावद्भोजनं हितम्।
वेगापायेऽन्यथा तद्धि ज्वरवेगाभिवर्द्धनम्॥ ५२॥
ज्वरितो हितमश्नीयाद्यद्यप्यस्यारुचिर्भवेत्।
अन्नकाले ह्यभुञ्जानः क्षीयते म्रियतेऽथवा॥
गुर्व्वभिष्यन्द्यकाले च ज्वरी नाद्यात् कथञ्चन।
न तु तस्याहितं भुक्तमायुषे वा सुखाय वा॥

उपवासेति। अत्र क्षीणे वाताधिके ज्वरे मांसरसौदनविधानादक्षीणे तु तस्मिन् लाजमण्डादिकमेव देयमित्युपदेशः॥ ४८—५१॥

नन्विदमुक्तं "प्रव्यक्तरूपेषु हित मेकान्तेनापतर्पणम्" इति, अथ चेत्तत्र तीव्रा बुभुक्षा जायेत तर्हि का गतिरित्याह सर्व्वेति। मात्रा लेश इति पर्य्यायौ, तामर्हतीति मात्रावत् "तदर्हम्" इति ५।१।११७ पां सूं वतिः, वेगापाये वेगक्षये। सति हि वेगे नाग्निर्यथास्थानं तिष्ठतीत्यभिसन्धिः। ५२॥

ज्वरित इति। हितमश्नीयात् कल्पनाविशेषेण रुच्यं कृत्वेति शेषम्, वदन्ति हि "पथ्यं द्वेष्यत्व मागतम्। कल्पनाविधिभि स्तै स्तैः प्रियत्वं गमयेत् पुनः" इति। अत्रापिना सत्यामपि रुचौ का कथेति सूचयाम्बभूव।

सततं विषमं वापि क्षीणस्य सुचिरोत्थितम् ।
ज्वरं सम्भोजनैः पथ्यैर्लघुभिः समुपाचरेत् ॥
मुद्गान् मसूरांश्चणकान् कुलत्थान् समुकुष्टकान् ।
आहारकाले यूषार्थं ज्वरिताय प्रदापयेत् ॥
लावान् कपिञ्जलानेणान् पृषताञ्छरभाञ्छशान् ।
कालपुच्छान् कुरङ्गांश्च तथैव मृगमातृकान् ॥
मांसार्थे मांससात्म्यानां ज्वरितानां प्रदापयेत् ॥
सारसक्रौञ्चशिखिनः कुक्कुटांस्तित्तिरींस्तथा ।
गुरूष्णत्वान्न शंसन्ति ज्वरे केचिच्चिकित्सकाः ॥
ज्वरितानां प्रकोपन्तु यदा याति समीरणः ॥
तदैतेऽपि हि शस्यन्ते मात्राकालोपपादिताः ॥
परिषेकावगाहांश्च स्नेहान् संशोधनानि च ।
स्नानाभ्यङ्ग-दिवास्वप्नशीतव्यायामयोषितः ।
न भजेत ज्वरोत्सृष्टो यावन्नो बलवान् भवेत् ॥ ५२ ॥

अहितेषु च मध्ये गुर्व्वभिष्यन्दीनि अकाले च हितसमाख्यातान्यप्येकान्ततोऽहितानीति मन्वानः सर्व्वथा तानि निरुणद्धि गुर्व्विति। सततमिति, अत्र विषमशब्देनैव सततस्योपलम्भेऽपि पृथगुपादानं विधेरस्य विशेषेणैतद्विषयत्वमाख्यातुम्। मुद्गानिति। मुकुष्टको वनमुद्गः। लावो नाम पक्षी "लाघोया" इति परिचीयते। कपिञ्जलः गौरतित्तिरिः, एणः कृष्णमृगः; पृषतस्तु शुभ्रविन्दुमान् मृगविशेषः, शरभः "ऊर्द्धपादूर्द्धनयन ऊर्द्धपादचतुष्टयः" इत्युक्तो मृगभेदः, कालपुच्छो यथाश्रुतो मृगविशेषः, कुरङ्ग ईषत्ताम्रो हरिणविशेषः, क्षुद्रो मृगो मृगमातृकः अत्र मातृशब्दोऽल्पार्थः, तद्धितचानल्पार्थः, क्रौञ्चो वकभेदः। परिषेकेति। अवगाहो नद्यादौ निमज्ज्य स्नानं, स्नानमिव उद्धृतजलेनेत्यनयोर्विशेषः ॥ ५२ ॥

त्यक्तस्यापि ज्वरेणाशु दुर्ब्बलस्याहितैर्ज्वरः।
प्रत्यापन्नो दहेद्देहं शुष्कं वृक्षमिवानलः॥
तस्मात् कार्य्यः परीहारो ज्वरमुक्तैर्व्विरिक्तवत्।
यावन्न प्रकृतिस्थः स्याद्दोषतः प्राणत स्तथा॥
ज्वरे प्रमोहो भवति स्वल्पैरप्यपचेष्टितैः।
निषन्नं भोजयेत्तस्मान्मूत्रोच्चारौच कारयेत्॥
अरोचके गात्रसादे वैवर्ण्येऽङ्गमलादिषु।
शान्तज्वरोऽपि शोध्यः स्यादनुबन्धभयान्नरः॥ ५४॥
न जातु तर्पयेत् प्राज्ञः सहसा ज्वर कर्शितम्।
तेन सन्दूषितो ह्यस्य पुनरेव भवेज्ज्वरः॥

त्यक्तस्येति। प्रत्यापन्नः पुनरावृत्तः, परीहारः परित्यागः परिषेकादीना मित्येव। अत्र विरिक्तवदित्यनेन 'चि० ३९ अ०' उक्तोविधिरतिदिश्यते। पुस्तकान्तरे पुनः "परिषेकावगाहांश्च स्नेहान् संशोधनानि च" इत्यतः परम्—

"कषायगुरुरूक्षाणि क्रोधादीनि तथैव च।
सारवन्ति च भोज्यानि वर्जयेत्तरुणज्वरी।
तथैव नवधान्यादिं वर्जयेच्च समासतः।
अनवस्थित दोषाग्ने रेभिः सन्धुक्षितोज्वरः।
गम्भीर तीक्ष्णवेगत्वं यात्यसाध्यत्व मेव च।
शीततोय दिवास्वप्न क्रोधव्यायाम योषितः।"
इत्येवमधिकं दृश्यते।

ज्वर इति। अपचेष्टितै दोषबलाबलादीननपेक्ष्य कृतः काय-कृतै र्व्यापारैः। निषन्नः शय्यासनादावुपविष्टः। विशेषणमिदं दुर्ब्बलस्य प्रमोहाशङ्कानिरासार्थं, तथा च यस्य प्रमोह आशङ्क्येत तं पुनः शयान-मेव भोजयेत् मूत्रोच्चारौ कारयेच्चेत्यूह्यम्। अरोचक इति वैवर्ण्यं असञ्जात-संजिवर्णत्वे। ५४॥

न जात्विति अत्र ज्वर इति सामान्येनोक्तोऽपि प्रशान्त इत्यर्थोऽवगम्यते

चिकित्सेच्च ज्वरान् सर्व्वान् निमित्तानां विपर्य्ययैः ।
श्रमक्षयाभिघातोत्थे मूलव्याधिमुपाचरेत् ॥ ५५ ॥
स्त्रीणामपप्रजातानां स्तन्यावतरणे च यः ।
तत्र संशमनं कुर्य्याद् यथादोषं विधानवित् ॥ ५६ ॥

पुनरित्युपादानात्, सन्धुक्षित आमाभिहतया सन्दीपितो ऽवाप्तवेग इति यावत्, नन्वेवंप्राप्ते जिज्ञास्यमेकमापन्नं यदि हि सहसा प्रयुक्तं तर्पणं प्रशान्तमपि ज्वरं पुनः सन्दीपयितु मर्हति कथं तर्हि श्रमादिसमुत्थे ज्वरे तर्पण मुपदिश्यते "श्रमक्षये च भुञ्जीत घृताभ्यक्तो रसौदनम्" इति, न हि यदिन्धनं प्रशान्त-मग्निं सन्दीपयितु मर्हति तदेव पुनः प्रदीप्तमग्निं निर्व्वापयतीति वक्तुं न्याय्य-मित्येवं विवक्षुनपाकरोति चिकित्सेदिति । एव शब्दस्थानाधिस्थाना-धिष्ठानोऽयं चशब्दो भिन्नक्रम उपदिश्यते, निमित्तानां विपर्य्ययै रेव चिकित्सेदित्यर्थः । एवञ्च श्रमक्षयाभिघातोत्थे "श्रमक्षयाभिघातेभ्यो देहिनां कुपितोऽनिलः । पूरयित्वाखिलं देहं ज्वर मापादयेद् भृशम्" इत्यतिक्रान्ता-वेक्षणात् विप्रकृष्ट कारणत्वेनोपालब्धेभ्यः श्रमादिभ्यः सञ्जाते ज्वरे मूलव्याधिं "विकारो धातु वैषम्यम्" इति स्मरणाद्, व्याधे र्ज्वरस्य मूलं मूलव्याधिस्तमिति व्युत्पत्तेर्व्वा कुपितं वातमुपाचरेत्, "यात्युदीर्णं शमयति नान्यं व्याधिं करोति च । सा क्रिया" इति 'सू २५ अ' उपदेशात् वातप्रत्यनीकत्वेन घृताभ्यञ्जन-रसौदनादिभि स्तै स्तै स्तर्पणै र्यथामदोषादयो नाभिवर्द्धन्ते तथा चिकित्से-दिति तात्पर्य्यम् । सामे हि लङ्घनमेव निरदिक्षत् पौनःपुन्येन । केचि-दत्रेदानीं सङ्क्षेपतः सर्व्वज्वरचिकित्सा माहेत्युपक्रम्याप्रासङ्गिकत्वं दृषणाय मन्यमानाः श्रमक्षयाभिघातोत्थइत्यादेः श्रमादिभिर्व्वातकोपनै रित्यर्थ इत्येवं सीधुपानविजृम्भिताज्ञानाजीर्णमुद्गीरयन्तः प्रमत्तगीतं गायन्तीति सुधीभि-रध्यवसेयम् ॥ ५५ ॥

स्त्रीणामिति । प्रजातं गर्भमोचनमस्या अस्तीति प्रजाता, अकारो मत्वर्थीयः, अपप्रजातानां विकृतप्रसूतानां, अकालजननीनां मूढगर्भजननी-नाञ्चेति निष्कर्षः । स्तन्यावतरणे यथावत् प्रजातानां स्तन्याभिनिर्व्वर्त्तने ॥ ५६ ॥

अतः संशमनीयानि कषायाणि निबोध मे ।
सर्व्वं ज्वरेषु देयानि यानि वैद्येन जानता ॥
पिप्पली सारिवा द्राक्षाशतपुष्पा हरेणुभिः ।
कृतः कषायः सगुड़ो हन्याच्छ्वसनजं ज्वरम् ॥
शृतं शीतकषायं वा गुड़ूच्याः पेयमेवतु ॥
बलादर्भश्वदंष्ट्राणां कषायं पादशेषितम् ।
शर्करा-घृतसंयुक्तं पिबेद्वातज्वरापहम् ॥
शतपुष्पावचाकुष्ठदेवदारुहरेणुकाः ।
कुस्तुम्बुरूणि नलदं मुस्तं चैवाप्सु साधयेत् ।
क्षौद्रेण सितया चापि युक्तः क्वाथोऽनिलात्मके ॥
द्राक्षा गुड़ुची काश्मर्य्य त्रायमाणाः सशारिवाः ।
निःक्वाथ्य सगुड़ं क्वाथं पिबेद्वातकृते ज्वरे ॥
गुड़ूच्याः स्वरसो ग्राह्यः शतावर्य्याश्चतत्समः ।
निहन्यात् सगुड़ःपीतः सद्योऽनिलकृतं ज्वरम् ॥
घृताभ्यङ्गस्वेदलेपानवस्थासु च योजयेत् ॥ ५७
श्रीपर्णी चन्दनोशीर परूषक मधूकजः ।
शर्करामधुरो हन्ति कषायः पैत्तिकं ज्वरम् ॥

अत इत्यादि हरेणुः रेणुका । शतपुष्पेत्यादि कुस्तुम्बुरु धन्याकं, नलदमुशीरम्। चाप्स्विति पाठे तु चाप्स्विति स्वन्यर्थः। चाप्स्वेव सद्यःफलत्वेन संशय मपहृत्य झटित्येव, साधयेत् कषायविधिनेति शेषः। घृतेतयादि। अवावस्थास्विति विशेषणात् रूक्षत्वे पुरातनघृताभ्यङ्गः, शीतानुसङ्गित्वे स्वेदः, तथा "दाहकृत् तेजसा युक्तः शीतकृत् सोमसंश्रयात्" इतयात्रेयानुशासनात् पित्तश्लेषानुबन्धित्वेन दाहशीते जाते यथायोगं शीतोष्णान् लेपान योजयेदिति योजना ॥ ५७ ॥

श्रीपर्णीतयादि। श्रीपर्णी मणिकारिका, सारिवाद्यं स १८ शं सारिवादि-

पीतं पित्तज्वरं हन्यात् सारिवाद्यं सशर्करम् ।
सयष्टीमधुकं हन्यात्तथैवोत्पलपूर्व्वकम् ॥
शृतं शीतकषायं वा सोत्पलं शर्करायुतम् ।
गुडूची पद्मरोध्राणां सारिवोत्पलयोस्तथा ।
शर्करामधुरः क्वाथः शीतः पित्तज्वरापहः ॥
द्राक्षारग्वधयोश्चापि काश्मर्य्यस्याथवा पुनः ॥
स्वादुतिक्तकषायाणां कषायैः शर्करायुतैः ।
सुशीतैः शमयेत्तृष्णां प्रवृद्धां दाहमेव च ॥
शीतं मधुयुतं तोयमाकण्ठाद्वापिपासितम् ।
वामयेत् पाययित्वा तु तेन तृष्णा प्रशाम्यति ॥ ५८
क्षीरैः क्षीरिकषायैश्च सुशीतैश्चन्दनायतैः ।
अन्तर्दाहे विधातव्यमेतैश्चान्यैश्च शीतलैः ॥
निदध्यादप्सु चालोड्य निशापर्य्युषितं ततः ।
क्षौद्रेण युक्तं पिवतो ज्वर-दाहौ प्रशाम्यतः ॥
पद्मकं मधुकं द्राक्षां पुण्डरीकमथोत्पलम् ।
यवान् भृष्टानुशीराणि समङ्गां काश्मरीफलम् ।
जिह्वा-तालु-गल-क्लोम-शोषे मूर्द्ध्नि च दापयेत् ॥

गणोक्तो द्रव्यनिचयः । स्वाद्विति । स्वादुतिक्तकषायाणां 'सू ४२ अं यथालाभमुपदिष्ट-मधुर-तिक्त-कषाय-वर्गाभिहितानां द्रव्याणाम् । शीतमिति वामयेत् मदनफलादि वमन द्रव्यसंश्रयेणेतत्रभिसन्धिः ॥ ५८ ॥

क्षीरै रिति । क्षीरिणो वटादयः । चन्दनायतैः घृष्टश्वेतचन्दनबहुलैः विधातव्यं विधानम् । परीषेकावगाहादिकं कार्य्य मित्याकूतम् । न तावदेतेषामेतावदेव विधानमित्याह निदध्यादिति निदध्यात् स्थापयेच्च सन्निहितत्वात् क्षीरादीनीति ज्ञेयम् । तत इति द्वितीयान्तात् सार्व्वविभक्तिक स्तसिल् निहितं

केशरं मातुलुङ्गस्य मधुसैन्धव संयुतम्।
शर्करा दाड़िमाभ्यां वा द्राक्षा-खर्ज्जूरयोस्तथा।
वैरस्ये धारयेत् कल्कं गण्डूषञ्च तथा हितम्॥ ५८
सप्तच्छदं गुड़ूचीञ्च निम्बं स्फूर्ज्जक मेव च।
क्काथयित्वा पिबेत् क्काथं सक्षौद्रं कफजे ज्वरे॥
कटुत्रिकं नागपुष्पं हरिद्रा कटुरोहिणी।
कौटजञ्च फलं हन्यात् सेव्यमानं कफ ज्वरम्॥
हरिद्रां चित्रकं निम्बमुशीरातिविषे वचाम्।
कुष्ठ मिन्द्रयवान् मूर्व्वां पटोलञ्चापि साधितम्।
पिबेन्मरिच संयुक्तं सक्षौद्रं कफजे ज्वरे॥
सारिवातिविषाकुष्ठपुराख्यैः सदुरालभैः।
मुस्तेन च कृतः क्काथः पीतो हन्यात् कफज्वरम्॥
मुस्तंवृक्षकबीजानि त्रिफला कटुरोहिणी।
परूषकाणि च क्काथः कफज्वरविनाशनः॥
राजवृक्षादिवर्गस्य कषायं मधुसंयुतम्।
कफवातज्वरं हन्यात्क्षिप्रं कालेऽवचारितम्॥
नागरं धान्यकं भार्गीमभयां सुरदारु च।
वचां पर्पटकं मुस्तां भूतीकमथ कट्फलम्।
निःक्काथ्य कफवातोत्थे क्षौद्रहिङ्गु-समन्वितम्।
पातव्यं श्वासकासघ्नं श्लेष्मोत्सेके गलग्रहे।
हिक्कासु कण्ठश्वयथौ शूले हृदयपार्श्वजे॥

तदित्यर्थः। अत्र "नपुंसकमनपुंसकेन" इति पां सू १।२।६९ एकत्वं क्लीवत्वञ्चेत्युन्नेयम्।
केशरमिति। कश्चित्तु पूर्व्वस्मात्प्रकारमाकृष्याद्वश्लोकमिमं पूर्व्वेणैव सम्बध्नाति॥५८॥
सप्तच्छद मिति। पुराख्यो गुग्गुलुः। राजेति। राजवृक्षादिः सू ३८ अं

बलापटोलत्रिफलायष्ट्याह्वानां वृषस्य च ।
क्वाथो मधुयुतः पीतो हन्ति पित्तकफज्वरम् ॥
कटुका विजया-द्राक्षा-मुस्त पर्पटकैः कृतः ।
कषायो नाशयेत् पीतः श्लेष्मपित्तभवं ज्वरम् ॥
भार्गीवचापर्पटकधान्यहिङ्गुभयाघनैः ।
काश्मर्य्यनागरैः क्वाथः सक्षौद्रः श्लेष्मपित्तजे ॥
सशर्करामक्षमात्रां कटुकामुष्णवारिणा ।
पीत्वा ज्वरं जयेद् जन्तुः कफपित्तसमुद्भवम् ॥
किराततिक्तममृतां द्राक्षा मामलकं शटीम् ।
निःक्वाथ्य वातपित्तोत्थे तं क्वाथं सगुड़ं पिबेत् ।
रास्नावृषोत्थ त्रिफलाराजवृक्षफलैः सह ।
कषायः साधितः पीतो वातपित्तज्वरं जयेत् ॥
सर्व्वदोषसमुत्थेतु संसृष्टानवचारयेत् ।
यथादोषोच्छ्रयं चापि ज्वरान्सर्व्वानुपाचरेत् ॥ ६० ॥
ह्रस्वीरबिल्ववर्षाभ्वः पयश्चोदकमेव च ।
पचेत् क्षीरावशिष्टन्तु तद्धि सर्व्वज्वरापहम् ॥
उदकांशा स्त्रयः क्षीरं शिंशपासारसंयुतम् ।
तत् क्षीरशेषं क्वथितं पेयं सर्व्वज्वरापहम्
नलवेतसयोर्मूले मूर्व्वायां देवदारुणि ।
कषायं विधिवत् कृत्वा पेयमेतज्ज्वरापहम् ॥

उष्ण मारग्वधादिः । काले मपास्तामाम्बये । बलापटोलेत्यादौ एलापटोलेत्यपि पाठः । कटुकेति । विजयात्र जयन्ती ॥ ६० ॥

ह्रस्वीरेति । अत्र "द्रव्यादष्टगुणं क्षीरं क्षीरात्तोयं चतुर्गुणम् । क्षीरावशेषः कर्त्तव्यः" इति मन्तव्यम् । ह्रस्वीरोनामौषधिः "लताविशालि" इति

त्रैफलो वा ससर्पिष्कः क्वाथः पेयस्त्रिदोषजे ॥
अनन्तां बालकं मुस्तां नागरं कटुरोहिणीम्।
सुखाम्बुना प्रागुदयात् पाययेताक्षसम्मितम् ॥
एष सर्व्वज्वरान् हन्ति दीपयत्याशु चानलम् ॥
द्रव्याणि दीपनीयानि तथा वैरेचनानि च।
एकशो वा द्विशो वापि ज्वरघ्नानि प्रयोजयेत् ॥
सर्पिर्मध्वभयातैल-लेहोऽयं सर्व्वजं ज्वरम्।
शान्तिं नयेत् चिरस्थापि सक्षौद्रा प्रबलं ज्वरम् ॥
ज्वरे तु विषमे कार्य्यमूर्द्ध्वाधश्च शोधनम्।
घृतं शीरोदरोक्तं वा निहन्याद्विषमज्वरम्।
गुड़प्रगाढ़ां त्रिफलां पिबेद्वा विषमार्द्दितः ॥
गुडूचीनिम्बधात्रीणां कषायं वा समाक्षिकम्।
प्रातः प्रातः ससर्पिष्कं रसोनमुपयोजयेत् ॥
त्रिचतुर्भिः पचेत् क्वाथं पञ्चभिर्वा समन्वितैः।
मधुकस्य पटोलस्य रोहिण्या मुस्तकस्य च।
हरीतक्याश्च कर्व्वोऽयं त्रिविधो योग इष्यते ॥
सर्पिःक्षीरसिताक्षौद्र-मागधीर्वा यथाबलम्।
दशमूलीकषायेण मागधीर्वा प्रयोजयेत् ॥

परिक्षीयते। शिंशपा च "शिंशु" इति। नलेति। त्रि-चतुर्भिरिति। मधुकादीनां पञ्चानां समन्वितैः त्रिभिश्चतुर्भिः पञ्चभिर्व्वा क्वाथं पचेद् विषमज्वरान् प्रतीकर्त्तुं मित्यभिसन्धिः। क्वाथ मिमं स्तौति कर्व्व इति। त्रिविधोऽयं योगः क्वाथरूपः कर्व्वति गर्व्वतीति कर्व्वः स्वगुणगौरवादन्येषां विषमज्वर-

पिप्पलीवर्द्धमानं वा पिबेत् क्षीररसाशनः ।
ताम्रचूड़स्य मांसेन पिबेद्वा मद्यमुत्तमम् ॥
कोलाग्निमन्थत्रिफलाक्वाथे दध्ना घृतं पचेत् ।
तिल्वकावापमेतद्धि विषमज्वरनाशनम् ॥
पिप्पल्यतिविषाद्राक्षा-सारिवाबिल्वचन्दनैः ।
कटुकेन्द्रयवोशीर-सिंहीतामलकीघनैः ॥
त्रायमाणास्थिराधात्री-विश्वभेषजचित्रकैः ।
पक्वमेतैर्घृतं पीतं विजित्य विषमाग्निताम् ॥
जीर्णज्वरशिरःशूल-गुल्मोदरहलीमकम् ।
क्षयकासं ससन्तापं पार्श्वशूलानपास्यति ॥
गुडूचीत्रिफलावासा-त्रायमाणायवासकैः ।
क्वथितैर्विधिवत् पक्वमेतैः कल्कीकृतैः समैः ॥
द्राक्षामागधिकाम्भोद-नागरोत्पलचन्दनैः ।
पीतं सर्पिः क्षयश्वास-कासाजीर्णज्वरान् जयेत् ॥
कलशीबृहतीद्राक्षा-त्रायन्ती निम्बगोक्षुरैः ।
बलापर्पटकाम्भोद-शालपर्णीयवासकैः ॥
पक्वमुत्क्वथितैः सर्पिः कल्कैरेभिः समन्वितैः ॥
शठीतामलकीभार्गी-मेदाकतकपौष्करैः ॥
क्षीरद्विगुणसंयुक्तं जीर्णज्वरमपोहति ।
शिरःपार्श्वरुजाकास-क्षयप्रशमनं परम् ॥

भेषजानामवश्याकारकः इति यावत् । पिप्पलीवर्द्धमानं नाम क्रमाभिवृद्धा पिप्पली तदुपयोगप्रकारश्च चिं ५ अं सूचयाम्बभूव । अत्र क्षीररसाशन इत्युपदेशे सत्यपि क्षीरप्रधानमेवाशन मभिनन्दन्ति कुशलाः ।

पटोलीपर्पटारिष्ट-गुडूचीत्रिफलाह्वयैः ।
कटुकाम्बुदभूनिम्ब-यासषष्ट्याह्वचन्दनैः ।
दार्व्वीशक्रयवोशीर-त्रायमाणाकणोत्पलैः ॥
धात्रीभृङ्गरजोभीरु-काकमाचीरसैर्घृतम् ॥
सिद्धमाश्वपचीकुष्ठ-ज्वरशुक्रार्ब्बुदव्रणान् ।
हन्यान्नयनवदनकर्णजान् घ्राणजान् गदान् ॥
विडङ्गत्रिफलामुस्त-मञ्जिष्ठादाडिमोत्पलैः
प्रियङ्गैलैलवालुक-चन्दनामरदारुभिः ॥
बर्हिष्ठकुष्ठरजनी-पर्णिनीसारिवाद्वयैः ।
हरेणुकात्रिवृद्दन्ती-वचातालीशकेशरैः ॥
द्विक्षीरं विपचेत् सर्पिर्मालतीकुसुमैः सह ।
विषमज्वरकश्वास-गुल्मोन्मादगरापहम् ॥
एतत् कल्याणकं नाम सर्पिर्माङ्गल्यमुत्तमम् ।
बलश्रीयशश्चक्षोऽग्नि-मान्द्यापस्मारपापनुत् ॥
शस्यते नष्टशुक्राणां वन्ध्यानां गर्भदं परम् ।
मेध्यं चक्षुष्यमायुष्यं रेतोमार्गरुजापहम् ॥ ६१ ॥
एतैरेव यथाद्रव्यैः सर्व्वगन्धैश्च साधितम् ।
कपिलाया घृतप्रस्थं सुवर्णमणिसंयुतम् ॥
तत्क्षीरेण सहैकध्यं प्रसाध्य कुसुमैरिमैः ।
सुमनश्चम्पकाशोक-शिरीषकुसुमैर्घृतम् ॥

पटोलीति । स्वल्पः पटोलः पटोली तिक्तपटोल इति यावत् । त्रिडङ्गेति । बर्हिष्ठं ह्रीवेरं पर्णिन्यश्चतस्रः । दुःसाध्यत्वेन कुत्सितो विषमज्वरो विषमज्वरकः ॥ ६१ ॥

एतैरिति । नेह सादृश्यार्थोऽयं यथाशब्दः, तथात्वे हि यथासाधितं

तथा नलदपद्मानां केशरैर्दाड़िमस्य च ॥
तिथौ प्रशस्ते नक्षत्रे साधकस्यातुरस्य च ।
कृतं मनुष्यदेवाय ब्राह्मणैरभिमन्त्रितम् ॥
इदं सर्व्वज्वरान् हन्ति महाकल्याणकं घृतम् ।
दर्शनस्पर्शनाभ्यान्तु सर्व्वरोगहरं शिवम् ॥

तथैव प्रसाध्येति व्याख्येयं भवति तत्तु नोपपद्यते प्राक् कपिलाया घृत-प्रस्थस्यास्य साधनप्रकारानुपदेशात्। यथाद्रव्यैरिति यथाश्रुतेऽव्ययीभावे च द्रव्याख्यनतिक्रान्तै रेतै विड़ङ्गादिभि रित्येवमर्थस्योपलम्भात् विशेषणमिदं नितरामपार्थकं भवति, तदेवं ब्रुमः यथोपदिष्टै द्रव्यै रित्येवमर्थमभिधातु "समानाधिकरणाधिकारे शाकपार्थिवादीना मुपसंख्यान मुत्तरपदलोपश्च" इति पां सूं २।१।६० उपदिष्टं वार्त्तिक माश्रित्य यथाद्रव्यै रितुपदिश्यते, सामानाधिकरण्यस्त्वव्ययीभावे अर्श आद्यचि नेयम्। तथा च पदमिदं घृतेऽस्मिन् द्रवान्तरानुपदेशात् उत्सर्गसिद्धत्वेन प्राप्तं चतुर्गुणं क्षीरं हित्वा कल्याणकोपदिष्टं द्विःक्षीरमेवादातु परिकरबन्धेन नियोजयतीत्यायातम्। सर्व्वगन्धैरिति सर्व्वगन्धं नाम "चातुर्ज्जातक-कर्पूर-कक्कोलागुरुकुङ्कुमम्। लवङ्गसहितश्चैव सर्व्वगन्धं प्रकीर्त्तितम्।" इत्यायुर्व्वेद आमनन्ति, तद्विद्यते एषामित्यकारो मत्वर्थीयः, तैस्तथोक्तैः। स्वायोगव्यवच्छेदकोऽयमेवशब्दश्च भिन्नक्रम उपदिश्यते इत्यवश्यं वक्तव्यं सन्निहितान्वये हि तात्पर्य्यं नोपपद्यते, तदयमर्थः—सर्व्वगन्धसहितैरेतैः प्रागुक्तैर्यथाद्रव्यैर्यथोपदिष्टैर्द्रव्यनिचयैः सुवर्णमणि-संयुतं यथालाभं सुवर्णभस्मना मणिचूर्णेन च संमिश्रं द्विःक्षीरञ्च साधितमेव कपिलायाः सुवर्णवर्णाया गो घृतप्रस्थं तत् क्षीरेण मानानुपदेशात् चतुर्गुणेन कपिलाक्षीरेण वीर्य्याधानार्थं चतुर्गुणेन जलेन च इमैर्वक्ष्यमाणैः कुसुमैः सुमन आदिभिः कुसुमैर्नलदादीनां केशरैश्च घृतं "घृतमाज्ये जले क्लीवं प्रदीप्ते-त्वभिधेयवत्" इति मेदिनीस्मरणात् गन्धपाकविधिना विपक्वत्वेन सुगन्धितया प्रदीप्तं, तिथौ प्रशस्तानुषङ्गात् रिक्तादिवर्ज्जितायां, प्रशस्ते नक्षत्रे उग्रादि वर्ज्जिते, साधकस्यातुरस्येति "चतुर्थ्यर्थे बहुलं छन्दसि" इति पां सू २।३।६२ चतुर्थ्यर्थे षष्ठी, साधकस्य हिताहार विहारित्वेन चिकित्सकपरस्य निष्पादयते

अधृष्यः सर्व्वभूतानां वलीपलितवर्ज्जितः।
अस्याभ्यासाद्घृतस्येह जीवेद्वर्षशतत्रयम्॥ ६२॥
गव्यं दधि च मूत्रञ्च क्षीरं सर्पिः शकृद्रसः।
समभागानि पाच्यानि कल्कांश्चैतान् समावपेत्॥
त्रिफलां चित्रकं मुस्तं हरिद्रे द्वे विषां वचाम्।
विडङ्गं त्र्यूषणं चव्यं सुरदारु तथैव च।
पञ्चगव्यमिदं पानाद्विषमज्वरनाशनम्।
पञ्चगव्यमृते गर्भात् पाच्यमन्यद्द्रवेण च।
बलयाथ परं पाच्यं गुडूच्या तद्वदेव तु।
जीर्णज्वरे च शोफे च पाण्डुरोगे च पूजितम्॥
एतेनैव तु कल्पेन घृतं पञ्चाविकं पचेत्।
पञ्चाजं पञ्चमहिषं चतुरुष्ट्रमथापि वा॥
त्रिफलोशीरसम्याक-कटुकातिविषान्वितैः॥
शतावरीसप्तपर्ण-गुडूचीरजनीद्वयैः॥

आतुराय, मनुष्यदेवाय राज्ञे च क्षतं "क्षतं युगेऽलमर्थेपि विहिते" इति मेदिन्यनुशासनात् विहितं यथास्यात्तथैव ब्राह्मणैरभिमन्त्रितं मन्त्रान्तरानुपदेशाद् गायत्र्याहितवीर्य्यमिति यावत्, दत्तं सर्व्वज्वरान् हन्ति, दर्शनेत्याद्यर्थवादः। मनुष्यदेवायेति विशेषणं घृतस्यास्य स्वादुत्वादिगुणगरिमाणमाख्यातुम्। राजानो हि तथाविधमेव भेषजमभ्यवहर्त्तुमभीप्सन्तीति ध्येयम्॥ ६२॥

पञ्चाजमिति। अत्र पञ्चमहिषं चतुरुष्ट्रमिति महिषशब्द उष्ट्रशब्दश्च तत्सम्बन्धीनि दध्यादीनि लक्षयतः, चतुरुष्ट्रमिति क्रमप्राप्तत्वात् आद्यानि दध्यादीनि चत्वार्य्युष्ट्रसम्बन्धीनि अत्रेति चतुरुष्ट्रम्॥ ६४॥

चित्रकच्छिन्नतामूर्व्वा-पटोलारिष्टबालकैः ।
किराततिक्तकवचा-विशालापद्मकोत्पलैः ॥
सारिवाद्वयषष्ट्याह्व-चविकारक्तचन्दनैः ।
दुरालभापर्पटक-त्रायमाणाटरूषकैः ॥
रास्नाकुङ्कुममञ्जिष्ठा-मागधीनागरैस्तथा ।
धात्रीफलरसैः सम्यग्द्विगुणैः साधितं हविः ॥
परिसर्पज्वरश्वासगुल्मकुष्ठनिवारणम् ।
पाण्डुप्लीहाग्निमान्द्येभ्य एतदेव परं हितम् ॥
पटोलकटुकादार्व्वी-निम्बवासाफलत्रिकम् ।
दुरालभापर्पटक-त्रायमाणाः पलोन्मिताः ॥
प्रस्थमामलकानाञ्च क्वाथयेत् सलिलार्मणे ।
तेन पादावशेषेण घृतप्रस्थं विपाचयेत् ॥
रक्तपित्तकफस्वेद-क्लेदपूयाङ्गशोषणम् ।
कामलाज्वरवीसर्प-गण्डमालाहरं परम् ॥
शृतं पयः शर्करा च पिप्पल्यो मधुसर्पिषी ।
पञ्चसारमिदं पेयं मथितं विषमज्वरे ॥
क्षतक्षीणे क्षये श्वासे हृद्रोगे चैतदिष्यते ॥
लाक्षाविश्वानिशामूर्व्वा-मञ्जिष्ठास्वर्ज्जिकामयैः ।
षड्गुणेन च तक्रेण सिद्धं तैलं ज्वरान्तकृत् ॥
क्षीरिवृक्षासनारिष्टे जम्बूसप्तच्छदार्ज्जुनैः ।
शिरीषखदिरास्फोतामृतवत्साटरूषकैः ॥
कटुकापर्पटोशीर-वचाजीवन्तीघनैः ।
साधितं तैलमभ्यङ्गादाशु जीर्णज्वरापहम् ॥ ६३ ॥

निर्व्विषैर्भुजगैर्नागैर्विनीतैः कृततस्करैः।
त्रासयेद्वागमे चैनं तदहर्भोजयेन्न च॥
अत्यभिष्यन्दिगुरुभिर्वामयेद्वा पुनःपुनः।
मद्यं तीक्ष्णं पाययेत घृतं वा ज्वरनाशनम्॥
पुराणं वा घृतं काममुदारं वा विरेचनम्।
निरूहयेद्वा मतिमान् सुस्विन्नं तदहर्नरम्॥
अजाव्योश्चर्म्मरोमाणि वचा कुष्ठं पलङ्कषा।
निम्बपत्रं मधुयुतं धूपनं तस्य दापयेत्॥
वैड़ालं वा शकृद्योज्यं वेपमानस्य धूपनम्॥
पिप्पलीसैन्धवं तैलं नैपाली चैवमाञ्जनम्।
उदरोक्तानि सर्पींषि यान्युक्तानि पुरामया।
कल्पोक्तान्यजितं सर्पिः सेव्यमानं ज्वरं जयेत्॥
भूतविद्यासमुद्दिष्टैर्बन्धावेशनताड़नैः।
जयेद्भूताभिषङ्गोत्थं विज्ञानाद्यैश्च मानसम्॥
श्रमक्षये च भुञ्जीत घृताभ्यक्तो रसौदनम्।
अभिशापाभिचारोत्थौ ज्वरौ होमादिना जयेत्॥
दानस्वस्त्ययनातिथ्यैरुत्पातग्रहपीड़जौ।
अभिघातज्वरे कुर्य्यात् क्रियामुष्णविवर्ज्जिताम्॥
कषायमधुरां स्निग्धां यथादोषमथापि वा।
ओषधीगन्धविषजौ विषपित्तप्रसादनैः॥
जयेत् कषायश्च हितं सर्व्वगन्धकृतं तथा।
निम्बदारुकषायं वा हितं सौमनसं तथा॥

निर्व्विषैरिति। कृततस्करैः कृत्रिमचौरै रित्यर्थः।

यवान्नविकृतिः सर्पिर्मेध्यञ्च विषमे हितम् ।
सम्पूजयेद् द्विजान् गांश्च देवमीशानमम्बिकाम् ॥
कफवातोत्थयोश्चापि ज्वरयोः शीतपीड़ितम् ।
दिह्यादुष्णेन वर्गेण परश्चोष्णो विधिर्हितः ॥
सिञ्चेत् कोष्णैरारनाल-शुक्तगोमूत्रमस्तुभिः ।
दिह्यात् पलाशैरथवा सुरसार्ज्जकशिग्रुजैः ॥
क्षारतैलेन चाभ्यङ्गः सशुक्तेन विधीयते ।
पानमारग्वधादिश्च क्वथितस्य विशेषतः ॥ ६४ ॥
अवगाहः सुखोष्णश्च वातघ्नक्वाथसंयुतः ।
जित्वा शीतं क्रमैरेभिः सुखोष्णजलसेचितम् ॥
प्रवेण्यौर्णिककार्पास-कौशेयाम्बरसंवृतम् ।
शाययेद् ग्लानदेहञ्च कालागुरुविभूषितम् ॥
स्तनाढ्या रूपसम्पन्नाः कुशला नवयौवनाः ।
भजेयुः प्रमदा गात्रैः शीतदैन्यापहारिभिः ॥
शरच्छशाङ्कवदना नीलोत्पलदलेक्षणाः ।
स्फुरितभ्रूलताभङ्ग-ललाटतटकम्पनाः ॥
प्रलम्बिविलसत्काञ्च्यो बिम्बीफलनिभाधराः ।
कृशोदर्य्योऽतिविस्तीर्ण-जघनोरुहनालसाः ॥
कुङ्कुमागुरुदिग्धाङ्ग्यो घनतुङ्गपयोधराः ।
सुगन्धिधूपितश्लक्ष्ण-स्वल्पांशुकविभूषणाः ॥
गाढमालिङ्गयेयुस्तं नरं वनलता इव ।
प्रह्लादस्वास्थ्य विज्ञाय ताः स्त्रीरपनयेत् पुनः ॥

क्षारेति । पलाशक्षारसिद्धं तैलं क्षारतैलम् ॥ ६४ ॥

तासामङ्गवरश्लेष-निवारितहिमज्वरम्।
भोजयेद्धितमन्नञ्च तथा सुखमवाप्नुयात्॥
दाहाभिभूते तु विधिं कुर्य्याद्दाहविनाशनम्।
मधुफाणितयुक्तेन निम्बपत्राम्भसापि वा।
दाहज्वरार्त्तं मतिमान् वामयेत् क्षिप्रमेवच॥
शतधौतघृताभ्यक्तं दिह्याद्वा यवशक्तुभिः।
कोलामलकसंयुक्तैः शूकधान्याम्लसंयुतैः॥
अम्लपिष्टैः सुशीतैश्च फेनिलापल्लवैस्तथा।
अम्लपिष्टैस्तु शीतैर्व्वा पलाशतरुजैर्दिहेत्॥
बदरीपल्लवोत्थेन फेनेनारिष्टकस्य च।
लिप्तेऽङ्गे दाहतृड्मूर्च्छा सर्व्वथैव प्रशाम्यति॥
यवार्द्धकुड़वं पिष्ट्वा मञ्जिष्ठार्द्धपलं तथा।
अम्लप्रस्थशतोन्मिश्रं तैलप्रस्थं विपाचयेत्॥
एतत् प्रह्लादनं तैलं ज्वरदाहविनाशनम्।
न्यग्रोधादिर्गणो यस्तु काकोल्यादिश्च यो गणः॥
उत्पलादिर्गणो यस्तु पिष्टैर्वा तैः प्रलेपयेत्।
तत्कषायाम्लसंसिद्धाः स्नेहाश्चाभ्यञ्जने हिताः॥
तेषां शीतकषाये वा दाहार्त्तमवगाहयेत्।
दाहवेगे त्वतिक्रान्ते तस्मादुद्धृत्य मानवम्॥
परिषिच्याम्बुभिः शीतैः प्रलिम्पेच्चन्दनादिभिः॥
सानन्दा दीनमनसमाश्लिषेयुर्वराङ्गनाः।
पेलवक्षौमसंवीताश्चन्दनार्द्रपयोधराः॥

विभ्रत्योऽब्जस्रजश्चित्रा मणिहारविभूषिताः ।
भजेयुस्ताः स्तनैः शीतैः स्पृशन्त्योऽम्बुरुहैः सुखैः ॥
प्रह्लादाश्वास्य विज्ञाय ताः स्त्रीरपनयेत् पुनः ।
हितञ्च भोजयेदन्नं तथाप्नोति सुखं महत् ॥
पित्तज्वरोक्तं शमनं विरेकोऽन्यद्धितञ्च यत् ॥ ६५ ॥
निर्हरेत् पित्तमेवादौ ज्वरेषु समवायिषु ।
दुर्निवारतरं तद्धि ज्वरार्त्तेषु विशेषतः ॥ ६६ ॥
छर्द्दिमूर्च्छापिपासादीनविरोधाज्ज्वरस्य तु ।
उपद्रवान् जयेच्चापि प्रत्यनीकेन हेतुना ॥

निर्हरेदिति। भगवन्! जिज्ञास्यं पुनरापन्ने दाहाभिभूते ज्वरिणि पित्तज्वरोक्तमित्यादिना ये ये प्रतीकारा उपदिष्टा स्तेषु कं नाम प्रतीकारमादावुपयुयुञ्जन्ति कुशला इत्येवमनुयुयुक्षून् अपाकरोति निर्हरेदिति। अत्र समवायिशब्दः सन्निपातपर इति केनचित् पाञ्जिकोत्पातेनोपदिश्यते तत्तु न सम्यगप्रासङ्गिकत्वात्, अथ चेत् अज्ञामस्यापूरयन्तः कथञ्चिदभ्युपगच्छेम तथापि नैव दोषान्निर्मोचोऽस्ति श्रीमद्भगवदात्रेयाद्यनुशासनानुशिष्टेषु जीवत्सु, ते हि सन्निपातज्वरं कफानुपूर्व्यैव प्रतिकर्त्तुमुपदिशन्ति, "कफस्थानानुपूर्व्या वा सन्निपातज्वरं जयेत्" तथा "सन्निपातज्वरे पूर्व्वं कुर्य्यादामकफापहम्। पश्चात् श्लेष्मणि संक्षीणे शमयेत् पित्तमारुतौ॥" इति। तदेवं ब्रूमः समवायिष्विति भूम्नि मत्वर्थीयः, एवशब्दस्य भिन्नक्रम उपदिश्यते इत्यवश्यं वक्तव्यम् सन्निहितान्वये व्यवच्छेद्यानुपपत्तेः, तदयमर्थः समवायिषु प्रकृतत्वात् प्राचुर्य्येण पित्तसम्बन्धयुक्तेषु ज्वरेषु दोषबलतारतम्येनानेकेष्विति यावत्, आदौ दाहोपशमनान्युक्तानि क्रियान्तराणि हित्वा पित्तं निर्हरेदेव, "विरेचनं पित्तहराणां श्रेष्ठतमम्" इत्यात्रेयानुशासनात् प्रागुक्तेषु मध्ये विरेचनेनेत्यभिसन्धिः, अत्र हेतुः दुर्निवारतरमिति। हि यस्मात् ज्वरार्त्तेषु दाहज्वराभिभूतेष्वातुरेषु तत् पित्तं विशेषतो दुर्निवारतरं समूलघातमुपहन्तृ विरेचनं हित्वान्येन पित्तोपशमनेन सहसा प्रशमयितु मशक्यत्वात्। ६६॥

विशेषमपरञ्चात्र शृणूपद्रवनाशनम् ।
मधुकं रजनी मुस्तं दाड़िमञ्चाम्लवेतसम् ।
अञ्जनं तिन्तिड़ीकञ्च नलदं पद्ममुत्पलम् ॥
त्वचं व्याघ्रनखञ्चैव मातुलुङ्गरसो मधु ।
दिह्यादेभिर्ज्वरार्त्तस्य मधुशुक्तयुतैः शिरः ॥
शिरोऽभितापसंमोह-वमिहिक्काप्रवेपथून् ।
प्रदेहो नाशयत्येष ज्वरितानामुपद्रवान् ॥
मधूकमथ ह्रीवेरमुत्पलानि मधूलिकाम् ।
लीढ्वा चूर्णानि मधुना सर्पिषा च जयेदिमम् ।
कफप्रसेकासृक्पित्त-हिक्काश्वासांश्च दारुणान् ॥
लिहन् ज्वरार्त्तस्त्रिफलां पिप्पलीञ्च समाक्षिकाम् ।
कासे श्वासे च मधुना सर्पिषा स सुखी भवेत् ॥
विदारी दाड़िमं लोध्रं दधित्थं बीजपूरकम् ।
एभिः प्रदिह्यान्मूर्द्धानं तृड्दाहार्त्तस्य देहिनः ॥
दाड़िमस्य सितायाश्च द्राक्षामलकयोस्तथा ।
वैरस्ये धारयेत् कल्कं गण्डूषञ्च यथाहितम् ॥
क्षीरेक्षुरसमाध्वीक-सर्पिस्तैलोष्णवारिभिः ।
शून्ये मूर्द्ध्नि हितं नस्यं जीवनीयशृतं घृतम् ॥
चूर्णितत्रिफलाश्यामा-त्रिवृत्पिप्पलिसंयुतः ।

मधूक मिति। मधूलिका मूर्व्वा, व्यवहारस्तु मधुरिकयैव। सा च "मौरी"ति परिचीयते। दाड़िमस्येति दाड़िमादीनां कल्कं धारयेत् क्षीरादिभिर्गण्डूषञ्चेत्यन्वयः। अत्र यथाहितमिति विशेषणं दोषविशेषमभिसमीक्ष्य क्षीरादीन्युपयोक्तुम्। शून्य इति। शून्ये शून्यत्वेनानुभूते। जीवनीय शब्देनेह 'सू' ३८ अं' उपदिष्टः काकोल्यादिगणोऽभिप्रेयते। चर्षिंतेति। अत्र

सक्षौद्रः शर्करायुक्तो विरेकस्तु प्रशस्यते ॥
पक्के पित्तज्वरे रक्ते चोल्लिङ्गे वेपथौ तथा ।
कफवातोत्थयोरेवं स्नेहाभ्यङ्गैर्विशोधयेत् ।
हृतदोषो भ्रमार्त्तस्तु लिह्यात् क्षौद्रसिताभयाः ॥
वातघ्नमधुरैर्य्योज्या निरूहा वातजे ज्वरे ।
विभज्य दोषं प्राणञ्च यथास्वं वानुवासनम् ॥
उत्पलादिकषायाढ्याश्चन्दनोशीरसंयुताः
शर्करामधुराः शीताः पित्तज्वरहरा मताः ॥
आम्रादीनां त्वचं शङ्खं चन्दनामलकोत्पलैः ।
गैरिकाञ्जनमञ्जिष्ठा-मृणालान्यथ पद्मकम् ॥
श्लक्ष्णपिष्टन्तु पयसा शर्करामधुसंयुतम् ।
सुपूतं शीतलं वस्तिं दूयमानाय दापयेत् ॥
ज्वरदाहापहं तेषु सिद्धञ्चैवानुवासनम् ।
आरग्वधगणक्वाथाः पिप्पल्यादिसमायुताः
सक्षौद्रा एव देयाः स्युः कफज्वरविनाशनाः ।
कफघ्नैरेव संसिद्धा द्रव्यैश्चाप्यनुवासनाः ॥
संसर्गे सन्निपाते च संसृष्टा वस्तयो हिताः ।
संसृष्टैरेव संसृष्टा द्रव्यैश्चाप्यनुवासनाः ॥

कफवातोत्थयो रिति सामान्येनोक्तेऽपि पक्वानुषङ्गादधिकृतत्वाच्च पक्वयो र्ज्वरयो रित्येवावगन्तव्यम्। स्नेहाभ्यङ्गैरुपलक्षित मेवं विशोधयेदित्यन्वयः। दोषे निर्हृते पित्तान्वयाद् भ्रमे तिष्ठति तदुपशमार्थं लेह मभिधत्ते हृतेति। उत्पलेत्यादि। अत्र प्रागुक्तं निरूह शब्द माकृष्यान्वयः कार्य्यः।

वातरोगापहाः सर्व्वे स्नेहा ये सम्यगीरिताः ।
विना तैलं त एव स्युर्य्योज्या मारुतजे ज्वरे ॥
निखिलेनोपयोज्याश्च त एवाभ्यञ्जनादिषु ।
पैत्तिके मधुरैस्तिक्तैः सिद्धं सर्पिः प्रयुज्यते ।
श्लैष्मिके कटुतिक्तैश्च संसृष्टानीतरेषु च ॥
हृतावशेषं पित्तन्तु त्वक्स्थं जनयति ज्वरम् ।
पिबेदिक्षुरसं तत्र शीतं वा शर्करोदकम् ॥
शालिषष्टिकयोरन्नमश्नीयात् क्षीरसंप्लुतम् ।
कफवातोत्थयोरेव स्वेदाभ्यङ्गौ प्रयोजयेत् ॥
घृतं द्वादशरात्रात् तु देयं सर्व्वज्वरेषु च ।
तेनान्तरेणाशयं स्वं गता दोषा भवन्ति हि ॥
धातून् प्रक्षोभयन् दोषो मोक्षकालेऽवलीयते ।
तेन व्याकुलचित्तस्तु म्रियमाण इवेहते ॥
लघुत्वं शिरसः स्वेदो मुखमापाण्डु पाकि च ।
क्षवथुश्चान्नकाङ्क्षा च ज्वरमुक्तस्य लक्षणम् ॥ ६७ ॥

कफघ्नै रिति। अनुवासना वस्तय इति सम्बन्धः। वातेत्यादि। योज्या अनुवासनविधिनेति प्रकृतत्वादुन्नेयम्। अभ्यञ्जनादिषु तैलमप्यादातुं निखिलेनेत्युपात्तम्। घृतमिति कुतो देयमित्याह तेनेति। तेन घृतेन हि दोषाः स्वमाशयमन्तरेण स्वाशयमध्ये इत्यर्थः 'अन्तरान्तरेण युक्ते' इति पां स' २।३।४ द्वितीया, अन्तरेण शब्दस्य मध्यार्थता च तत्रैव काशिकोक्ता। समासतो दारुणमोक्षप्रकार मुपदिदिक्षति धातूनिति। अवलीयते लीनो भवति विनश्यती-त्यभिसन्धिः। ६७ ॥

शम्भुक्रोधोद्भवो घोरो बलवर्णाग्निसादकः ।
रोगराड्रोगसंघातो ज्वर इत्युपदिश्यते ॥
व्यापित्वात् सर्व्वसंस्पर्शात् कृच्छ्रत्वादन्तसम्भवात् ।
अन्तकोह्येष भूतानां ज्वर इत्युपदिश्यते ॥ ६८ ॥
इति उत्तरतन्त्रे ज्वरप्रतिषेधोनाम एकोनचत्वारिंशोऽध्यायः ॥

ज्वरस्य तटस्थलक्षणमाह शम्भुक्रोधेति संहन्यतेऽनेनेतिसंघातः। व्यापित्वादिना ज्वरस्यैवान्तकत्वं व्यवस्थापयन्नाह व्यापित्वादिति। व्यापित्वं सर्व्वशरीरसंश्रयित्वं तच्च मसूरिकादौ व्यभिचरतीति हेत्वन्तरं दर्शयति सर्व्वेति सर्व्वसंस्पर्शो नाम सर्व्वप्राणिसम्बन्धः। स च ज्वरेष्विव नियमेन मसूरिकायां न दृश्यते इत्यतो न व्यभिचारः। ज्वरस्य सर्व्वप्राणिसम्बन्धित्वन्तु "ते स्वैर्नामभिः" इत्यादिनाऽऽचैव सूचयाम्बभूव। न खल्वेतावतापि दोषो निरस्यते दोषेषु व्यापित्वसर्व्वसंसर्गित्वयो र्नियतवृत्तित्वात् तेषामप्यन्तकत्वापत्तिरित्येवं ये विप्रतिपद्यन्ते तानपाकुर्व्वन् हेत्वन्तर मुपन्यस्यति कृच्छ्रत्वादिति। कृच्छ्रत्वमत्र विजातीयदुःखजनकत्वं देहादिषु दुःखविशेषजनकत्वमित्येतत्, तच्च "देहेन्द्रियमनस्तापो ज्वरः" इत्यात्रेयस्मरणाज्ज्वर एव वर्त्तते न पुन र्दोषेष्विति गम्यते। आप्तागमस्य प्रमाणनिचयेष्वतितरामवितथत्वेनाभ्युपगमात् नातो दोषेष्वतिप्रसङ्गः। नन्विदमश्रद्धेयम् 'कारणानुरूपं कार्य्य' मिति कृत्वा ज्वरारम्भकेषु तादृशदुःखजनकत्वस्यावश्यमभ्युपगन्तव्यत्वेनापरिहार्य्यो हि तत्रातिप्रसङ्ग इत्येवं ब्रुवतां मुखमुद्रणाय सर्व्वोपसंहारं हेत्वन्तर माह अन्तेति अन्तसम्भवत्वञ्च मृत्यो रव्यवहितपूर्व्ववर्त्तित्वं, मृत्योरव्यवहितपूर्व्वक्षणएव श्वासादीनां दोषाणाञ्च नाशनियमान्न काचिद्दस्युक्तिः, ज्वरस्य तदात्वे वृत्तिमत्त्वन्तु "सज्वरा एव जायन्ते सज्वरा एव म्रियन्ते" इत्यादि भगवदात्रेयादिवचनादुन्नेयम्। इत्यतो निरपवादमुपपन्नं भवत्यन्तसम्भवाद्द् ज्वरस्यान्तकत्वमिति।

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे ज्वरप्रतिषेधो नाम एकोनचत्वारिंशत्तमोऽध्यायः। ६८ ॥

चत्वारिंशोऽध्यायः ।

अथातोऽतीसारप्रतिषेधं व्याख्यास्यामः ॥ १ ॥

गुर्व्वतिस्निग्धरूक्षोष्ण-द्रवस्थूलातिशीतलैः ।
विरुद्धाध्यशनाजीर्णैरसात्म्यैश्चापि भोजनैः ॥
स्नेहाद्यैरतियुक्तैश्च मिथ्यायुक्तैर्विषाद् भयात् ।
शोकाद्दुष्टाम्बुमद्यातिपानात् सात्म्यर्त्तुपर्य्ययात् ॥

व्रणानामुपद्रवेषु मध्ये सप्रतिषेधं ज्वर श्चिन्तितः सम्प्रति च द्विव्रणीयानुसन्धानात् प्रकान्तोऽतीसारश्चिन्त्यत्वेन चित्त मारोहतीति तमधिकरोति अथात इत्यादिना । १ ॥

कुतस्तु खल्वतीसारः प्रवर्त्तते ? आह गुर्व्विति । अत्र संशयः किमिह गुरुशब्देन स्वभावत उताहो गुणतोऽथवा पाकत आहोस्वित् मात्रातो दुर्ज्जराण्यभिप्रेयन्त इति । किन्तावत् प्राप्तम् ? मात्रातो दुर्ज्जराणीति । कुतः ? आदावतिशब्दानुपादानात् । स्वभावादितो दुर्जराणि हि द्रव्याणि मनागुपयुक्तानि सुखजरत्वेन प्रतीयन्ते ; अत एवोक्तञ्च स्वयमेव "गुरूणामर्द्धसौहित्यं लघूनां तृप्ति रिष्यते" इति सू० ४६ अ० । इदन्तु नः सर्व्वेषां शश्वदेव प्रत्यक्षञ्च भवति यद् गुरूण्यपि द्रव्याणि मात्रावदभ्यवहृतानि सन्त्यतीसारे न हेतु र्भवितु मर्हन्त्यग्नेरदूषकत्वात् । न जात्वतीसारोऽग्ने र्विनाशन मन्तरेण सम्भवति । वक्ष्यति च "संशम्यापां धातुरन्तः कृशानुम् ।" इत्येवञ्च स्वभावादितो गुरूणि लघूनि वा यानि कानिचिद् द्रव्याणि मात्रातो गुरूणि सन्त्यतीसाराय कल्पन्त इत्यायाते सत्यपि पृथक्तेनातिस्निग्धादीनामुपादानमव्यभिचारिहेतुत्वमाख्यातुम् । एवञ्चाद्योऽतिशब्दोऽतिमात्रवचन इति राद्धान्ते प्राप्तेऽपि शीतत्व सामान्यं हित्वा वीर्य्यतः स्पर्शतश्चातिशयशीतत्वाद्यादातुं पुन रतिशब्दं प्रायुङ्क्तेति नेयम् । तथाच हिमानीप्रसृतीन्यति मात्र मुपयुक्तानि सन्त्यतीसारं जनयन्तीत्यध्यवसेयम् । स्थूलानि संहतावयवानि

जलाभिरमणैर्वेगविघातैः क्रमिदोषतः ।
नृणां भवत्यतीसारो लक्षणं तस्य वक्ष्यते ॥ २ ॥

संशम्यापां धातुरन्तः कृशानुं वर्च्चोमिश्रो मारुतेन प्रणुन्नः ।
वृद्धोऽतीवाधः सरत्येव यस्माद् व्याधिं घोरं तन्त्वतीसारमाहुः ॥
एकैकशः सर्व्वशश्चापि दोषैः शोकेनान्यः षष्ठ आमेन चोक्तः ।
केचित् प्राहुर्नैकरूपप्रकारं नैवेत्येवं काशिराजस्त्ववोचत् ॥
दोषावस्थास्तस्य नैकप्रकाराः काले कालेव्याधितस्योद्भवन्ति ॥३॥

हृन्नाभिपायूदरकुक्षितोद गात्रावसादानिलसन्निरोधाः ।
विट्सङ्ग आध्मानमथाविपाको भविष्यतस्तस्य पुरःसराणि ॥
शूलाविष्टः, सक्तमूत्रोऽन्त्रकूजी स्रस्तापानः सन्नकक्ष्युरुजङ्घः ।
वर्च्चो मुञ्चत्यल्पमल्पं सफेनं रूक्षं श्यावं सानिलं मारुतेन ॥

पिष्टकादीनि, विरुद्धानि हिताहितीयोपदिष्टानि चरकोपदिष्टात्रेयभद्रकाप्योयोक्तानि च तानि तानि द्रव्याणि। स्नेहाद्यैः स्नेहस्वेदादिभिः, मिथ्यायुक्तैः प्रतिषिद्धेष्वपयुक्तैः। विषशब्देनेह स्थावर विषं दूषीविषञ्चोक्तेयम्, तयो रेवाधोगलस्वभावात्; पूर्व्वं ह्यसात्म्यभोजनं हेतुत्वेनोपदिष्टमिदानीन्तु दिवानिद्रादिकं तथात्वेन ग्राहयितुं सात्म्यपर्य्यायशब्द उपात्त इत्यतः पौनरुक्त्यं नाशङ्कितव्यम्। २ ॥

संशम्येति। अतीसार इति कर्त्तरि घञ् इत्युपपन्नं भवति यस्मादिति। अनेकेषां दोषाणां रूपेण भेदोऽस्येति नैकरूपप्रकार स्तं तथोक्तम्। एतावता नैकदोषज इति व्याजेन विज्ञापितम्। मतमिदं परिहरति नैवेति। कुत एवमवोचत्? आह दोषेति। काले काले इत्यानुपूर्व्ये द्विर्वचनम् "आनुपूर्व्ये द्वे भवत इति वक्तव्यम्" इति पा० सू० ८।१।१२ वा०। तदयमर्थः—तस्य व्याधितस्यातिसारिणो दोषावस्था वातादीनां तास्ताः सहसा नैकदोषजत्वप्रत्ययकार्य्यो दशाः काले काले कालानुक्रमेण उद्भवन्ति प्रभावादिति गम्यते यथा ज्वरविशेषे केशसीमन्ता स्वहत्। नातो नैकरूपप्रकारोऽयमतीसार इति राद्धान्तः। ३ ॥

अतीसारस्य पूर्व्वरूपाणि निवेदयति हृदिति निगदव्याख्यातम्। शूलेति। शूलाविष्टो गुदान्त्रशूलावेशेनानुविद्धः। सक्तमूत्रो विबद्धमूत्रः। अन्त्रकूजी

दुर्गन्ध्युष्णं वेगवन्मांसतोयप्रख्यं भिन्नं खिन्नदेहोऽतितीक्ष्णम्।
पित्तात् पीतं नीलमालोहितं वा तृष्णामूर्च्छादाहपाकज्वरार्त्तः॥
तन्द्रानिद्रागौरवोत्क्लेशसादी वेगाशङ्की सृष्टविट्कोऽपि भूयः।
शुक्लं सान्द्रं श्लेष्मणा श्लेष्मयुक्तं भक्तद्वेषी निस्वनं हृष्टरोमा॥
तन्द्रायुक्तो मोहमादास्यशोषो वर्च्चः कुर्य्यान्नैकवर्णं तृषार्त्तः॥
सर्व्वोद्भूतः सर्व्वलिङ्गोपपत्तिः कृच्छ्रश्चायं बालवृद्धेष्वसाध्यः॥४॥
तैस्तैर्भावैः शोचतोऽल्पाशनस्य वाष्पो वेगः पक्तिमाविध्य जन्तोः॥
कोष्ठं गत्वा क्षोभयेत् यस्य रक्तं तच्चाधस्तात् काकनन्तीप्रकाशम्।
वर्च्चोमिश्रं निष्पुरीषं सगन्धं निर्गन्धं वा सार्य्यते तेन कोष्ठात्।
शोकोत्पन्नो दुश्चिकित्स्योऽतिमात्रं रोगो वैद्यैः कष्ट एष प्रदिष्टः॥५॥

स्वने गुड़गुड़ादिशब्दवान्। स्रस्तापानो भ्रष्टगुदः। दुर्गन्धीति भूम्नि मत्वर्थीयः। भिन्नं पित्तेन दारितम्, अतएव तदन्वशाद् द्रवीभूत मित्युक्तम्। सृष्टविट्कोऽपि भूयो वेगाशङ्कीत्यन्वयः। तन्द्रेति। मादो मदः कार्य्याकार्य्यविभागानभिज्ञत्वमिति यावत्। मोहादयः मन्त्यम्ये त्यर्श आद्यच् मोहमादास्य शोषः। सर्व्वेषां दोषाणां लिङ्गानि सर्व्वलिङ्गानि तेषामाधिक्येन प्राप्तिः सर्व्वलिङ्गोपपत्तिः॥ ४॥

तैरिति। शोकेन हि वायु रनशनेन च वातपित्ते प्रकोपमापद्येते। तत्र च वायुराकुञ्चनप्रसारणाभ्यां यकृत्प्लिहोश्च पित्तं निसारयन् पित्ताशय अभिप्रपद्यमानः तेनैव सह वेगेन सिरानुसारी पक्काशयं गच्छन् तास्ताः सिरा विदारयति विस्फारणेनेति शङ्कतः प्राक् पश्चात् सहैव वा सिरागतत्वेन गुञ्जाफलसवर्णं रक्तं निर्गच्छेत्। न च तावदन्तरेण यथावदशनाच्छोकोपशमाच्च वातपित्ते प्रशान्तिमापद्येते, नापि च रजस्तमोभूयिष्टेऽस्मिन् लोके सहसा शोकोपशमः सम्भवत्यप्रशान्ते च तस्मिन् सहस्रेषु शोकार्त्तेषु मध्ये कश्चिदपि यथावदभ्यवहर्त्तुं नार्हतीति साम्प्रत मुक्तं तैस्तैरिति। वाष्प उष्मा पित्तमित्येतत्, स्मर्य्यते च "उष्मा पित्तादृते नास्ति" इति। तत्सम्बन्धी वेगो विगुणवातमूलः प्रवाहः। "वेगः प्रवाहजवयोरपि" इत्यमरः। पच्यतेऽनेति पक्तिः पित्तस्थानम्

अन्नाजीर्णैः प्रद्रुताः क्षोभयन्तः कोष्ठं दोषाः सम्प्रदुष्टाः सभक्तम् ।
नानावर्णं नैकशः सारयन्ति कृच्छ्राज्जन्तोः षष्ठमेनं वदन्ति ॥६॥

संसृष्टमेभिर्दोषैस्तु न्यस्तमप्स्ववसीदति ।
पुरीषं भृशदुर्गन्धं विच्छिन्नञ्चामसंज्ञितम् ॥
एतान्येव तु लिङ्गानि विपरीतानि यस्य तु ।
लाघवञ्च मनुष्यस्य तस्य पक्वं विनिर्दिशेत् ॥

सर्पिर्मेदोवेशवाराम्बुतैलमज्जक्षीरं क्षौद्ररूपं स्रवेद्‌यत् ।
मञ्जिष्ठाभं मस्तुलुङ्गोपमं वा विस्रं शीतं प्रेतगन्ध्यञ्जनाभम् ॥

कोष्ठशब्देनेह पक्वाशयस्योपलम्भेऽपि तद्‌गताः सिरा एव विवक्षितत्वेन प्रत्येतव्याः 'क्षोभयेत्तस्य रक्त' मित्युक्तेः । रोगस्यास्य शोकानशनमूलत्वे सत्यपि भगन्दर इतिवदेकांशमाश्रित्य शोकोत्पन्न इत्युक्तम् ॥ ५ ॥

अन्नेति । अन्नानामजीर्णान्यन्नाजीर्णानीति व्युत्पत्त्या अन्नाजीर्णशब्देनेह सू० ४६ अम० उपदिष्टानां चतुर्णामजीर्णानामुपलम्भेऽपि आमादीनि त्रीण्येवाजीर्णान्यभिप्रेयन्त इति गम्यते, अनन्तरं सभक्तमिति कोष्ठविशेषणात् । कोष्ठानां हि सभक्तत्वं गन्धमात्रेणापि रसशेष-समाख्ये चतुर्थेऽजीर्णे सम्भवतीति । एवञ्च अन्नाजीर्णै रामादिभि स्त्रिभिरजीर्णैः सम्प्रदुष्टाः, अतएव प्रद्रुता वेगेन प्रचलिताः । सभक्तं भक्तेन सह वर्त्तमानम् । कोष्ठमामाशयादिकम् । क्षोभयन्तः वेगप्रकर्षा न्नितरामालोडयन्तः । परिशिष्टं निगदव्याख्यातम् । अत्र आमाजीर्णैरित्यनवबोधपरिपठितः पाठो बहुवचनस्यानर्थक्यप्रसङ्गात् अतीसारं प्रति हेतुत्वेनानुभूयमानयोर्व्विदग्धविष्टब्धा जीर्णयोरप्राप्तेश्च ॥ ६ ॥

प्रतीकारानुगुणत्वादामपक्वलिङ्गान्युपदिदिक्षति संसृष्टमिति । संसृष्टं मिलितम् । सर्पिरिति । अत्र 'परार्थे प्रयुज्यमानः शब्दो वति मन्तरेणापि वत्यर्थं गमयती'ति न्यायात् सर्पिरादिवदित्युन्नेयम् । सर्पिरादौ तु समाहारद्वन्द्वे सत्यपि छन्यादित्यनेन प्रत्येकेषामेव सम्बन्धो लक्षणीयः, भेरीमृदङ्गं वादयेत्यादौ संहते-रनुपयोगिकत्वेन समाहारेपीतरेतरद्वन्द्ववत् समासनिविष्टप्रत्येकपदार्थस्यैव प्राधान्याभ्युपगमवत् । न चैतदश्रद्धेयं यदाह "समाहार परिभाषा तु

राजीमद्दा चन्द्रकैः सन्ततं वा पूयप्रख्यं कर्दमाभं तथोष्णम्।
हन्यादेनं यत् प्रतीपं भवेच्च चीणं हन्युश्चोपसर्गाः प्रभूताः ॥ ७ ॥
असंवृतगुदं चीणं दुराध्मातमुपद्रुतम्।
गुदे पक्वे गतोष्माणमतीसारकिणं त्यजेत् ॥ ८ ॥
शरीरिणामतीसारः सम्भूतो येन केनचित्।
दोषाणामेव लिङ्गानि कदाचिन्नातिवर्त्तते ॥ ९ ॥

क्लीवलिङ्गत्व-नित्यैकवचनत्वादि पदसंस्कारोपयोगितयैवोपपन्ना न तु द्वन्द्वस्यार्थ-व्यवस्थापिका" इति शब्दशक्तिप्रकाशिकायां जगदीशः। यत्र द्वन्द्वस्यार्थ-व्यवस्थापिका संहतिस्त्रापिकेति तदर्थः। मज्जचीरचौद्ररूपमिति पाठेतु सुगमम्। राजीमद्देति। राजीह नील पीतादिरेखेति प्रत्येतव्यम्। आमनन्तिहि "चन्द्रकैः शिखिपिच्छाभैर्नीलपीतादिराजिभिः। आवृतं वेशवाराम्बु मज्जचीरोपमं त्यजेत्" इति। चन्द्रकैर्मयूरपिच्छस्थैश्चन्द्राकारै रङ्कैः। एनमतीसारिणम्। प्रतीप मतीसार-प्रतीकार-प्रतिकूलं श्वासादिक मित्येतत्। वदन्ति हि "श्वास-शूलपिपासार्त्तं चीणं ज्वरनिपीड़ितम्। विशेषेण नरं वृद्ध मतीसारो विनाशयेत् ॥" इति ॥ ७ ॥

असंवृतगुदं गुदसंवरणशक्त्या विनाकृतम्। आध्माने हि स्वेदं विरेचन-श्चोपक्रमेषु प्रधानं मन्यन्ते, ते चातीसारे नोपशमाय कल्पेते, तदिदमुच्यते दुराध्मात-मिति। दुराध्मातं दुःखेनाध्मानेनानुगतम्। उपद्रुतं "शोथं शूलं ज्वरं तृष्णां श्वासं कासमरोचकम्। छर्द्दिं मूर्च्छाञ्च हिक्काञ्च दृष्ट्वातीसारिणं त्यजेत्।" इति स्मरणात् शोथादिभि रुपद्रवैः प्रपीड़ितमित्यर्थः। गतोष्माणं शीतगात्रम्। उक्त-लक्षण जनकत्वेन कुत्सितोऽतीसारोऽतीसारकः ॥ ८ ॥

भगवन्! दोषजादिकमतीसारषट्कं प्रकृत्योपदिष्टं वचनजातं श्रुत मवधारितञ्च सम्यक्। न च तावत् षण्णामेषामतीसाराणा मुपदेशेनैव सर्व्वेऽतीसारा उपदिष्टा विज्ञाता वा भवन्ति; येषां हेतुत्वेन मिथ्याति-युक्तान् स्नेहादीन् कृम्यादींश्च निरदिक्षत्। तदिदं जिज्ञासामहे शेषाणा मतीसाराणां

स्नेहाजीर्णनिमित्तस्तु बहुशूलप्रवाहिकः ।
विसूचिकानिमित्तस्तु चान्योऽजीर्णनिमित्तजः ॥
विषार्शःक्रिमिसम्भूतो यथास्वं दोषलक्षणः ॥
आमपक्वक्रमं हित्वा नातिसारे क्रिया यतः ।
अतः सर्व्वातिसारास्तु ज्ञेयाः पक्वामलक्षणैः ॥ १० ॥
तत्र लङ्घनमेवादौ पूर्व्वरूपेषु देहिनाम् ।
ततः पाचनसंयुक्तं यवाग्वादिक्रमो हितः ॥
अथ वा वामयित्वा तु शूलाध्माननिपीड़ितम् ।
पिप्पलीसैन्धवाम्भोभिर्लङ्घनाद्यैरुपाचरेत् ॥

किं नाम स्वलक्षणानीत्येवमाशंसूनपाकरोति शरीरिणामिति । अति-रोहितार्थमेतत् । ननु यदि सर्व्वेऽतीसारा दोषलिङ्गाः स्यु स्तर्हि कृतम-किञ्चित्करेण शोकजस्यामाजीर्णनिमित्तस्य चातीसारस्योपदेशेन ? नैष दोषः, तत्तन्निमित्तविशेषेणोत्पन्नानि तानि तानि विशिष्टलिङ्गान्यभिधातुं पृथक्त्वेन तयो रुपदेशात् ॥ ८ ॥

स्नेहेत्यादि । अत्र बहुशूलप्रवाहिक इति विशेषणं वातश्लेष्म-समुद्भूतत्व-मस्य प्रथयतीति नेयम् । विसूचिकेति । अन्योऽन्यविधः । विशेषणेनानेनात्र विसूचिकानिमित्ते "सूचीभिरिव गात्राणि" इत्यादि विसूचिकायां वक्ष्यमाणं लिङ्गजात मूह्यम् । एतावता सामान्याजीर्णनिमित्ततोऽयमतीसारो भिद्यत इत्युन्नेयम् । विषेति । अत्र प्रस्तुतत्वात् तेषां विषामजीर्णादीनां लक्षणान्यनतिक्रम्येति यथास्वम् । दोषलिङ्गानि सन्त्यत्रेति दोषलक्षणः । अकारो मत्वर्थीय बहुव्रीहिर्वा । आमेति निगदव्याख्यातम् ॥ १० ॥

तत्रेति । तत्र तयोर्मध्ये आदावामे इति बोध्यम् । आमपक्वक्रमं हित्वेति प्रागुप-देशात् । अथेति । नेह अथवेति निपातसमुदायो मन्तव्यो विधेरस्य भिन्नविषयाधि-कृतत्वेन पक्षान्तराश्रितत्वानुपपत्तेः । किन्तर्हि अथेत्यय मारम्भार्थः, वाशब्दोऽव-धारणार्थः, तु शब्दश्च विशेषणार्थः । तदयमर्थः—शूलाध्माननिपीड़ितमातुरं अथ वा प्रतीकारारम्भ एव वामयित्वा लङ्घनाद्यैः प्रक्रान्तत्वात् लङ्घनेन

कार्य्यश्च वमनस्यान्ते प्रायशो लघुभोजनम्।
खड्यूषयवागूषु पिप्पल्याद्येव योजयेत्॥
अनेन विधिना चामं यस्य वै नोपशाम्यति।
हरिद्रादिं वचादिं वा पिवेत् प्रातः स मानवः॥
आमातिसारिणां कार्य्यं नादौ संग्रहणं नृणाम्।
तेषां दोषा विबद्धाः प्राग्जनयन्त्यामयानिमान्॥
प्लीहपाण्ड्वामयानाह-मेहकुष्ठोदरज्वरान्।
शोफगुल्मग्रहण्यर्शः-शूलालसकहृद्ग्रहान्॥ १०॥

तथा पाचनानुविद्धयवाग्वादिभिरुपाचरेदित्यर्थः। उक्तमर्थं पुन र्विशिनष्टि कार्य्यश्चेति। अतीसारपूर्व्वरूपावस्थायां हि जाठरोऽग्निः समूलघातमुपहत-इवावभातीति ब्रुवन्ति "संग्रस्यापाम्" इत्यादि स्मरणात्। तथाविधाया मवस्थायां वमने कृतेऽग्नेस्तस्य वार्त्तापि सुदूरं निरस्यत इति निश्चीयते। "स्नेह पीतस्य वान्तस्य" इत्युपक्रम्य "कायाग्निर्मन्दो भवति देहिनाम्" इति चिं ३८ अं अतिक्रान्तावेक्षणात्। तदिदानीं चिं ३८ अं उपदिष्टं हृतदोष-प्रमाणेन तं तमाहारविधिं परिहृत्य आ सम्यगग्न्यभिवृद्धेः आ चारोग्य-दर्शनाल्लघुतरमाहारमुपयोक्तुं साम्प्रतमुक्तं कार्य्यश्चेति। खड्यूषोऽन्नपानाध्याये व्याख्यातः। अनेनेति। आममित्यकारो मत्वर्थीयः। आममामदोषानुविद्धं पूर्व्वरूपमित्यवसेयम्। हरिद्रादिर्वचादिश्च सू ३७ अं लक्षणीयः। अप्रति-कृतेषु हि पूर्व्वरूपेष्ववश्यं तैस्तैः सामैर्दोषैरतीसाराः प्रादुर्भवन्तीत्यामातीसारिणः प्रकृत्य प्रतीकारक्रममुपादिदिक्षति आमेति। अत्र नादाविति प्रतिषेधात् पश्चादिति सामान्येनार्थाक्षिप्ते सत्यपि बहुशो निःसृतदोषाणां क्षीणाना-मेवातीसारिणां संग्रहणं कार्य्यमित्यध्यवसेयम्। "क्षीणधातुबलार्त्तस्य बहु दोषोऽतिनिःसृतः। आमोऽपि स्तम्भनीयः स्यात् पाचनान्मरणं भवेत्।" इति स्मरणात्॥ १०॥

सशूलं बहुशः कृच्छ्राद्विबद्धं योऽतिसार्य्यते ।
दोषान् सन्निचितान् वाथ पथ्याभिः संप्रवर्त्तयेत् ॥
योऽतिद्रवं प्रभूतञ्च पुरीषमतिसार्य्यते ।
तस्यादौ वमनं कुर्य्यात् पश्चाल्लङ्घनपाचनम् ॥
स्तोकं स्तोकं विबद्धं वा सशूलं योऽतिसार्य्यते ।
अभयापिप्पलीकल्कैः सुखोष्णैस्तं विरेचयेत् ॥ ११ ॥
आमे च लङ्घनं शस्तमादौ पाचनमेव वा ।
योगाश्चात्र प्रवक्ष्यन्ते त्वामातीसारनाशनाः ॥
देवदारुवचामुस्ता-नागरातिविषाभयाः ।
कलिङ्गातिविषाहिङ्गु-सौवर्च्चलवचाभयाः ।
अभया धान्यकं मुस्तं बालकं बिल्वमेव च ॥
मुस्तं पर्पटकं शुण्ठी वचासातिविषाभयाः ॥
अभयातिविषा हिङ्गु बचा सौवर्च्चलं तथा ।
चित्रकं पिप्पलीमूलं वचाकटुकरोहिणी ।
पाठा वत्सकबीजानि हरीतकी महौषधम् ।
मूर्व्वा निर्द्दहनी पाठा चूषणं गजपिप्पली ॥

सशूलमिति । य आतुरः सन्निचितान् दोषान् सशूलमित्याद्युक्त-लक्षणमतिसार्य्यते तस्यातुरस्य तान् दोषान् वाथेति वा शब्दस्याथशब्दस्य च प्राग्वदर्थावगमात् प्रतीकारारम्भ एव प्रागेवेति यावत् । पथ्याभिरिति सामान्यशब्दस्य विशेषपरत्वात् "विरेचने स्यादमृता" इति तन्त्रान्तरीयानु-शासनाच्च कल्कीकृताभिरमृताभिरित्यूह्यम् । अमृता च "सूक्ष्मा कथिता मांसलामृता" इत्युक्तलक्षणा । वयन्त्ववस्थायामस्यामिरण्डतैलमप्युपयोजयामः ॥ ११ ॥

आम इति । आमे आमातीसारे । अत्राविशेषेण पाचनलङ्घने उपदिष्टे अपि यथाक्रममामदोषतारतम्याद् व्यवस्थेये । मूर्व्वेत्यादि । मूर्व्वानामौषधिः

सिद्धार्थका भद्रदारु शताह्वा कटुरोहिणी।
एला सावरकं कुष्ठं हरिद्रे कौटजा यवा:।
मेषशृङ्गीत्वगेले च क्रमिघ्नं वृश्चकाणि च॥
वृश्चादनी वीततरुर्वृहत्यौ द्वे सहे तथा।
एरण्डत्वक् च तैन्दुकी दाड़िमी कौटजी शमी॥
पाठा तेजोवती मुस्तं पिप्पली कौटजं फलम्।
पटोलं दीप्यको विल्वं हरिद्रे देवदारु च॥
विड़ङ्गमभया पाठा शृङ्गवेरं घनं वचा।
वचा वत्सकवीजानि सैन्धवं कटुरोहिणी॥
हिङ्गु वत्सकवीजानि वचाविल्वशलाटु च।
नागरातिविषा मुस्तं पिप्पल्यो वात्सकं फलम्॥
महौषधं प्रतिविषा मुस्तञ्चेत्यामपाचना:।
प्रयोज्या विंशतिर्योगा: श्लोकार्द्धविहितास्त्विमे॥
धान्याम्लोष्णाम्बुमद्यानां पिवेदन्यतमेन वा।
नि:क्काथान् वा पिवेदेषां सुखोष्णान् साम्बुसाधितान्।
निखिलेनोपदिष्टोऽयं विधिरामोपशान्तये॥ १२॥

"कालकुमार" इत्याख्यायते। निर्द्दहनीह भल्लातकी, तस्या वीजमत्र ग्राह्यम्। तदसहत्वानुभवे मूर्व्वैव देयेत्याहु:। एलेत्यादि। सावरकं लोध्रम्। मेषशृङ्गाजशृङ्गीति पर्य्यायौ। वृश्चकं कुटजम्। वृश्चादनी वन्दा कौटजा यवा इन्द्रयवा:। वीरतरुरर्ज्जुन:। सहे मुद्गमाषपर्ण्यौ, भिण्टीद्वयमित्यन्ये। एरण्डेत्यादि। तिन्दुको नाम 'गाव' इति परिचीयते। तस्येयं तैन्दुकी, त्वगित्यर्थादवगम्यते, सन्निहितैरण्डत्वक्साहचर्य्यात्। एतेनैव दाड़िमी कौटजी-त्यपि व्याख्येयम् अत्र दाड़िमतिन्दुकयो: फलत्वच मेव ग्राहयन्ति कुशला:, "फलन्तु दाड़िमादीनाम्" इति स्मरणात्। शम्या: सार:। तेजोवतीचव्यम्।

हरीतकीमतिविषां हिङ्गु सौवर्चलं वचाम् ।
पिबेत् सुखाम्बुना जन्तुरामातीसारपीड़ितः ॥
पटोलं दीप्यकं बिल्वं वचापिप्पलिनागरम् ।
मुस्तं कुष्ठं विड़ङ्गञ्च पिबेद्वापि सुखाम्बुना ॥
शृङ्गवेरं गुड़ूचीञ्च पिबेदुष्णेन वारिणा ॥
लवणान्यथ पिप्पल्यो विड़ङ्गानि हरीतकी ।
चित्रकं शिंशपा पाठा शार्ङ्गेष्टा लवणानि च ॥
हिङ्गु वृचकबीजानि लवणानि च भागशः ।
हस्तिदन्त्यथ पिप्पल्यः कल्कावचसमौ स्मृतौ ॥
वचा गुड़ूचीकाण्डानि योगोऽयं परमो मतः ।
एते सुखाम्बुना योगा देयाः पञ्च सतां मताः ॥
पयस्युत्क्वाथ्य मुस्तानां विंशतिं त्रिगुणाम्भसि ।
क्षीरावशिष्टं तत् पीतं हन्त्यामं शूलमेव च ॥ १३ ॥

एतान्येव पुन र्ह्रीवेरेण संयोज्य क्वाथविधिनोपयुयुञ्चति निःक्वाथानिति । अम्बु ह्रीवेरमित्यनर्थान्तरम् । निखिलेनेति । आमशब्देनेह शुद्ध आम एव प्रत्येतव्यः ॥ १२ ॥

शुद्धामदोषचिकित्सितानन्तरं वातानुविद्धामचिकित्सितमधिकरोति हरीतकीमित्यादिना। आमातिसारश्चात्र क्षतानुविद्ध एव बोद्धव्यः, परमतो वक्ष्यति हि "हन्त्यामं शूलमेव च" इति "निवृत्तेष्वामशूलेषु यस्य न प्रगुणोऽनिलः" इति च, नचैतदश्रद्धेयं "यदग्रे सन्दिग्धं तच्छेषान्निर्णीयते" इति हि न्यायः। श्लोकार्द्धेन सुखाम्बुना पञ्चयोगानुपदिदिक्षति लवणानीति। अत्र द्वावेवाथशब्दौ 'च' शब्दस्थानमधितिष्ठतः। शिंशपानामौषधिः "शिशु" इत्याख्यायते। शार्ङ्गेष्टा महाकरञ्जः। भागश इति। इदमत्रामनन्ति "माषिकौ हिङ्गुसिन्धूत्थम्" इति, तदिह "भागेऽप्यनुक्ते समता विधेया" इति सामान्य-शास्त्रमपाकृत्य लवणानीत्यादिना सार्द्धश्लोकेनोपदिष्टेषु योगत्रितयेषूपदिष्टानि

निवृत्तेष्वामशूलेषु यस्य न प्रगुणोऽनिलः।
स्तोकं स्तोकं रुजामच्च सशूलं योऽतिसार्य्यते॥
सचारलवणैर्युक्तं मन्दाग्निः प्रपिवेद्घृतम्।
क्षीरनागरचाङ्गेरी-कोलदध्यम्लसाधितम्॥
सर्पिरच्छं पिवेद्वापि शूलातीसारशान्तये।
दध्ना तैलं घृतं पक्वं सव्योषजातिचित्रकैः।
सविल्वपिप्पलीमूल-दाड़िमैर्वा रुगन्वितैः॥ १४ ॥

हिङ्गुलवणानि माषमात्रादनधिकानि ग्राहयितुमिदमुच्यते भागश इति। भागशः यथोपदेशं भागं भागं कृत्वेत्यर्थः। हस्तोत्यादौ कल्कीकृतयोः पिप्पली-नागरयोर्मिलितयोरेवार्द्ध सति विवन्धे दोषवलतारतम्यात् षोड़शधाऽष्टधा वा विभज्य यावदारोग्यदर्शनाद् दैनन्दिनमेकैकं भागं सुखाम्बुना प्रयोक्तुमिच्छन्ति कुशलाः। पयसीति। पयोऽत्रच्छागमेव॥ १३॥

अवस्थाविशेषहितये सर्पिषो यमकस्योपयुयुत्तति। निवृत्तेष्विति। आमशूलेषु आमाभिनिर्वृत्तानिर्व्वचनीयवेदना-विशेषेष्वित्यर्थः। यस्य पुनारुजामद् वातशूलानुविद्धं सशूलमामशूलानुविद्धञ्चातिसार्य्यत इत्यर्थनिष्कर्षः। अत्र रुजामदिति भूम्नि मतुप्। "मादुपधायाश्च मतोर्वोऽयवादिभ्यः" इति ८।२।६ पा० सू० न वः, यवादे राकृतिगणत्वात् "अकृतवत्वो मतुप् यवादिषु द्रष्टव्यः" इति काशिका च। क्षीरेत्यादि। अत्र नागरं कल्कीकृत्य स्नेहपादिकं देयम्। शेषाणि पञ्च द्रवाणि स्नेह समान्याहुः,—तत्र चाङ्गेर्य्याः स्वरसः कोलानां शुष्काणा-मेव क्वाथः। अम्लं काञ्जिकम्। कोलाम्लयोः साहचर्य्यात् दध्यप्यम्लमेव ग्राहयन्त्याचार्य्याः। दध्नेति। तैलघृतं यमकम्। अत्र व्योषादीनि रुगन्तानि कल्कः। दधि चतुर्गुणं, वीर्य्याधानार्थं जलमपि चतुर्गुणं देय मित्याहुः। अत्र जात्याः फलं जाति जातीफलमित्येतत् "फलेलुक्" इति पा० सू० ४।३।१६३ तद्धितो लुक्। दाड़िमं दाड़िमफलत्वक्। रुक् कुष्ठम्। पिवेदित्यादिना पूर्व्वेणान्वयः॥ १४॥

निखिलो विधिरुक्तोऽयं वातश्लेष्मोपशान्तये ।
तीक्ष्णोष्णावर्ज्जमेनन्तु विदध्यात् पित्तजे भिषक् ॥
यथोक्तमुपवासान्ते यवागूश्च प्रशस्यते ।
वलयोरंशुमत्याश्च श्वदंष्ट्राबृहतीषु च ।
शतावर्य्याश्च संसिद्धाः सुशीता मधुसंयुताः ॥
मुद्गादिषु च यूषाः स्युर्दीपनीयैः सुसंस्कृताः ।
मृदुभिर्दीपनैस्तिक्तैर्द्रव्यैः स्यादामपाचनम् ॥ १५ ॥
हरिद्रातिविषा पाठा वत्सवीजरसाञ्जनम् ।
रसाञ्जनं हरिद्रे द्वे वीजानि कुटजस्य च ॥
पाठा गुड़ूची भूनिम्बस्तथैव कटुरोहिणी ।
एतैः श्लोकार्द्धनिर्द्दिष्टैः क्वाथाः स्युः पित्तपाचनाः ॥
मुस्तं कुटजवीजानि भूनिम्बं सरसाञ्जनम् ।
दार्व्वी दुरालभा विल्वं वालकं रक्तचन्दनम् ॥
चन्दनं वालकं मुस्तं भूनिम्बं सदुरालभम् ।
मृणालं चन्दनं रोध्रं नागरं नीलमुत्पलम् ॥
पाठा मुस्तं हरिद्रे द्वे पिप्पली कौटजं फलम् ।
फलत्वचं वत्सकस्य शृङ्गवेरघृते वचा ॥
षड़ेतेऽभिहिता योगाः पित्तातीसारनाशनाः ।
विल्वशक्रयवाम्भोद-वालकातिविषाकृतः ॥

सम्प्रति तीक्ष्णमुष्णञ्च वर्ज्जयित्वामुमेव विधिं पित्तजेऽतिदिशति तीक्ष्णोष्णेति । यवागूर्व्विशिनष्टि वलयो रिति । फलत्वच मिति । "द्वन्द्वाच्चुदषहान्तात् समाहारे" इति पा० सू० ५।४।१०६ टच् । घृतमत्र "प्रक्षेपः पादिकः क्वाथ्यात्" इति वचनात् पादिकं प्रक्षेप्यम् ॥ १५ ॥

कषायो हन्त्यतीसारं सामं पित्तसमुद्भवम् ।
मधुकोत्पलबिल्वाम्र-ह्रीवेरोशीरनागरैः ॥
कृतः क्वाथो मधुयुतः पित्तातीसारनाशनः ।
यदा पक्वोऽप्यतीसारः सरत्येव मुहुर्मुहुः ॥
ग्रहण्या मार्दवाज्जन्तोस्तत्र संस्तम्भनं हितम् ॥
समङ्गा धातकीपुष्पं मञ्जिष्ठा लोध्रमुस्तकम् ।
शाल्मलीवेष्टकं रोध्रं वृक्षदाड़िमयोस्त्वचौ ॥
आम्रास्थिमध्यं लोध्रञ्च बिल्वमध्यं प्रियङ्गवः ।
मधुकं शृङ्गवेरञ्च दीर्घवृन्तत्वगेव च ॥
चत्वार एते योगाः स्युः पक्वातीसारनाशनाः ।
उक्ता य उपयोज्यास्ते सक्षौद्रास्तण्डुलाम्बुना ॥
मौस्तं कषायमेकं वा पेयं मधुसमायुतम् ।
लोध्राम्बष्ठाप्रियङ्ग्वादीन् गणान् नव प्रयोजयेत् ॥ १६ ॥
पद्मां समङ्गां मधुकं बिल्वजम्बुशलाटु वा ।
पिबेत् तण्डुलतोयेन सक्षौद्रमगदङ्करम् ॥

मधुकेत्यादि । आम्रशब्देनेह नवानाम्रपल्लवानेवोपयोजयामः प्रतीच्या-स्त्वाम्रास्थिमज्जानमेव ग्राहयन्ति । शाल्मलीवेष्टकं नाम शाल्मली-निर्य्यासः मोचरस इति प्रथते । वृक्षो वृक्षकः कुटज इत्यनर्थान्तरम् । चतुर्णामेषां क्वाथानां क्षौद्र तण्डुलाम्बुयोगेणोपयोग मिच्छति उक्ता इति । अत्र क्वाथ्यपादिकं क्षौद्रं क्वाथपादिकञ्च तण्डुलाम्बु नेयमित्याहुः । लोध्रेत्यादि । अत्र "विगन्धेन परामृष्टम्" इत्युपक्रम्य नवं द्रव्यं पुराणं वा ग्राह्यम् । इति सू० ३७ अ० उपदिष्टे सत्यपि शब्ददेवे ते त्रयो गणा अभिनवा एवातीसार-प्रशमनाय [illegible] [illegible]वेदयितुमिदमुच्यते नवानिति ॥ १६ ॥

पद्मेति । पद्मा लवङ्गम् । उदुम्बर उडुम्बर इति पर्य्यायौ, [illegible]

कच्छुरामूलकल्कं वा उदुम्बरफलोपमम् ।
पयस्या चन्दनं पद्मा सिता मुस्ताब्जकेशरम् ।
पक्वातीसारं योगोऽयं जयेत् पीतः सशोणितम् ॥
निरामरूपं शूलार्त्तं लङ्घनाद्यैश्च कर्षितम् ॥
नरं क्षाममवेत्याग्निं सक्षारं पाययेद् घृतम् ॥
बलाद्वयांशुमती कच्छुरामूलसाधितम् ।
मधूच्छितं समधुकं पिवेच्छूलैरभिद्रुतः ।
दार्व्वीविल्वकणाद्राक्षा-कटुकेन्द्रयवैर्घृतम् ।
साधितं हन्त्यतीसारं वातपित्तकफात्मकम् ॥
पयो घृतञ्च मधु च पिवेच्छूलैरभिद्रुतः ॥
सिताजमोदकट्वङ्ग-मधुकैरवचूर्णितम् ॥ १७ ॥
अवेदनं सुसम्पक्वं दीप्ताग्नेः सुचिरोत्थितम् ।
नानावर्णमतीसारं पुटपाकैरुपाचरेत् ॥
त्वक्पिण्डं दीर्घवृन्तस्य पद्मकेशरसंयुतम् ।
काश्मरीपद्मपत्रैश्चावेष्ट्य सूत्रेण तं दृढम् ॥
मृदावलिप्तं सुकृतमङ्गारेष्ववकूलयेत् ।
सिन्नमुद्धृत्य निष्पीड्य रसमादाय तं ततः ॥

भागित्वात् मध्यम मुदुम्बरफलं परिमाणेनोपमा यस्येत्युदुम्बरफलोपमम् । निरामेति । सक्षारं यथालाभमष्टमांशेन यव-स्वर्जिकायक्षारापामार्गचित्रकक्षारकल्केन चतुर्गुण जलेन च साधितमित्यर्थः । योगान्तरमाह वलेति । अंशुमती शालपर्णी मधूच्छितं मधुप्रक्षिप्तम् । अत्र बलादीनां क्वाथः, मधुकं कल्कः, शीते च मधु प्रक्षेप्यम् । पय इति । कट्वङ्गः श्योनाकः । अत्र सूक्ष्मचूर्णितानि सितादीनि चत्वार्य्यष्टमांशानि मधु च पादिकं घृतेन सह मिश्रीकृत्य तद् घृतसम्मितबलादीक्वथितसंशीताष्टगुणेन दुग्धेन पिवेत्युपदेशः ॥ १७ ॥

शीतं मधुयुतं कृत्वा पाययेतोदरामये।
जीवन्तीमेषशृङ्ग्यादिष्वेवं द्रव्येषु साधयेत्॥
तित्तिरं लुञ्चितं सम्यक् निष्कृष्टान्त्रन्तु पूरयेत्।
न्यग्रोधादित्वचां कल्कैः पूर्व्ववच्चावकल्पयेत्॥
रसमादाय तस्याथ सुस्विन्नस्य समाक्षिकम्।
शर्करोपहितं शीतं पाययेच्चोदरामये॥
लोध्रचन्दनयष्ट्याह्व-दार्व्वीपाठासितोत्पलान्।
तण्डुलोदकसम्पिष्टान् दीर्घवृन्तत्वगन्वितान्॥
पूर्व्ववत् कूलितात् तस्माद्रसमादाय शीतलम्।
मध्वाक्तं पाययेच्चैतत् कफपित्तोदरामये॥
एवं प्ररोहैः कुर्व्वीत वटादीनां विधानवित्।
पुटपाकान् यथायोगं जाङ्गलोपहिताञ्छुभान्॥ १८॥
अम्बष्ठादिमधुयुतं पिप्पल्यादिसमन्वितम्।
कौटजं फाणितञ्चापि हन्त्यतीसारमोजसा॥

त्वगिति। दीर्घवृन्तः श्योनाकः। अवकूलयेत् पाचयेत्, पुटपाकविध्यनुगमाद् वहिरालोहितवर्णतापत्तेरित्युन्नेयम्। तत इति द्वितीयान्तात् सार्व्वविभक्तिक स्तसिल्। त मातुरमित्यर्थः। तित्तिरमिति। तित्तिरो नाम पक्षी, "तितोर" इत्याख्यायते। लुञ्चितं चञ्चुपक्षादिभिरपसारितम्। अत्र पूर्व्ववदित्यनेन काश्मरी पत्रावेष्टनादिकमतिदिष्टम्। शर्करोपहितं शर्करया संसृष्टम्। सितोत्पलानिति पुंस्त्वमार्षम्। सितोत्पलं कुमुदपुष्पम्। कूलितान् पाचितान्। वटादीनां सू० ३८ अ० न्यग्रोधवर्गीयाणाम्। जाङ्गलोपहितान् जाङ्गलमांससंसृष्टान्॥ १८॥

अम्बष्ठेति। अम्बष्ठादिचूर्णेन मधुना च युतमम्बष्ठादि-मधुयुतम्, तथा

बहुश्लेष्मसरक्ताञ्च मन्दवातं चिरोत्थितम् ।
पृश्निपर्णीबलाबिल्व-बालकोत्पलधान्यकैः ॥
सनागरैः पिबेत् पेयां साधितामुदरामयी ॥ १९ ॥
अरलुत्वक्प्रियङ्गुञ्च मधुकं दाड़िमाङ्कुरान् ।
आवाप्य पिष्ट्वा दधनि यवागूं साधयेद्द्रवाम् ॥
एषा सर्व्वानतीसारान् हन्ति पक्वानसंशयम् ॥ २० ॥
रसाञ्जनं सातिविषं त्वग्बीजं कौटजं तथा ।
धातकीनागरञ्चैव पाययेत् तण्डुलाम्बुना ॥
सशूलरक्तजं घ्नन्ति योगा मधुसमन्विताः ।
मधुकं बिल्वपेश्यश्च शर्करामधुसंयुताः ।
अतीसारं निहन्युश्च शालिषष्टिकयोः कणाः ॥
तद्वल्लीढं मधुयुतं बदरीमूलमेव तु ।
बदर्य्यर्ज्जुनजम्बाम्र-शल्लकीवेतसत्वचः ॥

पिप्पल्यादि समन्वितञ्च कौटजं फाणितं कुटजत्वचो घनीभूतः क्वाथ इत्यर्थः । अत्र कुटजत्वचः प्रस्थद्वयमष्टगुणे जले पक्त्वाऽष्टमांशे शिष्टे क्वाथस्तं वस्त्रपूतं कृत्वा पुनः पचेत् । घनीभूते च तस्मिन् यथालाभं मिलितमम्बष्ठादीनां पिप्पल्यादीनाञ्च चूर्णं पलद्वयं शीते च मध्वपि पलद्वयं प्रक्षिप्य माक्षिकेण दध्ना यथाबलं मात्रां प्रयोज्य मात्रावदेव माक्षिकं दध्यन्नञ्चान्नकाले प्रयुञ्जीत इत्येवमुपदिशन्ति भिषजः प्राणानभिसरन्तः ॥ १९ ॥

अरल्विति । अरलुः श्योनाकः । अत्र पलद्वये दध्न्युपदेशपारम्पर्य्यादादेये अष्टपले च पानीयेऽरलुत्वगादीनां वस्त्रबद्धं कुसं कर्षं तण्डुलकर्षञ्च प्रक्षिप्य पचेत् । सुस्विन्नेषु च तण्डुलेषु वस्त्रबद्धं तद्भेषजजातं बहिष्कृत्य दर्व्वीघट्टनेन पेया कार्य्येत्येवमुपदिशन्ति प्राञ्चः ॥ २० ॥

रसाञ्जनमिति । योगा रसाञ्जनादिभ्यां द्वाभ्यां द्वाभ्यामुपदिष्टास्त्रय इत्युन्नेयम् । मधुकमिति । बिल्वपेश्यो बिल्वपेषिका बिल्वशलाटुश्चेति

शर्करा क्षौद्रसंयुक्ताः पीतास्नन्त्युदरामयम् ।
एतैरेव यवागूश्च मण्डान् यूषांश्च कारयेत् ॥
पानीयानि च तृष्णासु द्रव्येष्वेतेषु बुद्धिमान् ।
कृतं शाल्मलिवृन्तेषु कषायं हिमसंज्ञकम् ॥
निशापर्य्युषितं पेयं सक्षौद्रं मधुकान्वितम् ।
विबद्धवातविट्शूलपरीतः सप्रवाहिकः ॥
सरक्तपित्तश्च पयः पिबेत् तृष्णासमन्वितः ।
यथामृतं तथा क्षीरमतीसारेषु पूजितम् ॥
चिरोत्थितेषु तत् पेयमपां भागैस्त्रिभिः शृतम् ।
दोषशेषं हरेत् तद्धि तस्मात् पथ्यतमं स्मृतम् ॥
हितः स्नेहविरेको वा वस्तयः पिच्छिलाश्च ये ।
पिच्छिलास्वरसे सिद्धं हितञ्च घृतमुच्यते ॥
शकृता यस्तु संसृष्टमतिसार्य्येत शोणितम् ।
प्राक् पश्चाद्वा पुरीषस्य सरुक् सपरिकर्त्तिकः ॥
क्षीरिशुङ्गाशृतं सर्पिः पिबेत् सक्षौद्रशर्करम् ।
दार्व्वीत्वक्पिप्पलीशुण्ठी-लाक्षाशक्रयवैर्घृतम् ॥
संयुक्तं भद्ररोहिण्या पक्वं पेयादिमिश्रितम् ।
त्रिदोषमप्यतीसारं पीतं हन्ति सुदारुणम् ॥

पर्य्यायाः । कणा अतिसूक्ष्मांशास्तावेव मण्डीकृता एव बोध्याः । अतीसारे प्रस्तुतत्वात् पक्वमित्येव । विबद्धेति । रक्तेन पित्तेन चार्त्तः सरक्तपित्तो रक्तपित्तातिसारीति निष्कर्षः । पिच्छिलावस्तयः चि० ३८ अ० उपदिष्टाः । पिच्छिला शाल्मलिः । परिकर्त्तिका गुदे कर्त्तनवद्वेदनाविशेषः । क्षीरिणो नाम न्यग्रोधोदुम्बराश्वत्थ पारिश प्लक्ष पादपाः । तेषां शुङ्गाः क्षीरिशुङ्गाः ।

गौरवे वमनं पथ्यं यस्य स्यात् प्रबलः कफः ।
ज्वरे दाहे सविड्बन्धे मारुताद्रक्तपित्तवत् ॥
सम्पक्के बहुदोषे च विबन्धे मूत्रशोधनैः ।
कार्य्यमास्थापनं क्षिप्रं तथा चैवानुवासनम् ॥ २१ ॥
प्रवाहिणि गुदभ्रंशे मूत्राघाते कटिग्रहे ।
मधुराम्लशृतं तैलं सर्पिर्व्वाप्यनुवासनम् ॥
गुदपाकस्तु पित्तेन यस्य स्यादहिताशिनः ।
तत्र पित्तहराः सेकास्तत्सिद्धाश्चानुवासनाः ॥

दार्व्वीत्यादि । त्वगिह गुडत्वगेव । भद्ररोहिणी कटुरोहिणी । अत्र दार्व्व्यादीनां कल्को जलं चतुर्गुणम् । गौरव इति । अत्र प्रबलः कफ- इति विशेषणात् मध्यबलेऽल्पबले च कफे पाचनोपवासावभिनन्दन्त्याचार्य्याः इत्यध्यवसेयम् न चैतदश्रद्धेयं, च० सू० २२ अ० "येषां मध्यबला रोगा" इत्युपक्रम्य तथैवोपदेशात् । वमनविधानात् परमवस्था-विशेषे प्रायेण निरत्ययत्वात् विरेचनं हित्वास्थापनानुवासने प्रयुङ्क्ते । ज्वर- इति । अत्र प्रस्तुतत्वादतिसारिण इति गम्यते । विबन्धशब्देन च मूत्रविबन्ध एव प्रत्येतव्यः पारिशेष्यादनन्तरं मूत्रशोधनैरित्युपदेशाच्च । तदयमर्थः—मारुतात् सविड्—विबन्धे ज्वरे दाहे सम्पक्के बहुदोषे मूत्रविबन्धे च परिलक्षिते मूत्रशोधनैस्तृणपञ्चमूल्यादिभिरुपलक्षितं रक्तपित्तवत् "द्राक्षा घृतक्षौद्रसितायुतेन" इत्यादिना रक्तपित्ते वक्ष्यमाणवद् आस्थापनमनुवासनञ्च क्षिप्रं कर्त्तव्यम् । विलम्बिते हि विड्सादयस्ते रक्तेन सह संसृज्य नितरा- मत्ययाय सम्भवन्ते तदिदं साम्प्रतमुक्तं क्षिप्रमिति । केचिदत्र मूत्रशोधनैरिति सामान्येनोक्तेऽपि मूत्रविबन्धएव मूत्रशोधनान्युपयोज्यानि न पुनरितरत्रेत्याहुः । वयन्तु ब्रूमो मूत्रविरेचनस्यातिसारोपशमनत्वेन परिकलितत्वान्मूत्रस्य विशोध- कत्वेन (सू० १५ अं) उपदेशाच्चाभिहिते ज्वरादौ सत्यसत्यपि च मूत्रविबन्धे यथा दोषं मूत्रशोधनान्युपयोज्यानीति ॥ २१ ॥

प्रवाहिणीति । प्राक् नि० १३ अ० गुदभ्रंशस्य प्रवाहणमूलत्वेनोपदेशोऽपीह

दधिमण्डसुराविल्वसिद्धं तैलं समाहृते।
भोजने च हितं चीरं कच्छुरामूलसाधितम्॥
अल्पाल्पं बहुशो रक्तं सरुग् य उपवेश्यते।
यदावायुर्विबद्धश्च पिच्छावस्तिस्तदा हितः॥
प्रायेण गुददौर्ब्बल्यं दीर्घकालातिसारिणाम्।
भवेत् तस्माद्धितं तेषां गुदे तैलावचारणम्॥
कपित्थशाल्मलीफञ्जीवनकार्पासिदाड़िमाः।
पृतिकाकच्छुराशेलुः शणाश्मन्तः सदाहिका॥
शालपर्णी पृश्निपर्णी वृहती कण्टकारिका।
बला श्वदंष्ट्रा विल्वानि पाठानागरधान्यकम्॥
एष आहारसंयोगो हितः सर्व्वातिसारिणाम्।
तिलकल्को हितश्चात्र मौद्गो मुद्गरसस्तथा॥ २२ ॥
पित्तातिसारी यो मर्त्त्यः पित्तलानि निषेवते।
पित्तं प्रदुष्टं तस्याशु रक्तातीसारमावहेत्॥
ज्वरं शूलं तृषां दाहं गुदपाकञ्च दारुणम्।
यो रक्तं शकृतः पूर्व्वं पश्चाद्वा प्रतिसार्य्यते॥

प्रवाहिणेति विशेषणमतिसारनिमित्तं गुदभ्रंश व्यवच्छिनत्तीत्यनुसन्धेयम्। गुदेति। पित्तहराणां द्रव्याणामनेकत्वाद् वहुवचनं नानुपपन्नम्। दधीति। समाहृते वेदनादिभि रन्वितत्वेन वातानुविद्धतयोपलक्षिते गुदपाक इत्येव। तैलमनुवासनमित्युन्नेयम्। कपित्थेति। फञ्जी भार्गी। सदाहिका सचित्रका। मौद्ग इति अत्र समासान्तपदस्थोऽपि सन्निहितः कल्कशब्दो वुद्धा समाकृष्टतया अन्वीयते॥ २२ ॥

द्रव इति। योग मिमं स्तौति प्राणेवेति। योगानन्यान् हित्वा योगमिमं

सपल्लवैर्वटादीनां ससर्पिः साधितं पयः ।
पिबेत् सशर्कराक्षौद्रमथवाप्यभिमथ्य तत् ॥
नवनीतमथो लिह्यात् तक्रञ्चानुपिबेत् ततः ।
पियालशाल्मलीप्लक्ष-शल्लकीतिनिशत्वचः ॥
क्षीरे विमृदिताः पीताः सक्षौद्रा रक्तनाशनाः ।
मधुकं शर्करा लोध्रं पयस्यामथ सारिवाम् ॥
पिबेच्छागेन पयसा सक्षौद्रां रक्तनाशनीम् ।
मञ्जिष्ठां सारिवां लोध्रं पद्मकं कुमुदोत्पलम् ॥
पिबेत् पद्माञ्च दुग्धेन च्छागेनासृक्प्रशान्तये ॥ २३ ॥
शर्करोत्पललोध्राणि समङ्गा मधुकं तिलाः ।
तिला मोचरसो लोध्रं तथैव मधुकोत्पलम् ॥
कच्छुरा तिलकल्कश्च योगाश्चत्वार एव तु ।
आजेन पयसा पेयाः सरक्ते मधुसंयुताः ॥
द्रवे सरक्ते स्रवति बालबिल्वं सफाणितम् ।
सक्षौद्रतैलं प्रागेव लिह्यादाशु हितं हि तत् ॥ २४ ॥
कोशकारं घृते भृष्टं लाजचूर्णं सिता मधु ।
सशूलं रक्तपित्तोत्थं लीढं हन्त्युदरामयम् ॥
बिल्वमध्यं समधुकं शर्कराक्षौद्रसंयुतम् ।
तण्डुलाम्बुयुतो योगः पित्तरक्तोत्थितं जयेत् ॥

प्रथमत एव लिह्यात्, कुतः? आह आश्विति। हि यस्मात् तदाशुहितं सद्यःफलदम् ॥ २३-२४ ॥

कोशेति। कोशकारो नाम कौशेयवस्त्रोपादानभूततन्तूत्पादकः कीट विशेषः, तस्येद मिति कोशकारं 'कोया"इति प्रसिद्धे कोशे पक्कमिवाव-

गुदपाके च ये उक्तास्तेऽत्रापि विधयः स्मृताः।
रुजायां वाऽप्रशाम्यन्त्यां पिच्छावस्तिर्हितो भवेत् ॥
रक्तविड्दोषबहुलं दीप्ताग्निर्योऽतिसार्य्यते।
विडङ्गत्रिफलाकृष्णा-कषायैस्तं विरेचयेत् ॥
अथवैरण्डसिद्धेन पयसा केवलेन वा।
यवागूर्वितरेत् तस्य वातघ्नैर्दीपनैः कृताः ॥
दीप्ताग्निर्निष्पुरीषो यः सार्य्यते फेनिलं शकृत्।
स पिबेत् फाणितं शुण्ठीदधितैलपयोघृतम् ॥
स्विन्नानि गुडतैलाभ्यां भक्षयेद्बदराणि च।
सुस्विन्नान् पिष्टवद्वापि समं विल्वशलाटुभिः ॥
दघ्नोपयुज्य कुल्माषान् श्वेतामनुपिबेत् सुराम्।
शशमांसं सरुधिरं समज्ञां सघृतं दधि ॥
खादेद्विपाच्य सेवेत मृद्वन्नं शकृतः क्षये।
संस्कृतो यमके माष-यवकोलरसः शुभः ॥
भोजनार्थञ्च दातव्यो दधिदाडिमसाधितः।
विड्ं विल्वशलाटूनि नागरञ्चाम्लपेषितम् ॥
दघ्नः सरश्च यमके भृष्टो वर्च्चःक्षये हितम्।
सशूलं क्षीणवर्च्चा यो दीप्ताग्निरतिसार्य्यते ॥
स पिबेद्दीपनैर्युक्तं सर्पिः संग्राहकैः सह ॥ २५ ॥

स्विन्नं कीटजातम्। स्विन्नानीति। स्विन्नानि अनन्तराभिहित कुल्माष स्वेदन-साहचर्य्यात् पिष्टस्वेदनविधिनेति नेयम्। पिष्टस्वेदन-विधिमाहुः प्राञ्च स्तद् यथा—"अनेकच्छिद्रसंयुक्तशरावेण पिधाय च। जलार्द्धपूरितां स्थालीं चुल्लयासुपरि विन्यसेत्। स्वेद्यानि द्रव्यजातानि शरावेऽस्मिन्निधाय च। आच्छाद्यान्यशरावेण ज्वालां तावत्प्रदापयेत्। स्विन्नानि तानि यावत्स्युः

वायुः प्रवृद्धो निचितं बलासं नुदत्यधस्ताद्‌हिताशनस्य ।
प्रवाहमाणस्य मुहुर्मलाक्तं प्रवाहिकां तां प्रवदन्ति तज्ज्ञाः ॥
प्रवाहिका वातकृता सशूला पित्तात् सदाहा सकफा कफाच्च ।
सशोणिता शोणितसम्भवा तु ताः स्नेहरूक्षप्रभवा मतास्तु ॥
तासामतीसारवदादिशेच्च लिङ्गं क्रमञ्चामविपक्वताञ्च ।
न शान्तिमायाति विलङ्घनैर्य्या योगैरुदीर्णा यदि पाचनैर्वा ॥
ताः क्षीरमेवाशु शृतं निहन्ति तैलं तिलाः पिच्छिलवस्तयश्च ।
आर्द्रैः कुशैः संपरिवेष्टितानि वृन्तान्यथार्द्राणि हि शाल्मलीनाम् ॥
पक्वानि सम्यक् पुटपाकयोगेनापीड्य तेभ्यो रसमाददीत ।
क्षीरं शृतं तैलहविर्विमिश्रं कल्केन यष्टीमधुकस्य वापि ॥
वस्तिं विदध्याद्‌ भिषगप्रमत्तः प्रवाहिकामूत्रपुरीषसङ्गे ।
द्विपञ्चमूलीक्वथितेन शूलि प्रवाहमाणस्य समाक्षिकेण ॥
क्षीरेण चास्थापनमग्र्यमुक्तं तैलेन युञ्ज्यादनुवासनञ्च ॥ २६ ॥
वातघ्नवर्गे लवणेषु चैव तैलञ्च सिद्धं हितमन्नपाने ।
लोध्रं विडं विल्वशलाटु चैव लिह्याच्च तैलेन कटुत्रिकालम् ॥
दध्ना ससारेण समाक्षिकेण भुञ्जीत निःसारकपीडितस्तु ।
सुतप्तकुप्यक्वथितेन वापि क्षीरेण शीतेन मधुप्लुतेन ॥ २७ ॥

पित्तस्वेदे त्वयं विधिः ॥" शशेति । पञ्चकं शशमांसादिकं विपाच्य खादेत्, मृदवम् भवमत्स्यादिकञ्च सेवेतेति योजना ॥ २५ ॥

वायुरित्याद्यनुवासनञ्चेत्यन्तं निगद व्याख्यातम् । वातघ्नेति । वातघ्नवर्गे सू० ३७ अ० उक्ते भद्रदार्व्वादि वर्गे । लवणेषु सू० ४६ अं उक्तेषु सैन्धवादिषु । कटुत्रिकालं त्रिकटुवघुलम् । निःसारकोऽत्र प्रस्तत्वात् प्रवाहिका । सुतप्तेति । कुप्यं हैमरूप्येतरत् लोहादिकं, सुतप्तेन तेन पाचितं सुतप्तकुप्यक्वथितम् सुतप्तकुप्यप्रक्षेपेण पाचितम् इत्येतत् ॥ २६-२७ ॥

शूलार्हितो व्योषविदारिगन्धासिद्धेन दुग्धेन हिताय भोज्यः।
वातघ्नसंग्राहकदीपनीयैः कृतान्रसांश्चाप्युपभोजयेच्च ॥
खादेच्च मत्स्यान् रसमाप्नुयाच्च वातघ्नसिद्धं सघृतं सतैलम्।
एनाव्यजानान्तु वटप्रवालैः सिद्धानि साद्रपिशितानि खादेत् ॥
मेध्यस्य सिद्धन्त्वथवापि रक्तं वस्तस्य दध्ना घृततैलयुक्तम्।
खादेत् प्रयुक्तैः शिखिलावजैश्च भुञ्जीत यूषैर्दधिभिश्चमुख्यैः ॥
माषान् सुसिद्धान् घृतमण्डयुक्तान्खादेच्च दध्ना मरिचोपदंशान्।

मत्वारुजे मूत्रकृच्छ्रे भिषग्वस्तिं प्रदापयेत् ॥
पयोमधुघृतोन्मिश्रं मधुकोत्पलसाधितम् ॥
स वस्तिः शमयेत् तस्य रक्तं दाहमथो ज्वरम्।
मधुरौषधसिद्धञ्च हितं तस्यानुवासनम् ॥
रात्रावहनि वा नित्यं रुजार्त्तो यो भवेन्नरः।
यथा यथा सतैलः स्यात्तातशान्तिस्तथा तथा ॥

शूलेति। भोज्योऽन्नमितिशेषः। संग्राहकदीपनीयौ सू० ३८ अ० अवगाह्यादयो। रसमाप्नुयाद् विष्किरवर्गाभिहितानां मांसरसं पिबेदित्यर्थः। वटप्रवालैर्व्वटानां नवपल्लवैः। मेध्यस्येति। अत्रापिना पूर्व्वस्मात् पिशितानीति बहुवचनान्तः पिशितशब्दोऽर्थवशात् वचनव्यत्यासेनाकृष्यान्वेयः। तदयमर्थः—घृततैलयुक्तं घृततैलाभ्यां संस्कृतं मेध्यस्य खड्गि प्रभृतेः सिद्धं प्रागुक्तैणादिपिशितसाधनसाहचर्य्याद् वटप्रवालैः सह पक्वंमांसं वस्तस्य रक्तं वा दध्ना खादेत्। दधिभिरिति। अत्र 'गव्यमेव गुणोत्तरम्" इत्यतिक्रान्तावेक्षणात् मुख्यैरिति विशेषणेनेह गव्यं दध्येवाभिप्रेयते। तच्च दीपनादिगुणयोगात् परिस्रुत मसारं शृतक्षीरभवञ्चादितसन्ति भिषज स्त्वरितं प्रवाहिकामपाकर्त्तुं मातोबहुवचनमनुपपन्नम्। दधिभिः प्रयुक्तैर्मिश्रीकृतै रित्यर्थः। माषानिति। मरिचोपदंशान् मरिचोपकरणान्। रात्राविति। अत्र वाशब्दाद्

प्रशान्ते मारुते वापि शान्तिं याति प्रवाहिका ।
तस्मात् प्रवाहिकारोगे मारुतं शमयेद्भिषक् ॥ २८ ॥
पाठाजमोदाकुटजस्य बीजैः शुण्ठीसमा मागधिकाश्च पिष्टाः ।
सुखाम्बुपीताः शमयन्ति रोगं मेध्याण्डसिद्धं सघृतं पयो वा ॥
शुण्ठी घृतं सचवकं सतैलं विपाच्य लीढ़ामयमाशु हन्यात् ।
गजाशनाकुम्भिकदाड़िमानां रसैः कृते तैलघृते सदध्नि ॥
विल्वान्विता पथ्यतमा यवागूर्धारोष्णादुग्धस्य तथा च पानम् ।
लघूनि पथ्यान्यथ दीपनानि स्निग्धानि भोज्यान्युदरामयेषु ॥
हितायनित्यंवितरेद्भिभोज्यं योगांश्चतांस्तान्भिषग प्रमत्तः ।
तृष्णापनयनी लघ्वी दीपनी वस्तिशोधनी ॥
ज्वरेचैवातिसारे च यवागूः सर्व्वदा हिता ।
रौक्ष्याज्जाते क्रिया स्निग्धा रुक्षा स्नेहनिमित्तजे ॥
भयजे सान्त्वनापूर्व्वा शोकजे शोकनाशिनी ।
विषार्शःक्रिमिसम्भूते हिता चोभयशर्म्मदा ॥
छर्द्दिमूर्च्छातृड़ाद्यांश्च साधयेदविरोधतः ॥ २९ ॥

राजयक्ष्मा कफमयोरपोति समुच्चोयते। रुजार्त्तो यो नरः यथा यथा सतैलः अनुवासनेन दग्धविल्वगुड़नागरचूर्णादिना मह लेहादिविधिना च शीलिततैलो भवेत्तथा तथा तस्य वातशान्तिः स्यादित्यर्थ-निष्कर्षः ॥ २८ ॥

पाठेति। मेध्याण्डसिद्धं छागाण्डसिद्धम्। शुण्ठीति। अत्र शुण्ठीचवकयोरर्द्धं घृतं तैलं जलञ्च चतुर्गुणं देयम्। आमयोऽत्र प्रस्तुतत्वात् प्रवाहिका। गजाशना शल्लकी, कुम्भिका नामौषधिः जले जायते, "पाना" इति परिचीयते। एतेनेतदुक्तं भवति गजाशनादीनां चतुर्गुणे रसे समघृते तैलघृते पक्वा ते कर्षार्द्धमात्रे तस्मात्रं विल्वशलाटु कर्षमात्रांश्च तण्डुलान् पलमात्रं दधि पाकसौष्ठवार्थं कुड़वमात्रञ्च जलं संगृह्यैकध्यं पक्वा यवागूः कार्य्येत्युपदिशन्ति प्राञ्चः। दृढ़प्रतिपत्तये उक्तमर्थमनुवदति हितायेति। हेतुविपर्य्यासेन

समवाये तु दोषाणां पूर्व्वं पित्तमुपाचरेत्।
ज्वरे चैवातिसारे च सर्व्वत्रान्यत्र मारुतम्॥ ३० ॥
यस्योच्चारं विना मूत्रं सम्यग्वायुश्च गच्छति।
दीप्ताग्नेर्लघुकोष्ठस्य स्थितस्तस्योदरामयः॥ ३१ ॥

प्रतिकर्त्तुमुपदिदिक्षति रौक्ष्यादिति। सान्त्वनात भयापहवाक्यादिना भयापनयनम्। उभयशर्म्मदा विषादिहराऽतीसार-हराचेत्यर्थः। अविरोधतोऽतीसाराविरोधिनेत्यर्थः॥ २८ ॥

समवाय इति। अत्र संशयः किमिह समवायशब्दः सन्निपातसामान्यं उताहो सन्निपातविशेषमवगमयतीति मीमांसामहे। कुतः पुनः संशयः? उच्यते, अस्ति ह्यायुर्व्वेदविदां सन्निपातज्वरचिकित्सितं प्रति वचनविशेषसमाम्नायः। "कफस्थानानुपूर्व्व्या वा सन्निपातज्वरं जयेत्" इति च० चि० १ अ०, तथा "सन्निपात ज्वरं पूर्व्वं कुर्य्यादामकफापहम्। ततः श्लेष्मणि संक्षीणे शमयेत् पित्तमारुतौ।" इति प्राञ्चः। किन्तावन्नः प्रतिभाति? प्रवृद्धपित्तत्वेन सन्निपातविशेष इति। यदि हि सन्निपातशब्दः सन्निपातसामान्य मवगमयतीति ब्रवीषि तर्हि प्रदर्शितं चरकादि वचनद्वितयं ते गलग्रहः सम्पत्स्यते येन नावकाशो भविष्यति किमपरमभिधातुम्! वचनद्वितयं हि तत् कफानुपूर्व्व्या सन्निपातं चिकित्सितु मुपदिशति। वचनश्चैतत् पित्तानुपूर्व्वीति। न तावद् गलग्रहः। वचनयोस्तयोः कफोल्वनसन्निपात विषयत्वेन समाधानात्। नन्वश्लेषमेतत् पित्तात् किञ्चिन्न्यूनेऽपि हि श्लेष्मण्यामाशये तिष्ठति विरेचनं पित्तहराणां श्रेष्ठतम मिति ज्ञात्वा विरेचनं पीतमामाशयस्थं तत् श्लेष्मजातं वेगेनाधोगमयदवश्यं विकर्त्तुं प्रभाविष्यतीति ब्रूमः "वमनं श्लेष्महराणां श्रेष्ठतमम" इति स्मरणात् श्लेष्मणः पित्ताशयादेः क्लेदकत्वाच्च। समवायशब्दोऽयं पित्तोल्वनसन्निपातमवगमयतीति नेयम्॥ ३० ॥

अतीसारनिवृत्तिलक्षणमाह माह यस्येति। उच्चारः पुरीषमित्यनर्थान्तरम्। उदरामयोऽत्र प्रस्तुतत्वादतीसारः। अत्र हि शकृता मिश्रीभाव मापन्नस्यापरस्यांशस्य वायुनाधःसरणादतीसारो भवतीति निरदिक्षत् "संशम्यापाम्" इत्यादिना। स चेदापरोंऽशो मूत्ररूपेण परिणमते वायुश्च पुरीषं हित्वैव गुदतः

कर्म्मजा व्याधयः केचिद्दोषजाः सन्ति चापरे ।
कर्म्मदोषोद्भवाश्चान्ये कर्म्मजास्तेष्वहेतुकाः ॥
नश्यन्ति त्वक्रियाभिस्ते क्रियाभिः कर्म्मसंचये ।
शाम्यन्ति दोषसम्भूता दोषसंचयहेतुभिः ॥
तेषामल्पनिदाना ये प्रतिकृष्टा भवन्ति च ।

प्रवर्त्तते तद्ध्वंसमवायिकारणात्मिकायाः सम्प्राप्तेर्नाशादवश्यं कार्य्यभूतस्यातीसारस्यापि नाशो निरूप्यते, तदिदं साम्प्रतमुक्तं स्थित इति। स्थित इति 'ष्ठा गतिनिवृत्तौ" इति धात्वर्थस्मरणात् सरणशीलस्यातीसारस्य निवृत्तगतिकत्वेनोपलम्भादतीसारोऽयं समूलकाषमाकषित इति गम्यते ॥ २१ ॥

कर्म्मजा इति। नन्विदमामनन्ति "पूर्व्वजन्मकृतं पापं नरकस्य परिक्षये। वाधते व्याधिरूपेण तस्य कृच्छ्रादिभिः शमः। कुष्ठञ्च राजयक्ष्मा च प्रमेहो ग्रहणी तथा। मूत्रकृच्छ्राश्मरीकासा अतीसार भगन्दरौ।" इति शातातपीयाः। तदिदं जिज्ञासामहे किम् खलु भगवन् पूर्व्वजन्मकृतपापजत्वेन कृच्छ्राद्युपशमनत्वेन चोपदिष्टमिममतीसारं युक्तिव्यपाश्रयै रेभि र्भेषजजातै रसमीक्ष्यकारीव प्रतीकर्त्तुं समीहसे इत्येवमाशंसूनपाकर्त्तुं व्याधीनेतान् त्रेधा विभजते कर्म्मजा इति। कर्म्मजाः पूर्व्वजन्मकृतपापोत्पन्नाः ऐहिकोत्कटपापोत्पन्नाश्चेति ब्रूमः "अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते" इति स्मरणात्। कर्म्मदोषोद्भवाः पापदोषमूलाः। तान् पुनः विवृणोति। कर्म्मजा इति। तेषु कर्म्मजादिषु मध्ये कर्म्मजा अहेतुका मिथ्याहाराचाराद्यनपेक्षाः। तुकारेण तान् पुनर्विंशिनष्टि। ते पुनः कर्म्मजा अक्रियाभि र्युक्तिव्यपाश्रयक्रियातिरिक्ताभिः क्रियाभि र्जपहोमादिभिः कृच्छ्रादिभिश्च प्रायश्चित्तै रित्यर्थनिष्कर्षः। स्मरन्ति हि "दुष्कर्म्मजा नृणां रोगाः" इत्युपक्रम्य "जपैः सुरार्च्चनै र्होमै र्दानैस्तेषां शमो भवेत्।" तथा "कृच्छ्रादिभिः शमः" इति। तेषामिति। एवशब्दस्थानाधिष्ठानोऽयं च शब्दः। प्रतिकृष्टाः नितरां दुःखदत्वेनाधमाः इत्यर्थः। "निकृष्ट प्रतिकृष्टार्व्वरेफयापशावमाधमाः" इत्यमरः। प्रतिकष्टा इति पाठेतु प्रतिगतं कष्टं येभ्यस्ते तथोक्ताः दुःखहितव इत्यर्थः। तदय मर्थः—तेषां मध्ये ये अल्पनिदाना-

मृदवो बहुदोषा वा कर्म्मदोषोद्भवास्तु ते ॥
कर्म्मदोषक्षयकृतातेषां सिद्धिर्विधीयते ॥ ३२ ॥
दुष्यति ग्रहणी जन्तोरग्निसादनहेतुभिः ॥
अतिसारे निवृत्तेऽपि मन्दाग्नेरहिताशिनः ॥
भूयः सन्दूषितो वह्निर्ग्रहणीमभिदूषयेत् ।
तस्मात् कार्य्यः परीहारस्त्वतीसारे विरिक्तवत् ॥
यावन्न प्रकृतिस्थः स्याद्दोषतः प्राणतस्तथा ।
षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता ॥
पक्वामाशयमध्यस्था ग्रहणी सा प्रकीर्त्तिता ।
ग्रहण्या बलमग्निर्हि स चापि ग्रहणीश्रितः ॥
तस्मात् सन्दूषिते वह्नौ ग्रहणी सम्प्रदुष्यति ॥ ३३ ॥

ये वा मृदवो नातिबलवल्लिङ्गा अतएव अबहुदोषा अल्पदोषलिङ्गा अपि प्रतिकृष्टा स्ते कर्म्मदोषोद्भवा एवेत्यर्थः। स्मर्य्यते च "महारम्भोऽल्पके हेतावन्तिमो दोषकर्म्मजः" इति शातातपीयं। अत्रान्तिमः कर्म्मजदोषजापेक्षया तृतीय-इत्यर्थः। कर्म्मदोषक्षयकृता दैवव्यपाश्रयेण युक्तिव्यपाश्रयेण च प्रत्यनीकेन कर्म्मणा तेषां कर्म्मदोषोद्भवानां सिद्धिः प्रतीकार-निष्पत्तिः। एवञ्च दोषजानामतीसाराणां प्रतीकारार्थं मिदं युक्तिमाश्रित्य भेषजविधानं नानुपपन्न-मित्याभिसन्धिः ॥ ३२ ॥

ग्रहणीरोगमधिकरोति दुष्यतीति। कुतस्त्वेवमुच्यत इत्यत आह अतीसार इति। तस्मादिति अत्र विरिक्तवदित्यनेन आतुरोपद्रवचिकित्सितोक्तं विधिमतिदिशतीति नेयम्। षष्ठीति। परिकीर्त्तिता गर्भव्याकरणसमाख्ये शारीरे स चाग्निः पित्तमित्येतद्, ग्रहणीश्रित इति ग्रहणीश्रितत्वं तु पित्तकोषसंश्रयिणो हंसपक्षनालाकारात् स्रोतस स्तत्रैव पित्तसम्पातान्नेयम् ॥ ३३ ॥

एकशः सर्व्वशश्चैव दोषैरत्यर्थमुच्छ्रितैः ॥
सा दुष्टा बहुशो भुक्तमाममेव विमुञ्चति ।
पक्वं वा सरुजं पूति मुहुर्बद्धं मुहुर्द्रवम् ।
ग्रहणीरोगमाहुस्तमायुर्व्वेदविदो जनाः ॥
तस्योत्पत्तौ विदाहोऽन्ने सदनालस्यतृट्क्लमाः ।
बलक्षयोऽरुचिः कासः कर्णक्ष्वेड़ान्त्रकूजनम् ॥
अथ जाते भवेज्जन्तुः शूनपादकरः कृशः ।
पर्व्वरुग्लौल्यतृट्छर्द्दि-ज्वरारोचकदाहवान् ॥
उद्गिरेच्छुक्ततिक्ताम्ल-लोहधूमामगन्धिकम् ।
प्रसेकमुखवैरस्य-तमकारुचिपीड़ितः ॥
वाताच्छूलाधिकैः पायुहृत्पार्श्वोदरमस्तकैः ।
पित्तात् सदाहैर्गुरुभिः कफात् त्रिभिस्त्रिलक्षणैः ।
दोषवर्णनखैस्तद्वद्विण्मूत्रनयनाननैः ॥
हृत्पाण्डूदरगुल्मार्शः-प्लीहाशङ्की च मानवः ॥
यथादोषोच्छ्रयं तस्य विशुद्धस्य यथाक्रमम् ।
पेयादिं वितरेत् सम्यग्दीपनीयोपसंभृतम् ॥
ततः पाचनसंग्राहि-दीपनीयगणत्रयम् ।
पिवेत् प्रातः सुरारिष्ट-स्नेहमूत्रसुखाम्बुभिः ॥
तक्रेण वाथ तक्रं वा केवलं हितमुच्यते ।
कृमिगुल्मोदरार्शोघ्नीः क्रियाश्चात्रावचारयेत् ॥

एकश इति । क्लमलक्षणम् शां ४ अ० अनुसन्धेयम् । कर्णक्ष्वेड़ः कर्णे वंशीनि-नादवच्छब्दः । लौल्यं सर्व्वरसाभ्यवहाराभिलाषः । पाचनादिगणत्रयं सू० ३८ अम्

चूर्णं हिङ्ग्वादिकञ्चात्र घृतं वा ग्रीहनाशनम्।
कल्केन मगधाद्येश्च चाङ्गेरीस्वरसेन वा॥
चतुर्गुणेन दध्ना च घृतं सिद्धं हितं भवेत्।
सर्व्वथा दीपनं सर्व्वं ग्रहणीरोगिणां हितम्।
ज्वरादीनविरोधाच्च साधयेत् स्वैश्चिकित्सितैः॥ ३४॥

इति सुश्रुतसंहितायामुत्तरतन्त्रेऽतिसारप्रतिषेधो नाम चत्वारिंशोऽध्यायः॥ ४०॥

चनुसन्धायाध्यवसेयम्। हिङ्ग्वादिकं महावातव्याधावुपदिष्टम्। कल्केनेति। मगधादेः सू० ३८ अ० उक्तस्य पिप्पल्यादेः। अत्र घृतात् पादः पिप्पल्यादेः कल्कः; चाङ्गेरीस्वरसोऽपि चतुर्गुण एवेत्याहुः प्राञ्चः। चाशब्दोऽयं चाङ्गेरीस्वरसं चतुर्गुणं नेतुं नियमयति। परिशिष्ट मतिरोहितार्थम्। ३४॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे अतीसार प्रतिषेधोनाम चत्वारिंशोऽध्यायः॥

एकचत्वारिंशोऽध्यायः।

अथातः शोषप्रतिषेधं व्याख्यास्यामः॥ १॥
अनेकरोगानुगतो बहुरोगपुरोगमः।
दुर्व्विज्ञेयो दुर्निवारः शोषो व्याधिर्महाबलः॥
संशोषणाद्रसादीनां शोष इत्यभिधीयते।
क्रियाक्षयकरत्वाच्च क्षय इत्युच्यते पुनः॥
राज्ञश्चन्द्रमसो यस्मादभूदेष किलामयः।
तस्मात् तं राजयक्ष्मेति केचिदाहुर्मनीषिणः॥ २॥
स व्यस्तैर्जायते दोषैरिति केचिद्वदन्ति हि।
एकादशानामेकस्मिन् सान्निध्यात् तन्त्रयुक्तितः॥

यथा च पूर्व्वाध्याये चिन्तितोऽतिसारः शरीरक्षयकरत्वेनोपलभ्यते विभज्यते च त्रेधा कर्म्मजत्वादिभेदेन, तथैव शोषोऽपीति "पूर्व्वजन्मकृतं पापं नरकस्य परिक्षये" इत्यादिभिः शातातपीयैः सूचयाम्बभूवेति क्षयकरत्व-त्रिविधत्व-साधर्म्यादतीसारप्रतिषेधानन्तरं शोष प्रतिषेधमधिकरोति अथात इत्यादिना॥ १॥

प्रथमं तावत् शोषस्य तटस्थलक्षणमाह अनेकेति। बहवः शोथादयो रोगा अनुगता अस्येत्यनेकरोगानुगतः। भूयांसश्च प्रतिश्यायादयो व्याधयोऽस्य पुरःसरा अस्येति बहुरोगपुरोगमः। सपर्य्यायं शोषशब्दं निर्व्वक्ति संशोषणादित्यादिना। राज्ञ इति। मनीषिणो वादरायणादयः। ते हि कालिकापुराणादौ चन्द्रमसं प्रति क्रुद्धस्य दक्षप्रजापतेर्मुखान्निःसृतो मूर्त्तिमान् यक्ष्मा तमञ्जसा प्रपीडयाम्बभूवेति ज्ञात्वा राजयक्ष्मेति नामधेयं निरदिक्षन्॥ २॥

व्याधेरस्यैकत्वं त्रिदोषजत्वञ्च सुदृढ़ं प्रतिपिपादयिषुः परमत मनूद्य परिहरति स व्यस्तैरिति। एवशब्दस्थानाधिष्ठानोऽयं हिशब्दो भिन्नक्रमेणान्वीयते। स राजयक्ष्मा व्यस्तैर्दोषैर्जायत एवेति केचित् पाराशरीयास्ते-

क्रियायाश्चाविभागेन प्रागेवोत्पादनेन च।
एक एव मतः शोषः सन्निपातात्मको ह्यतः॥
उद्रेकात् तत्र लिङ्गानि दोषाणां निपतन्ति हि॥ २॥

वासिनो वदन्तीति समन्वयः। तथाच "क्षयाः पञ्चैव विज्ञेया स्त्रिभिर्दोषै-स्त्रयस्तते। चतुर्थः सन्निपातेन पञ्चमः स्यादुरःक्षतात्।" इत्येतच्छार्ङ्गधरीयं पाराशरीयोपदिष्टमित्याहुः प्राञ्चः। तत्तु न सम्यगित्याह एकेति। असति बाधे सर्व्वं वाक्यं सावधारणं हि न्यायस्तदेवं व्याख्येयम् एकस्मिन्नेव शोषे एकादशानां वातपित्तकफजत्वेन विवक्षितानां स्वरभेदादीनां सान्निध्यात् स्वलक्षणत्वेन सन्निहितत्वात् तथा क्रियाणां प्रतीकाराणामविभागेन तं तं वातजादिशोषं प्रत्यविभज्योपदेशादित्यर्थः, प्राक् पूर्व्वरूपावस्थायामुत्पादनेन श्वासाङ्गसादेत्यादीनां परमतो वक्ष्यमाणानां लिङ्गानामविशेषेणैव दोषैः सञ्जन-नाच्च तन्त्रयुक्तितः सन्दिग्धपदार्थं निर्णयसाधनत्वेन उं ६५ अ० वक्ष्यमाणां पदार्थ-समाख्यां तन्त्रयुक्तिं द्वारीकृत्य अत इति प्रथमान्तात् सार्व्वविभक्तिक स्तसिल्, अयं शोषो हि निश्चितं सन्निपातात्मक एक एव मतोऽज्ञात इत्यर्थः। अथ चेद् व्यस्तैर्दोषैः शोषोऽभविष्यत् तर्हि एकादशानां त्रिदोषनिमित्तानां स्वरभेदादीनां लिङ्गानामेकस्मिन्नेव शोषे समन्वयो नाऽभविष्यत् नापिचादिकर्त्ता स भगवान् स्वयम्भूः कथमप्यविशेषेणैव शोषिणं प्रतिकर्त्तुमुपादिक्षत् उताहो वातज-त्वादि भेदमनपेक्ष्य पूर्व्वरूपाणा मुपदेशं नाकरिष्यत् अतस्तेते रूपप्रायूपे क्रियाया अविभागञ्चाभिसमीक्ष्य सान्निपातिकमेकमेव शोषं पश्याम इत्याकूतम्। नन्विहैकादशानां त्रिदोषलिङ्गानां सान्निध्यादेव शोषस्य सान्निपातिकत्वेऽभ्युपगते-ऽभ्युपगतहानं तावद्दोष आपतति परमतः पित्तश्लेष्मनिमित्ते स्त्रिभिर्लिङ्गै रुपलक्षितस्यापि शोषस्योपदिदिक्षितत्वात् वक्ष्यहि हि "त्रिभिर्व्वा पीड़ितं लिङ्गै र्ज्वरकासासृगामयैः" इति, अत्र कासः कफजः शोषौतु पित्तजावित्युपपत्स्यते स्वरभेदोऽनिलादित्यादिना वक्ष्यमाणेनेत्येव मनुयुयुक्षूनपाकरोति उद्रेकादिति। उद्रेकादातिशय्याल्लिङ्गानि निपतन्त्यनुद्रेकात्तु नैवेत्यर्थादाक्षिप्यते। न चैतद-श्रद्धेयम् "विरुद्धगुणसन्निपाते भूयसाऽल्प मवजीयते" इति हि न्यायः। एवञ्च त्रिदोषलिङ्गाना मुपलम्भेऽपि सान्निपातिकत्वानपक्रमणान्नाऽभ्युपगतहानं नाम दोषो गन्धमात्रेणापराभ्रष्टत इति हृदयम्॥ २॥

क्षयाद्वेगप्रतीघाताद्व्यायामाद्विषमाशनात् ।
जायते कुपितैर्दोषैर्व्याप्तदेहस्य देहिनः ॥ ४ ॥
कफप्रधानैर्दोषैर्हि रुद्धेषु रसवर्त्मसु ।
अतिव्यवायिनो वापि क्षीणे रेतस्यनन्तरा ।
क्षीयन्ते धातवः सर्व्वे ततः शुष्यति मानवः
भक्तद्वेषो ज्वरः श्वासः कासः शोणितदर्शनम् ।
स्वरभेदश्च जायन्ते षड्‌रूपे राजयक्ष्मणि ॥ ५ ॥

क्षयादिति। क्षयादत्यन्तरमणादिना धातुक्षयात्, वेगप्रतीघातात् वातमूत्रपुरीषादीनां वेगावरोधात् "वेग मागतं वातमूत्रपुरीषाणां निगृह्णाति यदा नरः।" इत्यात्रेयश्च। व्यायामाद् बलवद्विग्रहादितः, विषमाशनं 'सू० ४६ अ०' लक्षणतो निवेदितम्। कफेति। कफःप्रधानं येषां ते स्तथोक्ते रित्येवं विग्रहः। अत्र येषामिति निर्द्धारणषष्ठ्या निष्पादितत्वात् येषां वातपित्त कफानां मध्ये प्रधानं कफ इत्येव विग्रहवाक्यानुवादः। तथाच कफान्यदोष-व्यावृत्त-दोषा-भिन्न-प्रधानाभिन्न-कफसम्बन्धिभि रिति विग्रहवाक्यार्थः। एवञ्च वातपित्त कफस्वरूप दोषत्रय परामर्शक यच्छब्दोत्तरं बहुवचनं नानुपपन्नम्। बहुव्रीहि हि विग्रह निविष्टात् समास निविष्टाद्वा अन्यस्य पदस्यार्थे भवतीति "स्वावयवेन विग्रहः समुदायः समासार्थो यथा बहुवृक्षं वनम्" इति रक्षित समाधानावधानं नास्माभिः क्रियते एकदेश समुदायभाव मादाय समासस्य समर्थनीयत्वे सत्यपि बहुवृक्षं वन मिति दृष्टान्ते निर्द्धारणार्थानवगमात्। कफस्य प्राधान्यन्त्वत्रादृष्टवशादेव भवतीति प्रत्येतव्यम् केशसीमन्तकृति ज्वरे यथा सीमन्तास्तद्वत्। रस-वर्त्मसु रसवहधमनीष्वित्यर्थः। आयुर्व्वेद इदमा-मनन्ति—"शुक्रायत्तं बलं पुंसाम्" इति तत्र बलं सामर्थ्यं शक्तिरित्यनर्थान्तरम्। तस्मिंश्च क्षीणे तत्परिपोषणाय प्रवृत्तो मज्जा क्षीयते, मज्जनि च क्षीणे अस्थीत्येव मुत्तरोत्तरेषु क्षीणेष्वनन्तरा धातवः क्षीयन्ते यथा क्षीणे च केदारादौ तत्तत्परिपोषकाः कुल्यादयः क्षीयन्ते तद्वदित्यतः साम्प्रतमुक्तं क्षीणे रेतसीति ॥ ४।५ ॥

स्वरभेदोऽनिलाच्छूलं सङ्कोचश्चांसपार्श्वयोः।
ज्वरो दाहोऽतिसारश्च पित्ताद्रक्तस्य चागमः॥
शिरसः परिपूर्णत्वमभक्तच्छन्द एव च।
कासः कण्ठस्य चोद्ध्वंसो विज्ञेयः कफकोपतः॥ ६॥
एकादशभिरेतैर्वाषड्भिर्व्वापि समन्वितम्।
कासातीसारपार्श्वार्त्ति-स्वरभेदारुचिज्वरैः॥
त्रिभिर्वा पीड़ितं लिङ्गैर्ज्वरकासारुगामयैः।
जह्याच्छोषार्द्दितं जन्तुमिच्छन् सुविपुलं यशः॥ ७॥
व्यवायशोकस्थाविर्य्य-व्यायामाध्वोपवासतः।
व्रणोरःक्षतपीड़ाभ्यां शोषानन्ये वदन्ति हि॥ ८॥
व्यवायशोषः शुक्रस्य क्षयलिङ्गैरुपद्रुतः।
पाण्डुदेहो यथा पूर्व्वं क्षीयन्ते चास्य धातवः॥ ९॥
प्रध्यानशीलः स्रस्ताङ्गः शोकशोष्यपि तादृशः।
विना शुक्रक्षयकृतैर्विकारैरभिलक्षितः॥ १०॥
जराशोषी कृशो मन्द-स्वल्पवुद्धिबलेन्द्रियः।
श्वसनोऽरुचिमान् भिन्नकांस्यपात्रहतस्वरः॥

स्वरेति। द्वयोर्द्वयोरंसपार्श्वयोः शूलं सङ्कोचश्च धर्म्मद्वारेणैकैकत्वेन विगणय्योच्यते एकादशभि रित्युक्तेयम्। अत्र कण्ठस्योद्ध्वंसः कण्ठे कण्ड्वादीना मतितरा मभिहतेः कण्ठकार्य्योच्छेदः॥ ६।७॥

प्रपञ्चेनोपदिष्टं हि शास्त्रं भूयो ज्ञानाभिवृद्धये प्रभवतीति कानिचित् मतान्तराण्युपन्यस्यति व्यायामेति। शुक्रस्य क्षयलिङ्गानि सू॰ १५ अ॰' निवेदितानि। यथापूर्व्वमिति "यथाऽसादृश्ये" इति पा॰ सू॰ २।१।७ अव्ययी-भावः। एवशब्दस्यानारूढ़ोऽयं च शब्द स्तदयमर्थः—ये ये पूर्व्वं धातवस्ते क्षीयन्त एव प्राग्वत् वलाधिष्ठानत्वेनोपदिष्टस्य शुक्रस्य क्षयादित्यध्यवसितव्यम्।

ष्ठीवति श्लेष्मणा हीनं तथैवारतिपीड़ितः।
सम्प्रस्रुतास्यनासाक्षः शुष्करूक्षमलच्छविः॥ ११॥
अध्वप्रशोषी स्रस्ताङ्गः संभृष्टपरुषच्छविः।
प्रसुप्तगात्रावयवः शुष्कक्लोमगलाननः॥ १२
व्यायामशोषी भूयिष्ठमेभिरेव समन्वितः।
उरःक्षतकृतैर्लिङ्गैः संयुक्तश्च क्षताद्विना॥ १३
रक्तक्षयाद्वेदनाभिस्तथैवाहारयन्त्रणात्।
व्रणितस्य भवेच्छोषः स चासाध्यतमोमतः॥ १४॥
व्यायामभाराध्ययनैरभिघातातिमैथुनैः।
कर्म्मणा चाप्युरस्येन वक्षो यस्य विदारितम्॥

प्राध्यनेति। अत्र तादृश इत्यनेनातिदिष्टेषु व्यवायशोषलिङ्गेषु मध्ये शुक्रक्षय-लिङ्गानि परिहरति विनेति। जरेति। भिन्नकांस्यपात्रस्येव स्वरो विकृतत्वेन विनष्टो ध्वनिरस्येति भिन्न-कांस्य-पात्र-हतस्वरः। अध्वशोषिणो लिङ्गानि व्यायामशोषिण्यतिदिशन् व्युत्क्रमेणाह अध्वेति। अविकृतं हि क्लोम शश्वदेव जलमासिञ्चति येनास्य गलाननादिकं सिक्तं सम्पद्यते क्लिद्यते च तदन्नं यदामाशयादक्लिन्नत्वेनाधो गच्छति। अथाध्वना दोषाभिपन्नत्वेन शुष्यति शुष्के च तस्मिन् सर्व्वे एवावयवाः प्रशोषमापद्यन्ते येनोक्तं "संभृष्टपरुषच्छविः"। इति। नीरसत्वेन संभृष्टेव परुषा कान्तिरस्येति संभृष्टपरुषच्छविः"। एवं सर्व्वेषामेव शरीरप्रदेशानामेकान्ततः शुष्कत्वमाख्यातुं जीववति शरीरेऽस्य-स्यापि जलवाहिशिरामूलत्वेन प्रतिपादितस्य क्लोम्नोऽत्र शुष्कत्वेनोपदेशो नानुप पन्नः। क्लोम्नि शुष्के सर्व्वेषामेवावयवानां शुष्कत्वेनोपलब्धेऽपि गलाननयोरेवोप देशो नित्यार्द्रत्वेन प्राधान्यादित्याकूतम्। व्यायामेति। प्रत्राध्वशोषिलिङ्गान्यति-दिश्यन्ते एभिरिति। दृश्यते हि निरर्थकं किञ्चित् कथयन्तः प्रवीणा अपि अल्पाकसंज्ञां लभन्ते तदिहोपवासशोषिलिङ्गाख्याने जोषमास्ते लिङ्गेषु हि तेषु विज्ञानपटुत्वं धूलिधूसरचरणानां बालिकानामप्यजस्रं चकास्तीति हृदयम्॥ ११॥

तस्योरसि क्षते रक्तं पूय: श्लेष्मा च गच्छति ।
कासमानश्छर्दयेच्च पीतरक्तासितारुणम् ॥
सन्तप्तवक्षाः सोऽत्यर्थं दूयनात् परिताम्यति ।
दुर्गन्धवदनोच्छ्वासो भिन्नवर्णस्वरो नरः ॥ १५
केषाञ्चिदेवं शोषो हि कारणैर्भेदमागतः ।
न तत्र दोषलिङ्गानां समस्तानां निपातनम् ॥
क्षया एव हि ते ज्ञेयाः प्रत्येकं धातुसंक्षयात् ।
चिकित्सितन्तु तेषां हि प्रागुक्तं धातुसंक्षये ॥ १६ ।
श्वासाङ्गसादकफसंस्रवतालुशोष-
च्छर्द्यग्निसादमदपीनसकासनिद्राः ।

रक्तेत्यादिना नर इत्यन्तेनोपदिष्टान्यतिरोहितार्थानि ॥ १४—१५ ॥

भगवन्! विमतत्वेनानुपदेशादनुमतत्वेन प्रतीतान् पराभिहितानष्टौ व्यवायादिजान् शोषानभिसमीक्ष्य जिज्ञास्यमेकमापन्नम् कथं नु खलु सत्स्वेतेष्वष्टासु शोषेषु "एक एव मतः शोष" इति प्रागुक्तं निरवद्यं भवतीत्येवमाशंसूनपाकरोति केषाञ्चिदिति। केषाञ्चिदिति "क्तस्य च वर्त्तमाने" इति पा० सू० २।३।६७ षष्ठी। केषाञ्चिदाचार्य्याणां सम्मताः कारणैस्तैस्तै र्व्यवायादिभि र्भेदं-विशेषं पृथग्भावमिति यावत् आगता एवमुक्तलक्षणा येऽष्टौ शोषास्तत्र समस्तानां दोषलिङ्गानां प्रागुक्तानामेकादशानां स्वरभेदादीनां न निपातनं नाविर्भावो न सान्निध्यमिति तात्पर्य्यम्। एकादशानां तेषां लिङ्गानां सान्निध्यादेव हि शोषोऽभ्युपगम्यते नान्यथेत्याशय:। स्यादेवं किन्तर्हि तेऽष्टौ रोगाः शोषा उच्यन्त आह क्षया इति। प्रत्येकं प्रत्येकेष्वेषु धातुसंक्षयात्तेऽष्टौ रोगा हि क्षया एव ज्ञेया अतएव शोषा उच्यन्त इति भाव:। चिकित्सितमिति। चिकित्सितशब्देनेह प्रतीकारक्रमः प्रत्येतव्यः। प्रागुक्ते "सू० १५ अ०" उक्ते तुकारादिश्चेति नेयमौपयोगिकत्वात् ॥ १६ ॥

शोषी भविष्यति भवन्ति स चापि जन्तुः
शुक्लेक्षणो भवति मांसपरो रिरंसुः ॥
स्वप्नेषु काकशुकशल्लकिनीलकण्ठ-
गृध्रास्तथैव कपयः कृकलासकाश्च ।
तं वाहयन्ति स नदीर्विजलाश्च पश्येत्-
छुष्कांस्तरून् पवनधूमदवार्दितांश्च ॥ १७ ॥
महाशनं क्षीयमाणमतीसारनिपीड़ितम् ।
शूनमुष्कोदरञ्चैव यक्ष्मिणं परिवर्ज्जयेत् ॥
उपाचरेदात्मवन्तं दीप्ताग्निमकृशं नवम् ॥ १८ ॥
स्थिरादिवर्गसिद्धेन घृतेनाजाविकेन च ।
स्निग्धस्य मृदु कर्त्तव्यमूर्द्ध्वञ्चाधश्च शोधनम् ॥
आस्थापनं तथा कार्य्यं शिरसश्च विरेचनम् ।
यवगोधूमशालीश्च रसैर्भुञ्जीत शोधितः ।
दृढेऽग्नौ बृंहयेच्चापि निवृत्तोपद्रवं नरम् ॥ १९ ॥
व्यवायशोषिणां प्रायो भजन्ते वातजा गदाः ।
बृंहणीयो विधिस्तस्मै हितः स्निग्धोऽनिलापहः ॥ २० ॥
काकानुलूकान् नकुलान् विड़ालान्
गण्डूपदान् व्यालविलेशयाखून् ।
गृध्रांश्च दद्याद्विविधैः प्रकारैः
ससैन्धवान् सर्षपतैलभृष्टान् ॥

पूर्व्वरूपमाह महासेति । मांसपरो मांसभक्षणेच्छुः । स्वप्नेष्वित्यादिकमपि पूर्व्वरूपत्वेनाध्यवसितव्यं तत्प्रकरणाभिहितत्वात् । उपाचरेदिति । स्थिरादिर्विदारीगन्धादिः "सू० ३८ अ०" द्रष्टव्यः ॥ १९—२० ॥

काकेति । ये तु पुनर्ज्जुगुप्सितत्वात् काकादीनां मांसानि स्वच्छन्दतो

देयानि मांसानि च जाङ्गलानि मुद्गाढ़कीसूपरसाश्च हृद्याः।
खरोष्ट्रनागाश्वतराश्वजानि देयानि मांसानि सुकल्पितानि॥
मांसोपदंशांश्च पिबेदरिष्टान् माध्वीकयुक्ता मदिराश्च सेव्याः॥२१
षर्कामृताक्षारजलोषितेभ्यः कृत्वा यवेभ्यो विविधांश्च भक्ष्यान्॥
खादेत् पिबेत् सर्पिरजाविकं वा क्रमो यवाग्वा सह भक्तकाले॥
सर्पिर्मधुभ्यां त्रिकटु प्रलिह्याच्चव्याविडङ्गोपहितं क्षयार्त्तः।
मांसादमांसेषु घृतञ्च सिद्धं शोषापहं क्षौद्रकणासमेतम्॥
द्राक्षासितामागधिकावलेहः सक्षौद्रतैलः क्षयरोगघाती।
घृतेन चाजेन समाक्षिकेण तुरङ्गगन्धातिलमाषचूर्णम्॥
सिताश्वगन्धामगधोद्भवानां चूर्णं घृतं क्षौद्रयुतं प्रलिह्यात्।
क्षीरं पिबेद्वाप्यथ वाजिगन्धाविपक्वमेवं लभते च पुष्टिम्॥
तदुत्थितं क्षीरघृतं सिताढ्यं प्रातः पिबेद् वाथ पयोऽनुपानम्।
उत्सादने चापि तुरङ्गगन्धा योज्या यवाश्चैव पुनर्नवे च॥
कृत्स्ने वृषे तत्कुसुमैश्च सिद्धं सर्पिः पिबेत् क्षौद्रयुतं हिताशी।
यक्ष्माणमेतत् प्रबलञ्च कासं श्वासञ्च हन्यादपि पाण्डुताञ्च॥२२

नाभ्यवहर्त्तुमीशते तेषामनुग्रहार्थं नक्तत्सदृशाजुगुप्सितमांसव्यपदेशेन मांसानि तानि दातुमिदमुच्यते विविधैरिति। सादृश्यापरपर्य्यायोऽयं प्रकारशब्दः। "प्रकारो भेदसादृश्ये" इत्यमरः। तृतीया चात्र "प्रकृत्यादिभ्यः" इत्येव। सादृश्यव्यपदेशप्रकारास्तु 'च॰ चि॰ ८ अ॰' वगाह्याध्यवसितव्याः। अत्र मुद्गाढ़कीसूपाश्चेति वक्तव्ये सूपांस्तान् वस्त्रपूतत्वेन ग्राहयितुं रसशब्दं प्रायुङ्क्तेति ज्ञेयम्। बहुवचनन्तु कृताकृतत्वादिविशेषादनेकत्वमाख्यापयति। उपदंशो नाम मद्यपानरोचकानि द्रव्याणि॥ २१॥

षर्केति। जलोषितेभ्यो जलपर्य्युषितेभ्यः। कृत्स्न इति। कृत्स्ने यथालाभं शाखा-पलाश-मूलादिसहिते वृषे वृषकषाये कुसुमैः कल्कीकृतैस्तत्पुष्पैः॥ २२॥

शकृद्रसा गोऽश्वमजाव्यजानां क्वाथा मिताश्चापि तथैव भागः ॥
मूर्व्वाहरिद्राखदिरद्रुमाणां चीरस्य भागस्त्वपरो घृतस्य ।
भागान् दशैतान् विपचेद्विधिज्ञो दत्त्वा त्रिवर्गं मधुरञ्च कृत्स्नम् ।
कटुत्रिकञ्चैव सभद्रदारु घृतोत्तमं यक्ष्मनिवारणाय ॥ २३
द्वे पञ्चमूल्यौ वरुणं करञ्जं भल्लातकं विल्वपुनर्नवे च ।
यवान् कुलत्थान् वदराणि भार्गीं पाठां हुताशं समहौकदम्बम् ॥
कृत्वा कषायं विपचेद्धि तस्य षड्भिर्हि पात्रैर्घृतपात्रमेकम् ।
व्योषं महावृत्तपयोऽभयाश्च चव्यं सुराह्वं लवणोत्तमञ्च ॥
एतद्धि शोषं जठराग्निं चैव हन्यात् प्रमेहांश्च सहानिलेन ॥ २४॥
गोऽश्वाव्यजेभैणखरोष्ट्रजातैः शकृद्रसचीररसत्रतोत्थैः ।
द्राक्षाश्वगन्धामगधासिताभिः सिद्धं घृतं यक्ष्मविकारहारि ॥२५॥
एलाजमोदामलकाभयाक्षगायत्र्यरिष्टासनशालसारान् ।
विडङ्गभल्लातकचित्रकोग्राकटुत्रिकाम्भोदसुराष्ट्रजाश्च ॥
पक्त्वा जले तेन पचेद्धि सर्पिस्तस्मिन् सुसिद्धे त्ववतारिते च ।
त्रिंशत्पलान्यत्र सितोपलाया दत्त्वा तुगाचीरिपलानि षट् च ॥
प्रस्थे घृतस्य द्विगुणञ्च दद्यात् चौद्रं ततो मन्थहतं विदध्यात् ।
पलं पलं प्रातरतः प्रलिह्यात् पश्चात् पिबेत् चीरमतन्द्रितश्च॥
एतद्धि मेध्यं परमं पवित्रं चक्षुष्यमायुष्यमथो यशस्यम् ।
यक्ष्माणमाशु व्यपहन्ति चैतत् पाण्डामयञ्चैव भगन्दरञ्च ॥
श्वासञ्च हन्ति स्वरभेदकासहृत्प्लीहगुल्मग्रहणीगदांश्च ।
न चात्र किञ्चित् परिवर्ज्जनीयं रसायनञ्चैतदुपास्यमानम् ॥२६॥

शकृदिति । अत्र शकृद्रसानामेकैकोभागस्तथैव मूर्व्वादीनां त्रयाणां त्रयो भागाः चीरघृतयोर्द्वौ भागौ पञ्चमादेयौ । त्रिवर्गं त्रिफलात्रिकटुसहितं

प्लीहोदरोक्तं विहितञ्च सर्पिस्तान्येव चान्यानि हितानि चात्र ॥२७
उपद्रवांश्च स्वरवैकृतादीन् जयेद् यथास्वं प्रसमीक्ष्य शास्त्रम् ॥२८॥
अजाशकृन्मूत्रपयोघृतास्रङ्मांसालयानि प्रति सेवमानः।
स्नानादिना ना विधिना जहाति मासादशेषं नियमेन शोषम् ॥
रसोनयोगं विधिवत् क्षयार्त्तः क्षीरेण वा नागबलाप्रयोगम्।
सेवेत वा मागधिकाविधानं तथोपयोगं जतुनोऽश्मजस्य ॥२९॥
शोकं स्त्रियं क्रोधमसूयनञ्च त्यजेदुदारान् विषयान् भजेत।
वेद्यान् द्विजातींस्त्रिदशान् गुरूंश्च
वाचश्च पुण्याः शृणुयाद् द्विजेभ्यः ॥ ३० ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे शोषप्रतिषेधो
नामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥

चित्रमुस्ताविडङ्गम् मधुरं (सू ४२ अ) उपदिष्टं मधुरद्रव्यजातम्। प्लीहोदरोक्तं सर्पिः षट्पलं घृतम्। यानि चान्यानि हितानि तानिचात्र विहितान्येव पूर्व्वाचार्य्यैरित्येवं विहितमिति पदं वचनव्यत्यासेनाकृष्यान्वेयम् ॥ २३—२८ ॥

अजेति। स्नानादि-विधिना अजाशकृदादीनि प्रति भागशः सेवमान इति समन्वयः। मागधिकाविधानं "चिं ५ अ०" शिलाजतुविधानञ्च "चिं १३ अ०" अनुसन्धायेति शेषः। परिशिष्टं निगदव्याख्यातम् ॥ २९—३० ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे शोषप्रतीषेधो नाम एकचत्वारिंशोऽध्यायः।

द्विचत्वारिंशोऽध्यायः ।

अथातो गुल्मप्रतिषेधं व्याख्यास्यामः ॥ १

यथोक्तैः कोपनैर्दोषाः कुपिताः कोष्ठमागताः ।
जनयन्ति नृणां गुल्मं स पञ्चविध उच्यते ॥
हृद्वस्त्योरन्तरे ग्रन्थिः सञ्चारी यदि वाऽचलः ।
चयापचयवान् वृत्तः स गुल्म इति कीर्त्तितः ॥
पञ्चगुल्माश्रया नृणां पार्श्वे हृन्नाभिवस्तयः ॥
कुपितानिलमूलत्वाद्गूढ़मूलोदयादपि ।
गुल्मवद्वा विशालत्वाद्गुल्म इत्यभिधीयते ॥

स्मरन्ति हि "द्वन्द्वोर्व्विकारहारी च भवेदुदरगुल्मवान्" इति शातातपीये ४ अं ११ श्लो० निवेदयति च गुल्मानां दोषजत्वमधुनैव पश्यामश्च स्वल्पस्य हेतोर्जाते गुल्मे संरम्भो नामातीव, वदन्ति च "महारम्भोऽल्पके हेतावन्तिमो दोष कर्म्मजः" इति। तदिह कर्म्मजत्वादिभेदेन त्रैविध्यमाधर्म्मशाच्छोषप्रतिषेधा दनन्तरं गुल्मप्रतिषेधमधिकरोति अथात इत्यादिना ॥ १ ॥

यथोक्तैरिति। कोष्ठशब्दोऽयं "कोष्ठः कुशूले चात्मीये मध्ये कुक्षेर्गृहस्य च" इति कोषान्तरस्मरणात् सामान्यत उदरमध्यप्रदेशापरपर्य्यायत्वेनावगतोऽपि-हृद्वस्त्योरन्तरप्रदेशमेवाववोधयतीति निश्चीयते, परमतो हृदित्यादिना तथैवोपदेशात्। अत्र दूष्याणामनुल्लेखात् प्राक् "निं ८ अं" "गुल्माकाराः स्वयं दोषाः" तथा "गुल्मस्तिष्ठति दोषे स्वे" इत्यतिक्रान्तावेक्षणाद् जनयन्ति गुल्मरूपेण परिणमन्ते स्वयमेवेत्येवं व्याख्येयम्। पञ्चेति नृणां मनुष्याणां स्त्रीपुंनपुंसकानामिति यावत्। ग्रन्थिभूतस्यास्य रोगस्य गुल्मेति संज्ञां सर्व्वथा न्याय्यत्वेन द्रढ़यितुं त्रेधा निर्व्वक्ति कुपितेति। अपि रयं समुच्चयार्थः। गुल्मवदिति गुल्मशब्दोऽयमेकमूलेषु सङ्घातजातेषु शरेक्षुप्रभृतिषु प्रवर्त्तते, तेषां मूलानि यथा विशालानि तथैव विशालत्वाद्वा गुल्म इत्यर्थः। गुल्मेतिपदं सर्व्वथैव पृषोदरादित्वात्

स यस्मादात्मनि चयं गच्छत्यप्स्विव बुद्बुदः।
अन्तः सरति यस्माच्च न पाकमुपयात्यतः॥
स व्यस्तैर्जायते दोषैः समस्तैरपि वोच्छ्रितैः।
पुरुषाणां तथा स्त्रीणां ज्ञेयो रक्तेन चापरः॥ २॥

सिद्धमित्यूह्येयम्। नन्विह भगवन् "यथोक्तैः कोपनैर्दोषाः" इत्यादिना इष्टोक्तार्थेन गुल्मसमाख्योऽयं रोगो दोषमात्रोपादानत्वेन प्रतीयते तथाच "गुल्मस्तिष्ठति दोषे स्वे" इति "निं ८ अं" उपदिष्टोऽयमर्थो न जातु सङ्गच्छते दोषाणां गुल्मानाञ्चाभेदादाधाराधेयभावानुपपत्तेः, न हि य एव आधारः स एवाधेयो भवितुमर्हतीत्येवं ये प्रत्यवतिष्ठन्ते तान् निरस्यन् समासतः प्रागुक्तमर्थमनुवदति स इति। आत्मनि गुल्मस्वरूपत्वेनोपदिष्टस्य दोषस्यैकदेशे चयं गच्छति गुल्मरूपेण परिणमन्नणुशः संहतत्वेन सञ्चिनोति। अत्र दृष्टान्तः अप्स्विति। एवञ्च "इह वने तिलकाः" इतिवदेकदेशविवक्षया आधाराधेयभावोनानुपपन्न इति हृदयम्। अन्तःसरति इति तु प्रासङ्गिकम्। अतो न पाकमुपयातीति पाकानुगुणप्रवृद्धरक्तपित्ताभ्यां विनाकृतत्वादित्यूह्येयम्। पाको हि प्रवृद्धेन पित्तेन शोणितस्य पचनमेवेति नेयम्। यदाह "सू १७ अं" "कालान्तरेणाभ्युदितन्तु पित्तं कृत्वावशे वातकफौ प्रसह्य। पचत्यतः शोणितमेष पाकइति। एवञ्चार्थाच्चिप्तं भवति तैस्तैर्हेतुभिश्चेद्रक्तपित्ते प्रवर्द्धयातां तर्हि गुल्मः पच्यत एवेति राद्धान्तः। नचैतदश्रद्धेयं जीवत्स्वात्रेयान्तेवासिषु कथमपीति ब्रूमः, अस्ति हि तेषां गुल्मचिकित्सितं प्रति "रक्तपित्तातिवृद्धत्वात् क्रियामनुपलभ्य च। यदि गुल्मो विदह्येत शस्त्रं तत्र भिषग्जितम्" तथा "दाहशूलार्त्तिसंक्षोभस्वप्ननाशारुचिज्वरैः। विदह्यमानं जानीयात्" इत्येवं प्रपाकित्वेनाभिधायको वचनसमाम्नायः। अमुमेवार्थमनुवदता वाग्भटेनाप्युक्तम् "स्वदोषसंश्रयो गुल्मः सर्व्वो भवति तेन सः। पाकं चिरेण भजते नैव वा विद्रधिः पुनः। पच्यते शीघ्रम्" इति। एवं गतेऽपि चेदपाकत्वेन चानुभूतानां पूर्व्वजानां मतमाश्रित्य अन्धेन नीयमानोऽन्ध इव विमार्गगामी सन् अपचनस्वभावोऽयं गुल्मः पच्यमानो विद्रधिसंज्ञां लभते इत्येवमनेकधा प्रलपितुमिच्छसि तर्हि भवत एव वाग्वज्रो भवन्तं प्रहरिष्यति परमतो भगवता वक्ष्यमाणं गुल्मस्य पाकाभिव्यञ्जकम् "सशूले सोन्नते स्यन्दे दाहपाकसमन्विते। गुल्मे रक्तं जलौकोभिः सिरामोक्षेण वा हरेत्" इत्यालोचयन्तम्॥ २॥

सदनं मन्दता वह्नेराटोपोऽन्त्रविकूजनम् ।
विण्मूत्रानिलसङ्गश्च सौहित्यासहता तथा ।
द्वेषोऽन्ने वायुरूर्द्ध्वञ्च पूर्व्वरूपेषु गुल्मिनाम् ॥ ३ ॥
हृत्कुक्षिशूलं मुखकण्ठशोषो वायोर्निरोधो विषमाग्निता च ।
ते ते विकाराः पवनात्मकाश्च भवन्ति गुल्मेऽनिलसम्भवे तु ॥
स्वेदज्वराहारविदाहदाहास्तृष्णाङ्गरागः कटुवक्त्रता च ।
पित्तस्य लिङ्गान्यखिलानि यानि पित्तात्मके तानि भवन्ति गुल्मे ॥
स्तैमित्यमन्नेऽरुचिरङ्गसादश्छर्द्दिः प्रसेको मधुरास्यता च ।
कफस्य लिङ्गानि च यानि तानि भवन्ति गुल्मे कफसम्भवे तु ॥
सर्व्वात्मकः सर्व्वविकारयुक्तः सोऽसाध्य उक्तः क्षतजञ्च वक्ष्ये ।
नवप्रसूताऽहितभोजना या या चामगर्भं विसृजेदृतौ वा ॥
वायुर्हि तस्याः परिगृह्य रक्तं करोति गुल्मं सरुजं सदाहम् ।
पैत्तस्य लिङ्गेन समानलिङ्गं विशेषणञ्चाप्यपरं निबोध ॥
न स्पन्दते नोदरमेति वृद्धिं भवन्ति लिङ्गानि च गर्भिणीनाम् ।
तं गर्भकालातिगमे चिकित्स्यमसृग्भवं गुल्ममुशन्ति तज्ज्ञाः ॥ ४

स इति । वाशब्दादुच्छ्रितेः प्रवृद्धैरेव व्यस्तैः समस्तैश्चेत्यर्थः । पुरुषाणां नराणाम् "पुरुषः पूरुषोनरः" इत्यमरश्च । स्त्रीणां रक्तेन वातानुविद्धेनेति ज्ञेयम्, वक्ष्यति हि "वायुर्हि तस्याः परिगृह्य रक्तम्" इति । अपरः पूर्व्वोक्तेभ्यो भिन्नश्चैकः । आटोपकूजने औदर्य्यौ सवेदनावेदनावव्यक्तौ ध्वनिभेदौ । सौहित्य-मात्रसेभोजनम् ॥ ३ ॥

क्षतजश्चेति । क्षतजशब्दोऽयमकारान्मत्वर्थीयात् कार्य्यकारणयोरभेदाद्वा रक्तजं गुल्मं लक्षयति । नवेति । ऋतौ वाहितभोजनेति समन्वयः । न स्पन्दते नेति नञ्द्वयोपादानात् स्पन्दत इत्यर्थः । स्पन्दनञ्च तद् गुल्मजातत्वेनाङ्गमेव प्रत्येतव्यम् । "यः स्पन्दते पिण्डित एव नाङ्गैः" इति

वातगुल्मार्द्दितं स्निग्धं युक्तं स्नेहविरेचनैः ।
उपाचरेद्यथाकालं निरूहैः सानुवासनैः ॥
पित्तगुल्मार्द्दितं स्निग्धं काकोल्यादिघृतेन तु ।
विरिक्तं मधुरैर्योगैर्निरूहैः समुपाचरेत् ॥
श्लेष्मगुल्मार्द्दितं स्निग्धं पिप्पल्यादिघृतेन तु ।
तीक्ष्णैर्विरिक्तं तद्रूपैर्निरूहैः समुपाचरेत् ॥
सन्निपातोत्थिते गुल्मे त्रिदोषघ्नो विधिर्हितः ।
पित्तवद्रक्तगुल्मिन्या नार्य्याः कार्य्यः क्रियाविधिः ॥

तन्त्रान्तरञ्च । गर्भिणीनां लिङ्गान्यार्त्तवादर्शनादीनि । एभिरेवोदराऽभिवृद्धे रुपलम्भेऽपि पृथगुपादानमापाततावगम्यत्वेन प्राधान्यादित्युन्नेयम् । आचार्य्यो हि गुल्ममिमं शोणितावसेचनेन समूलकाषमाकर्षितुं विभितृसन्तीति परमतोव्यक्तो भविष्यति । न च तावद् भेदनावसेचने च ते भिषजां सहस्रमपि सम्भूय कथमप्यामावस्थायामनायासेन कर्त्तुमीष्टे तदात्वे गुल्मस्यास्यातितरां सम्वृतास्ये गर्भाशये लीनत्वेनावस्थानान्नितरां निरुद्धमार्गत्वाच्च; तदिदानीं गुल्मस्यास्य प्रतीकारविधौ "तरुणः सिध्यति सुखम्" इति सामान्यशास्त्रं व्यावर्त्त्य दशममासात् परमेव सुखसाध्यत्वं व्याजेन व्यनक्ति गर्भकालातिगम इति । गर्भकालो गर्भरूपेणावस्थानयोग्यः कालः । तस्य च शा० ३ अ०" नवमतोद्दादशनासात्मकत्वेनोपदेशेऽपि दशममास एव गर्भकाल शब्देनेह बोद्धव्यो बाहुल्यानुशयात् । तत्परिहारश्च तदात्वे स्रावानुगुणं गुल्मगौरवाभिनिर्वृत्तं गर्भाशयास्यसङ्कोचशैथिल्यमवाप्तमित्यूह्यम् । अतएव तन्त्रान्तरेऽप्युक्तम् "मासे व्यतीते दशमे चिकित्स्यः" इति । एवञ्च "रक्तगुल्मे पुराणत्वं सुखसाध्यस्यलक्षणम्" इति तन्त्रान्तरोक्तमनवद्यमेव ॥ ४ ॥

वातेति । स्नेहविरेचनानि 'चि० ४ अ०' उक्तानि तिल्वकसर्पिरादीनि । काकोल्यादिघृतं 'चि० ५ अ०' उक्तं काकोल्यादिक्वाथकल्कसिद्धमिति यावत् । मधुरा योगाः "भिन्ना छिद्येसुम्" इत्यादिना "सू० ४४ अ०" उपदिष्टाः । निरूहा अपि मधुरा एव तेच 'चि० ३८ अ०" कुशादि पञ्चमूलेत्यादिनाभिहिताः ।

विशेषमपरस्त्वास्याः शृणु रक्तविभेदनम् ।
पलाशभस्मतोयेन सिद्धं सर्पिः प्रयोजयेत् ॥
दद्यादुत्तरबस्तिञ्च पिप्पल्यादिघृतेन तु ।
उष्णैर्वा भेदयेद्भिन्ने विधिरासृग्दरो हितः ॥
आनूपौदकमज्जानो वसा तैलं घृतं दधि ।
विपक्वमेकतः शस्तं वातगुल्मेऽनुवासनम् ॥
जाङ्गलैकशफानान्तु वसा सर्पिश्च पैत्तिके ।
तैलं जाङ्गलमज्जान एवं गुल्मे कफोत्थिते ॥
धात्रीफलानां स्वरसे षड़ङ्गं विपचेद्घृतम् ।
शर्करासैन्धवोपेतं तद्धितं वातगुल्मिने ॥ ५ ॥
चित्रकव्योषसिन्धूत्थ-पृथ्वीकाचव्यदाड़िमैः ।
दीप्यकग्रन्थिकाजाजी-हवुषाधान्यकैः समैः ॥
दध्यारनालबदर-मूलकस्वरसैर्घृतम् ।
तत् पिवेद् वातगुल्माग्नि-दौर्ब्बल्याटोपशूलनुत् ॥
हिङ्गुसौवर्च्चलाजाजी-विड़दाड़िमदीप्यकैः ।
पुष्करव्योषधान्याम्ल-वेतसक्षारचित्रकैः ॥
शठीवचाजगन्धैला-सुरसैश्च विपाचितम् ।
शूलानाहहरं सर्पिर्दध्ना चानिलगुल्मिनाम् ॥

पिप्पल्यादिघृतं ज्वरप्रतिषेधे द्रष्टव्यम् । तीक्ष्णविरेचनानि 'सू० ४४ अ०' व्याहृतानि स्नुहीक्षीरानुविद्धानि । धात्रीत्यादि । प्लीहोदरोक्तं षट्पलकं घृतं पुनर्धात्रीफलानां स्वरसे पक्वमुपदिदिक्षति धात्रीति । अत्र स्वरसाभावे क्वाथो ज्ञेयः ॥ ५ ॥

चित्रकेति । पृथ्वीका कृष्णजीरकम् । हवुषा "भाडच" इति परिचीयते

विड्दाड़िमसिन्धुत्थ-हुतभुग्व्योषजीरकैः ।
हिङ्गुसौवर्च्चलक्षार-वृक्षाम्लाम्लवेतसैः ॥
बीजपूररसोपेतं सर्पिर्दधि चतुर्गुणम् ।
साधितं दाधिकं नाम गुल्महृत् प्लीहशूलजित् ॥
रसोनस्वरसे सर्पिः पञ्चमूलरसान्वितम् ।
सुरारनालदध्यम्ल-मूलकस्वरसैः सह ॥
व्योषदाड़िमवृक्षाम्ल-यवानीचव्यसैन्धवैः ।
हिङ्ग्वम्लवेतसाजाजी-दीप्यकैश्च समांशिकैः ॥
सिद्धं गुल्मग्रहण्यर्शः-श्वासोन्मादक्षयज्वरान् ।
कासापस्मारमन्दाग्नि-प्लीहशूलानिलान् जयेत् ॥
दधि सौवीरकं सर्पिः क्वाथौ मुद्गकुलत्थजौ ।
पञ्चाढ़कानि विपचेदावाप्य द्विपलान्यथ ॥
सौवर्च्चलं सर्ज्जिकाञ्च देवदार्व्वथ सैन्धवम् ।
वातगुल्मापहं सर्पिरेतद्दीपनमेव च ॥ ६ ॥
तृणमूलकषाये तु जीवनीयैः पचेद्घृतम् ।
न्यग्रोधादिगणे वापि गणे वाप्युत्पलादिके ॥
रक्तपित्तोत्थितं घ्नन्ति घृतान्येतान्यसंशयम् ॥ ७ ॥

काष्ठविशेषः। दध्यादीन्यत्र प्रत्येकशो घृतसमान्याहुः। हिङ्ग्वित्यादि। धान्यं धन्याकम्। चाम्लवेतसो नाम "थैकड़" इत्याख्यायते। विड़िति। वृक्षाम्ल-चूतफलगन्धिरार्द्रकभेदः "चाम आदा" इत्यभिधीयते। रसोनेति। पञ्चमूलं महद् चात्र मिलित्वा क्षेपादिकैर्व्योषादिभिरेवेति नेयं कल्कत्वात् ॥ ६ ॥

तृणेति। तृणानि कुशादीनि पञ्च। उत्पलादिकान्येतानि 'सू० ३८ अ०' निवेदितानि जीवनीयैः काकोल्यादिभिः कल्कीकृतैरित्युक्तेयम्।

आरग्वधादौ विपचेद्दीपनीययुतं घृतम्।
क्षारवर्गे पचेच्चान्यत् पचेन्मूत्रगणेऽपरम्॥
घ्नन्ति गुल्मं कफोद्भूतं घृतान्येतान्यसंशयम्॥ ८॥
यथादोषोच्छ्रयश्चापि चिकित्सेत् सान्निपातिकम्॥ ९॥
चूर्णं हिङ्ग्वादिकं वापि घृतं वा प्लीहनाशनम्।
पिबेद्गुल्मापहं काले सर्पिस्तैल्वकमेव वा॥ १०॥
तिलेक्षुरकपालाश-सार्षपं यवनालजम्।
भस्ममूलकजञ्चापि गोऽजाविखरहस्तिनाम्॥
मूत्रेण महिषीणाञ्च पालिकैश्चावचूर्णितैः।
कुष्ठसैन्धवयष्ट्याह्व नागरक्रिमिघातिभिः॥
साजमोदैश्च दशभिः सामुद्राच्च पलैर्युतम्।
अयःपात्रेऽग्निनाल्पेन पक्त्वा लेह्यमथोद्धरेत्॥
तस्य मात्रां पिबेद्दध्ना सुरया सर्पिषापि वा।
धान्याम्लेनोष्णतोयेन कौलत्थेन रसेन वा॥
गुल्मं वातविकारांश्च क्षारोऽयं हन्त्यसंशयम्॥ ११॥

आरग्वधादाविति। दीपनीयानि पिप्पल्यादीनि। क्षारवर्गे अन्नपानाध्यायोपदिष्टे मूत्रगणे च दीपनीययुतमित्यन्वेयम्। हिङ्ग्वादिकं चूर्णं गुटिकाकृतमेवेति ज्ञेयम् 'चिं ५ अ०' तथैवोपदेशात्। काले वातप्राबल्ये इति हृदयं, तैल्वकस्य विशेषेण वातोपशमकत्वेनोपलम्भात्। तिलेत्यादि। इक्षुरकः कोकिलाक्षः। तिलेक्षुरकयो-रिदं तिलेक्षुरकं द्वन्द्वैकवद्भावः। अत्र तिलादीनां क्षारद्रोणं गवादिमूत्रद्रोणैः षड्भि-रालोड्य एकविंशतिवारान् विस्राव्य महति कटाहे शनैर्दर्व्या अवघट्टयन् विपचेत्, स यदा रक्तः पिच्छिलश्च तदा तमवतार्य विस्रावयेदेकान्ततो निर्मलीकर्तुम्, तथाकृतश्च तं क्षारद्रवं पुनरग्नावधिश्रित्य तथा प्रयतेत यथायं चूर्णितानां कुष्ठादीनां प्रक्षेपत एव लेह्यत्वेन पर्य्यवस्यतीति विशेषेण बोद्धव्यम्।

स्वर्ज्जिकाकुष्ठसहितः क्षारः केतकजोऽपि वा ।
तैलेन शमयेत् पीतो गुल्मं पवनसम्भवम् ।
पीतं सुखाम्बुना वापि स्वर्ज्जिकाकुष्ठसैन्धवम् ॥ १२ ॥
ह्रस्वोरमूरुवूकस्य वर्षाभूहस्तीद्वयम् ।
चित्रकस्य जलद्रोणे पक्ता पादावशेषितम् ।
मागधीचित्रकचौद्रलिप्ते कुम्भे निधापयेत् ॥
मधुनः प्रस्थमावाप्य पथ्याचूर्णार्द्धसंयुतम् ।
तुषोषितं दशाहन्तु जीर्णभक्तः पिबेन्नरः ॥
अरिष्टोऽयं जयेद्गुल्ममविपाकमरोचकम् ॥ १३ ॥
पाठानिकुम्भरजनी-त्रिकटुत्रिफलाग्निकम् ।
लवणं हस्रवीजञ्च तुल्यं स्यादनवं गुड़म् ॥
पथ्याभिः सहितं चूर्णं गवां मूत्रयुतं पचेत् ।
गुटिकास्तद्घनीभूतं कृत्वा खादेदभुक्तवान् ॥
गुल्मप्लीहाग्निसादांस्ता नाशयेयुरशेषतः ।
हृद्रोगं ग्रहणीदोषं पाण्डुरोगञ्च दारुणम् ॥ १४ ॥
सशूले सोन्नतेऽस्यन्दे दाहपाकरुगन्विते ।
गुल्मे रक्तं जलौकोभिः शिरामोक्षेण वाहरेत् ॥ १५ ॥

ह्रस्वोरेत्यादि। ह्रस्वोरो नामौषधिः "विछातु" इति परिचीयते। ह्रस्वोरादीनां तुलैव मात्रा। "तुलाद्रव्ये जलद्रोणो द्रोणे द्रव्यतुला मता" इत्यनुशासनात्। तुषोषितं तुषराशौ स्थितम्। पाठेत्यादि। घनीभूतं तच्चूर्णं गुठिकाः कृत्वेत्युपदेशाभावादास्य बलवति शरीरे कर्षः प्रत्येतव्यः, "कर्षश्चूर्णस्य कल्कस्य गुटिकानाञ्च सर्व्वशः" इति स्मरणात् ॥ ८-१४ ॥

सशूल इति। प्रतिकर्त्तारो हि यथा प्रतिकृत्य कृतकृत्या भवन्ति प्रायेण तथैव प्रवचनजातमर्थतो निवेदयन्तीति कृत्वा वचनेऽस्मिन् सदूरत्वमपि

सुखोष्णा जाङ्गलरसाः सुस्निग्धा व्यक्तसैन्धवाः।
कटुत्रिकसमायुक्ता हिताः पाने च गुल्मिनाम्॥ १६॥
पेया वातहरैः सिद्धाः कौलत्थाः संस्कृता रसाः।
खलाः सपञ्चमूलाश्च गुल्मिनां भोजने हिताः॥
वद्धवर्च्चोऽनिलानान्तु सार्द्रकं क्षीरमिष्यते।
कुम्भीपिष्टेष्टकास्वेदान् कारयेत् कुशलो भिषक्॥
गुल्मिनः सर्व्व एवोक्ता दुर्व्विरेच्यतमा भृशम्।
अतश्चैतांस्तु सुस्विन्नान् स्रंसनेनोपपादयेत्॥

वाशब्दमाकृष्याध्याहार्य्यं वा प्रत्येकं सप्तम्यन्तेन पदेन संवध्नन्ति सशूलत्वादिषु पञ्चस्वेवावस्थासु यथायोगं जलौकोभिः शिराभिर्व्वा रक्तं निर्हर्त्तुम्। तथाच सशूले निरन्तरं सूच्यादिभिस्तोदनवद्वेदनानुगते, सोन्नते सोन्नतौ प्रवृद्ध इति यावत्। स्यन्दोऽभिष्यन्दो नेत्ररोगविशेषस्तत्साम्यात् स्यन्दे दाहरागवेदनाभिरनुविद्धे, दाहपाकरुगन्विते इति तु दाहान्विते पाकार्थो रुक्. पाकरुक् "सू॰ १७ अ॰" उपदिष्टपच्यमानलिङ्गरूपो वेदनासमूह इति यावत्, तदन्विते चेत्यर्थः। न पुनः पाकस्य रुक्चेति द्वन्द्वः पाकान्विते रक्तावसेचनस्यानुपयोगिकत्वात्, शिरामोक्षेण गुल्मोपर्य्युस्थितशिराव्यधेन केचित्तुन्तर्व्विद्रधिसाम्यादन्तर्व्विद्रधावुक्तशिराव्यधेनेत्याहुः। वयन्तु प्रच्छयित्वा सान्तर्व्वास्पया काचकूप्याऽपि रक्तं निर्हरामः। परमतः केचित् प्रवीणाः पठन्ति—"पक्वेऽवताय्यं शस्त्रन्तु चिकित्स्येद् व्रणवद्भिषक्। अग्निं क्षारं पातयेद्वा दहेत्क्षौद्रेण दोषवित्। अमर्म्मजातं वलिनो विदार्य्यापहरेत्ततः। अभ्यज्य मधुसर्पिर्भ्यां स्यूतं वद्धा भिषग्वरः। व्रणहात् क्षौद्राच धावेत कषायै रनिलापहैः। क्षीरं मांसरसञ्चान्नं मात्रावद् भोजयेत्तु तम्"। इति। न चैतदमौलिकत्वेनाश्रद्धेयं प्रायेणात्रेयानुमतत्वात् प्रत्यक्षपरिकलित-त्वात् युक्तिपरिप्राप्तत्वाच्च। अत्र हि भगवतात्रेयेणाग्निक्षारावुपयुज्येते, वयन्तु द्विमुखनाडीसंसक्तेन व्रीहिमुखेन मूत्रवृद्धिमिव भित्त्वा शस्त्रमपाकृत्य तयैव नाड्या क्षारवर्त्तिं प्रवेश्यापि गुल्मचयमुन्मूलयामः॥ १५-१६॥

पेया इति। खला खडयूषाः सू॰ ४६ अ॰ अस्माभिर्लक्षणतो निवेदिताः।

विलेपनाभ्यञ्जनानि तथा संदहनानि च।
उपनाहाश्च कर्त्तव्याः सुखोष्णाः शाल्वनादयः॥
उदरोक्तानि सर्पींषि चूर्णवर्त्तिक्रियास्तथा।
लवणानि च योज्यानि यान्युक्तान्यनिलामये।
वातवर्च्चोनिरोधे तु सामुद्रार्द्रकसर्षपैः।
कृत्वापायौ विधातव्या वर्त्तयो मरिचोत्तराः॥
दन्तीचित्रकमूलेषु तथा वातहरेषु च।
कुर्य्यादरिष्टान् सर्व्वांश्च सूत्रस्थाने यथेरितान्॥
खादेद्वाप्यङ्कुरान् भृष्टान् पूतीकनृपवृक्षजान्।
ऊर्द्ध्ववातमनुष्यञ्च गुल्मिनं न निरूहयेत्॥
पिवेत् चित्रन्नागरं वा सगुड़ांवा हरीतकीम्।
गुग्गुलुं चित्रतां दन्तीं द्रवन्तीं सैन्धवं वचाम्॥
मूत्रमद्यपयोद्राक्षा-रसैर्वीक्ष्य बलाबलम्।
एवं पीलूनि पिष्टानि पिवेत् सलवणानि तु॥
पिप्पलीपिप्पलीमूल-चव्यचित्रकसैन्धवैः।
युक्ता हन्ति सुरा गुल्मं शीघ्रं काले प्रयोजिता॥
बद्धविण्मारुतो गुल्मी भुञ्जीत पयसा यवान्।
कुल्माषान् वा बहुस्नेहान् भक्षयेल्लवणोत्तरान्॥ १७॥
यथा स्योपद्रवः शूलः कथश्चिदुपजायते।
शूलं निखानितमिव सुखं येन न वेत्त्यसौ॥

सूत्रस्थाने द्रवद्रव्यविध्यादावित्येव। नृपवृक्षः शम्याकः, कुल्माषास्त्वत्र सम्यक् सिद्धाः यवगोधूमा एव लघुपाकित्वेनौपयोगिकत्वात्॥ १७॥

यथेति निखानितं कुन्तादिभि र्निखननवद्वेदनाजननमिति तात्पर्य्यम्।

तत्र विण्मूत्रसंरोधः कृच्छ्रोच्छ्वासः स्थिराङ्गता ।
तृष्णा दाहो भ्रमोऽन्नस्य विदग्धपरिवृद्धिता ॥
रोमहर्षोऽरुचिश्छर्द्दिर्भुक्तवृद्धिर्जडाङ्गता ।
वाय्वादिभिर्यथासङ्ख्यं मिश्रैर्वा वीक्ष्य योजयेत् ॥
पथ्याचित्रलवणं क्षारं हिङ्गु तुम्बुरु पौष्करम् ।
यवान्यथ हरिद्रा च विडङ्गान्यम्लवेतसम् ॥
विदारीत्रिफलाऽभीरुशृङ्गाटीगुडशर्करा: ।
काश्मरीफलयष्ट्याह्व-परूषकहिमानि च ॥
षड्ग्रन्थातिविषादारु-पथ्यामरिचवृत्तकान् ।
कृष्णामूलकचव्यञ्च नागरक्षारचित्रकान् ॥

तत् पुन: शूलं दोषलिङ्गत: सप्तधा विशिनष्टि तत्रेति । तत्रेति शूलप्रत्ययप्रसर्पेको-ऽयं तच्छब्द: । आकुञ्चनप्रसारणोच्छोषणादिभि रवसन्नतया यथास्वकार्य्यानर्ह-त्वेनाचलानीवाङ्गान्यस्य तस्य भाव: स्थिराङ्गता । अन्नस्य विदाहेन परिवृद्धिर्यस्य तस्य भावो विदग्धपरिवृद्धिता, पच्यमानदशायां वृद्धिर्भवतीत्यर्थनिष्कर्ष: । भुक्तमात्रेवृद्धिर्भुक्तवृद्धि: । इदमत्रावधेयम्—उभे एते वृद्धी शूलस्येति षष्ठ्यर्थे प्रतिभातेऽपि तत्रेति सप्तमी नानुपपन्ना, शूलस्य हि या वृद्धि: सा शूल एवावतिष्ठत इत्यर्थं प्रति षष्ठीसप्तम्यो: परमार्थतो भेदाभावात् । अत्र यथासंख्यमिति विशेषणात् प्रत्येकार्द्धश्लोकोक्तानि लिङ्गानि यथाक्रमं वातादिभि-र्व्वाशब्दात् तथा मिश्रैर्द्वन्द्वै: सन्निपतितैश्च यथायोगं मिश्राणि सर्व्वाणि लिङ्गानि च भवन्तीति बोध्यम् । नह्यञ्जसा आयुर्व्वेदे त्रिदोषप्रतिपादकत्वेन सङ्केतितस्य मिश्रशब्दस्येह सन्निपतितदोषपरत्वेन व्याख्यानमनुपपन्नम् परमत: 'सर्व्वांश्च सर्व्वजे' इत्यनेन सान्निपातिकस्यास्य शूलस्य प्रतीकारविधानात् । अथ चेदत्र मिश्रशब्देन सन्निपतितं दोषत्रितयं नादातुमिच्छसि तर्हि तत्कृतशूलस्य प्रतीकारविधानं खपुष्पाहरणप्रयास इवापार्थकं भवतीत्यध्यवसेयम् । उक्तानां गुल्मोपद्रवभूतानां सप्तविधानां शूलानां प्रतीकारक्रममुपदिदिक्षति वीक्ष्येति ।

उष्णाम्लकाञ्जिकक्षीरतोयैः श्लोकसमापनान् ।
यथाक्रमं विमिश्रांश्च द्वन्द्वे सर्व्वांश्च सर्व्वजे ॥
तथैव सेकावगाह-प्रदेहाभ्यङ्गभोजनम् ।
शिशिरोदकपूर्णानां भाजनानाञ्च धारणम् ॥
वमनोन्मर्द्दनस्वेद-लङ्घनक्षपणक्रियाः ।
स्नेहादिश्च क्रमः सर्व्वो विशेषेणोपदिश्यते ॥ १८ ॥
वल्लूरं मूलकं मत्स्यान् शुष्कशाकानि वैदलम् ।
न खादेदालुकं गुल्मी मधुराणि फलानि च ॥ १९ ॥

वीक्ष्य दोषलिङ्गान्यभिसमीक्ष्य पथ्येत्यादिभि स्त्रिभिः श्लोकैरुपदिष्टान् श्लोकसमापनान् त्रीन् योगान् यथाक्रमं वाय्वादिजेषु त्रिषु, विमिश्रान् द्वाभ्यां द्वाभ्यां मिलितान् त्रीन् योगान् द्वन्द्वे द्विदोषजे त्रितये, सर्व्वान् त्रीनेव योगान् सर्व्वजे सान्निपातिके गुल्मोपद्रवशूले उष्णाम्लकाञ्जिकक्षीरतोयै र्योजयेदिति पूर्व्वेणान्वयः। अत्रोष्णाम्लकाञ्जिकेन वातजे, औपयौगिकत्वात् कोष्णेन क्षीरेण पित्तजे, उष्णेन तोयेन च कफजे इत्येव बुद्धिमद्भिरुह्यम्। एवञ्च द्वन्द्वजे सान्निपातिके च दोषतारतम्यमभिसमीक्ष्यैतेषां मध्ये बलवद्दोषप्रत्यनीकेन येन केनचिदुपयोगः साम्प्रतं भवति तेनैवोपयोजयेदित्युपदेशः। केचिदत्र पथ्येत्यादि वचनत्रितयं "पथ्या चित्रवर्णाञ्चारं हिङ्गुतुम्बुरु पौष्करम्। यवान्यथ हरिद्राच विडङ्गान्यम्लवेतसम्। विदारी त्रिफलाऽभीरु शृङ्गाटी गुड़शर्करा। काश्मरीफल यष्ट्याह्व परूषक हिमानि च। षड्ग्रन्थातिविषादारुपथ्या मरिच द्रवकान्। कृष्णा मूलकचव्यञ्च नागरक्षार चित्रकान्॥"

इत्येवं प्रथमाद्वितीयाभ्यां विष्ठलमपि पठित्वा व्याख्यापयन्तः कथं नु खलु वैयाकरणपाशाइव नापत्रपेरन् ॥ १८ ॥

श्लोकसमापनान् योगानुपदिश्य पुनरर्द्धश्लोकसमापनान् विधीनभिधत्ते तथैवेति। अत्र तथैवेत्यनेन वीक्ष्य यथाक्रमं पृथग् वातादिजेषु, विमिश्रांश्च द्वन्द्वे। सर्व्वांश्च सर्व्वज इत्याकृष्यान्वीयते इत्यूह्येयम्। तथा च सेकादीन्यत्र वातप्रत्यनीकानि स्निग्धोष्णादीन्येवादेयानि। शिशिरेत्यादौ चकारात् शीतानां सेकावगाहा-

विना गुल्मेन यच्छूलं गुल्मस्थानेषु जायते ॥
निदानं तस्य वक्ष्यामि रूपञ्च सचिकित्सितम् ॥ २० ॥
वातमूत्रपुरीषाणां निग्रहादतिभोजनात् ।
अजीर्णाध्यशनायासविरुद्धान्नोपसेवनात् ॥
पानीयपानात् क्षुत्काले विरूढानाञ्च सेवनात् ।
पिष्टान्नशुष्कमांसानामुपयोगात् तथैव च ॥
एवंविधानां द्रव्याणामन्येषाञ्चोपसेवनात् ।
वायुः प्रकुपितः कोष्ठे शूलं सञ्जनयेद् भृशम् ॥
निरुच्छ्वासो भवेत् तेन वेदनापीड़ितो नरः ॥
शङ्कुस्फोटनवत् तस्य यस्मात् तीव्राश्च वेदनाः ।
शूलासक्तस्य लक्ष्यन्ते तस्माच्छूलमिहोच्यते ॥
निराहारस्य यस्यैव तीव्रं शूलमुदीर्य्यते ।
प्रस्तब्धगात्रो भवति कृच्छ्रेणोच्छ्वसितीव च ॥

दीनां, वमनेत्यादौ च क्षपणक्रियेत्यनेन क्षयकराणां लघूष्णतीक्ष्णरुक्षादीनामेव परिग्रहः क्रियते, क्षपणेति हि 'क्षै क्षये' णिचि कृतात्वस्य पुपि मित्वे रूपम्। लङ्घनन्तूपवासः। स्नेहादिः स्नेहस्वेदादिः, विशेषेण प्रभेदेन, विशेषणमिदं दोषवलमभिवीक्ष्य स्नेहस्वेदादीनां यथायोगमुपयोगं व्यनक्तीत्यध्यवसेयम्। परिशिष्टं निगदव्याख्यातम् ॥ १९ ॥

विनेत्यादि। गुल्मस्थानेष्विति स्थानशब्दोऽयमजहत् स्वार्थया लक्षणया तत्समीपवर्त्तिदेशमपि लक्षयतीत्यवश्यं वक्तव्यं त्रिकपृष्ठादावपि शूलोत्पत्तेः। आमनन्ति च "वायुः प्रवृद्धो जनयेद्धि शूलं हृत्पार्श्वं पृष्ठत्रिकवस्तिदेशे"। इति। विरूढ़ानामङ्कुरितानां मुद्गादीनाम्। अनुक्तसंग्रहणायाह एवं विधानामिति। एवञ्च "शोकोपवासादतिहास्यभाष्यात् कलायमुद्गाढकि कोरदूषात्" इत्यादि

वातमूत्रपुरीषाणि कृच्छ्रेण कुरुते नरः।
एतैर्लिङ्गैर्विजानीयाच्छूलं वातसमुद्भवम् ॥ २१ ॥
तृष्णा दाहो मदो मूर्च्छा तीव्रं शूलं तथैव च।
शीताभिकामो भवति शीतेनैव प्रशाम्यति ॥
एतैर्लिङ्गैर्विजानीयाच्छूलं पित्तसमुद्भवम् ॥
शूलेनोत्पीड्यमानस्य हृल्लास उपजायते।
अतीव पूर्णकोष्ठत्वं तथैव गुरुगात्रता ॥
एतत् श्लेष्मसमुत्थस्य शूलस्योक्तं निदर्शनम् ॥
सर्व्वाणि दृष्ट्वा रूपाणि निर्द्दिशेत् सान्निपातिकम्।
सन्निपातसमुत्थानमसाध्यं तं विनिर्द्दिशेत् ॥ २२ ॥
शूलानां लक्षणं प्रोक्तं चिकित्साञ्च निबोध मे।
आशुकारी हि पवनस्तस्मात् तं त्वरया जयेत् ॥
तस्य शूलाभिपन्नस्य स्वेद एव सुखावहः।
पायसैः कृशरापिण्डैः स्निग्धैर्वा पिशितैर्हितः ॥
विल्वक्षारेण वा स्निग्धमुष्णं भुञ्जीत भोजनम्।
चिरविल्वाङ्कुरान् वापि तैलभृष्टांस्तु भक्षयेत् ॥

तस्मात्तरीमपि नातिरिच्यते। रोगस्यास्य वेदनाविशेषजनकत्वं व्युत्पत्त्या स्फुटीकृत्यावगमयति शङ्कुरिति। शङ्कुर्नाम शस्त्रं शूलविशेषः 'शेल' इति प्रथते ॥२०—२१॥

तृष्णेत्यादि। मदोऽनभिव्यक्त उन्मादस्तत्साम्यान्मद इह दाहशूलाद्यभिभूततया सदसद्विवेकानर्होऽयथोचित वाक्चेष्टाप्रायः। निश्चित्य दृश्यत उपलभ्यतेऽनेनेति निदर्शनं लिङ्गमित्यर्थः ॥ २२ ॥

वैहङ्गांश्च रसान् स्निग्धान् जाङ्गलान् शूलपीड़ितः ।
यथालाभं निषेवेत मांसानि विलशायिनाम् ॥
सुरा सौवीरकं शुक्तं मस्तूदश्वित् तथा दधि ।
सकाललवणं पेयं शूले वातसमुद्भवे ॥
कुलत्थयूषो युक्ताम्लो लावकौयूषसंस्कृतः ।
ससैन्धवः समरिचो वातशूलविनाशनः ॥
विड़ङ्गं शिग्रुकम्पिल्ल-पथ्याश्यामाम्लवेतसान् ।
सुरसामश्वकर्णञ्च सौवर्च्चलयुतान् पिबेत् ॥
मद्येन वातजं शूलं क्षिप्रमेव प्रशाम्यति ॥
पृथ्वीकाजाजिचविका-यवानीव्योषचित्रकाः ।
पिप्पल्यः पिप्पलीमूलं सैन्धवञ्चेति चूर्णयेत् ॥
तानि चूर्णानि पयसा पिबेत् काम्बलिकेन वा ।
मध्वासवेन चुक्रेण सुरासौरकेण वा ॥
अथवैतानि चूर्णानि मातुलुङ्गरसेन वा ।
तथा वदरयूषेण भावितानि पुनःपुनः ॥
तानि हिङ्गुप्रगाढ़ानि सह शर्करया पिबेत् ।
सह दाड़िमसारेण वर्त्तिः कार्य्या भिषग्जिता ॥
सा वर्त्तिर्वातिकं शूलं क्षिप्रमेव व्यपोहति ।
गुड़तैलेन वा लीढ़ा पीता मद्येन वा पुनः ॥ २३ ॥
वुभुक्षाप्रभवे शूले लघु सन्तर्पणं हितम् ।
ऊष्माः क्षीरैर्यवागूभिः स्निग्धैर्मांसरसैस्तथा ॥

सुरेत्यादि । उदश्वित् उदकेन मथितं तक्रम् । लावकौयूषसंस्कृतः क्षुद्रलावयूषेण संमिश्रः ।

वातशूले समुत्पन्ने रुक्षं स्निग्धेन भोजयेत्।
सुसंस्कृताः प्रदेयाः स्युर्घृतपूरा विशेषतः॥
वारुणीञ्च पिबेज्जन्तुस्तथा सम्पद्यते सुखी।
एतद्वातसमुत्थस्य शूलस्योक्तं चिकित्सितम्॥ २४॥
अथ पित्तसमुत्थस्य क्रियां वक्ष्याम्यतः परम्।
स सुखं छर्दयित्वा तु पीत्वा शीतोदकं नरः।
शीतलानि च सेवेत सर्व्वाण्युष्णानि वर्ज्जयेत्॥
मणिराजतताम्राणि भाजनानि च सर्व्वशः।
वारिपूर्णानि तान्यस्य शूलस्योपरि निक्षिपेत्॥
गुड़शालियवाः क्षीरं सर्पिःपानं विरेचनम्।
जाङ्गलानि च मांसानि भेषजं पित्तशूलिनाम्॥
रसान् सेवेत पित्तघ्नान् पित्तलानि विवर्ज्जयेत्॥
पालाशं धान्वानं वापि पिबेद्यूषं सशर्करम्।
परूषकाणि मृद्वीकाखर्ज्जुरोदकजान्यपि।
तत् पिबेच्छर्करायुक्तं पित्तशूलनिवारणम्॥ २५॥
अशने भुक्तमात्रे तु प्रकोपः श्लैष्मिकस्य च।
वमनं कारयेत् तत्र पिप्पलीवारिणा भिषक्॥
रुक्षः स्वेदः प्रयोज्यः स्यादन्यास्चोष्णाः क्रिया हिताः।
पिप्पली शृङ्गवेरञ्च श्लेष्मशूले भिषग्जितम्॥

सुसंस्कृता इति। घृतपूरा घृतभृष्टाः सामितपिष्टक विशेषः "घियोर" इति वङ्गैराख्यायन्ते॥ २३॥

परूषकानीति। उदकजानि शालूकादीनि यानि लभ्यन्ते, तदिति "नपुंसकमनपुंसकेनैकवत्" इति पा० सू० १।२।६९ एकवत्॥ २४—२५॥

पाठां वचां त्रिकटुकं तथा कटुकरोहिणीम्।
चित्रकस्य च निर्य्यूहं पिबेद्यूषं समार्ज्जकम्॥
एरण्डफलमूलानि मूलं गोक्षुरकस्य च।
शालपर्णीं पृश्निपर्णीं बृहतीं कण्टकारिकाम्॥
दद्याच्छृगालविन्नाञ्च सहदेवां तथैव च।
महासहां क्षुद्रसहां मूलञ्चेक्षुरकस्य च॥
एतत् सम्भृत्य सम्भारं जलद्रोणे विपाचयेत्।
चतुर्भागावशेषन्तु यवक्षारयुतं पिबेत्॥
वातिकं पैत्तिकं वापि श्लैष्मिकं सान्निपातिकम्।
प्रसह्य नाशयेच्छूलं छिन्नाभ्रमिव मारुतः॥
पिप्पल्यः स्वर्ज्जिकाक्षारो यवश्चित्रक एव च।
सेव्यश्चैव समानीय भस्म कुर्य्याद्विचक्षणः॥
तदुष्णवारिणा पीतं श्लेष्मशूले भिषग्जितम्॥ २६॥
रुणद्धि मारुतं श्लेष्मा कुक्षिपार्श्वव्यवस्थितः।
स संरुद्धः करोत्याशु ध्मानं गुड़गुड़ायनम्॥

पाठामित्यादि। निर्य्यूहः क्वाथः। अर्ज्जकश्च पर्णासभेदः "बाबरी" इत्यभिधीयते। योगेऽस्मिन् प्रथमं तावत् षड़ङ्गपानीयविधिना विपक्वे चित्रक मूलत्वक्क्वाथे पाठादीनां षण्णामर्द्धकर्षं मुद्गार्ज्जकौ च पृथगर्द्धपलं पक्त्वा यूषं पिबेदित्युपदेशः। एरण्डेत्यादि। शृगालविन्ना बृहत्पत्रा पृश्निपर्णी। सहदेवा दण्डोत्पला, महासहा माषपर्णी, क्षुद्रसहा मुद्गपर्णी, इक्षुरकः कोकिलाक्षः। यवक्षारमत्र प्रसृमात्रं प्रदाय लेहीभूतं पचेदित्याहुः। पिप्पल्य इत्यादि। यवो यवक्षारः। चशब्दः समुच्चयार्थे एवशब्दश्चात्यन्तायोगव्यवच्छेदार्थः। तदयमर्थः। पिप्पल्यादिरपि प्रसह्य शूलं नाशयेदेव। योगान्तरमाह सेव्यमिति चशब्देनात्र पिप्पल्यादयः समुच्चीयन्ते, तथाच सेव्य मुशीरं पिप्पल्यादिकञ्च समानीयैव भस्म कुर्य्यादित्यर्थः॥ २६॥

सूचीभिरिव निस्तोदः कृच्छ्रोच्छ्वासी तदा नरः ।
नान्नं वाञ्छति नो निद्रामुपैत्यर्त्तिनिपीड़ितः ।
पार्श्वशूलः स विज्ञेयः कफानिलसमुद्भवः ॥
तत्र पुष्करमूलानि हिङ्गु सौवर्च्चलं विड़म् ।
सैन्धवं तुम्बुरूपथ्याचूर्णं कृत्वा तु पाययेत् ॥
पार्श्वहृद्बस्तिशूलेषु यवक्वाथेन संयुतम् ।
सर्पिः प्लीहोदरोक्तं वा घृतं वा हिङ्गुसंयुतम् ॥
वीजपूरकसारं वा पयसा सह साधितम् ।
एरण्डतैलमथ वा मद्यमस्तुपयोरसैः ।
भोजयेच्चापि पयसा जाङ्गलेन रसेन वा ॥ २७
प्रकुप्यति यदा कुक्षौ वह्निमाक्रम्य मारुतः ।
तदास्य भोजनं भुक्तं सोपस्तम्भं न पच्यते ॥
उच्छ्वसित्यामशक्तता शूलेनाहन्यते मुहुः ।
नैवासने न शयने तिष्ठन् स लभते सुखम् ॥
कुक्षिशूल इति ख्यातो वातादामसमुद्भवः ॥ २८ ॥

स्तनतीति ध्मानं शब्दम् । सर्पिरिति । अत्र पूर्व्वस्मात् पाययेदित्याकृष्यानीयते। तप्ते पयसि जम्बीर रस योगादामिक्षामुत्पाद्यपाययितुमिदमुच्यते वीजेति। वीज पूरकशब्देनेह जम्बीर सामान्यस्यैव परिग्रहः क्रियत आमिक्षाजनकत्वसाधर्म्यात्। "सारो वले स्थिरांशे च मज्ज्ञि पुंसिजले घने" इति मेदिनी स्मरणात् सारो जलम्, अत्र तु रसमिति तात्पर्य्यम् ॥ २७ ॥

प्रकुप्यतीति सोपस्तम्भं सजड़ीभावं भोजनमन्नजातम् । आमशक्ततेत्युपलक्षणे तृतीया ॥ २८ ॥

वमनं कारयेत् तत्र लङ्घयेद्वा यथाबलम्।
संसर्गपाचनं कुर्य्यादम्लैर्दीपनसंयुतैः॥ २९॥
नागरं दीप्यकं चव्यं हिङ्गु सौवर्च्चलं विड़म्।
मातुलुङ्गस्य बीजानि तथा श्यामोरुबूकयोः।
बृहत्याः कण्टकार्य्याश्च क्वाथं शूलहरं पिबेत्॥
वचा सौवर्च्चलं हिङ्गु कुष्ठं सातिविषाभया।
कुटजस्य च बीजानि सद्यः शूलहराणि तु॥ ३०॥
विरेचनं प्रयुञ्जीत ज्ञात्वा दोषबलाबलम्।
स्नेहवस्तीन् निरूहांश्च कुर्य्याद्दोषनिबर्हणान्।
उपनाहाः स्नेहसेका धान्याम्लपरिषेचनम्॥
कफपित्तावरुद्धस्तु मारुतो रसमूर्च्छितः।
हृदिस्थः कुरुते शूलमुच्छ्वासरोधकं परम्॥
स हृच्छूल इति ख्यातो रसमारुतसम्भवः।
तत्रापि कर्म्माभिहितं यदुक्तं हृद्विकारिणाम्॥
संरोधात् कुपितो वायुर्वस्तिमावृत्य तिष्ठति।
वस्तिवङ्क्षणनाभीषु ततः शूलोऽस्य जायते।
विण्मूत्रवातसंरोधी वस्तिशूलः स मारुतात्॥

वमनमिति। अत्राविशेषेऽप्यादौ वमनं पश्चात् लङ्घनम् ततश्च दीपनसंयुक्तैर्हिङ्गुसैन्धवसमन्वितैरम्लैर्मातुलुङ्गादिभिः सह संसर्गं पाचनं षड़ङ्गपानीय विधिना शृतेन पिप्पल्यादि वारिणा पक्वं यवमण्डादिकम्॥ २९॥

नागरमिति। अत्र बीजानीति पदं प्रत्येकं षष्ठ्यन्तेन पदेन सम्बध्यते। श्यामा श्याममूलाविहत्, अस्यावीजा लाभेमूलमादेकम्॥ ३०॥

नाभ्यां वङ्क्षणपार्श्वेषु कुक्षौ मेढ्रान्त्रमर्द्दकः।
मूत्रमावृत्य गृह्णाति मूत्रशूलः स मारुतात्॥
वायुः प्रकुपितो यस्य रूक्षाहारस्य देहिनः।
मलं रुणद्धि कोष्ठस्थं मन्दीकृत्य तु पावकम्॥
शूलं सञ्जनयंस्तीव्रं स्रोतांस्यावृत्य तस्य हि।
दक्षिणं यदि वा वामं कुक्षिमादाय जायते॥
सर्व्वञ्च वर्द्धते क्षिप्रं शूलं तत्र सघोषवत्।
पिपासा वर्द्धते तीव्रा भ्रमो मूर्च्छा च जायते॥
उच्चारितो मूत्रितश्च न शान्तिमधिगच्छति॥
विट्शूलमेतज्जानीयाद्भिषक् परमदारुणम्॥
क्षिप्रं दोषहरं कार्य्यं भिषजा साधु जानता।
स्वेदनं वमनञ्चैव निरूहाः स्नेहवस्तयः॥
पूर्व्वोद्दिष्टान् पाययेत योगान् कोष्ठविशोधनान्।
उदावर्त्तहराश्चास्य क्रियाः सर्व्वाः सुखावहाः॥ २१॥
अतिमात्रं यदा भुक्तं पावके मृदुतां गते।
स्थिरीभूतन्तु तत् कोष्ठे वायुरावृत्य तिष्ठति॥
अविपाकगतं ह्यन्नं शूलं तीव्रं करोत्यति।
मूर्च्छाध्मानं विदाहञ्च हृदुत्क्लेशं विलम्बिकाम्॥

पिपासेत्यादौ। उच्चारितो विसृष्टपुरीषः। पूर्व्वोद्दिष्टान् सू ४३।४४ अं उपदिष्टान्। उदावर्त्तहराः परमतः "५५ अं" वक्ष्यमाणाः॥ २१॥

* अतीति। हृत्पीड़क उत्क्लेशो हृदुत्क्लेशः। शाकपार्थिवादिः। तं तथोक्तम्। इदमत्रावधेयम् 'शा ४ अं' हृत्पीड़ाया उत्क्लेशलिङ्गत्वेनोपदेशा दत्रोत् क्लेशमिति वक्तव्ये हृदुत्क्लेशमिति पीड़ायाः-स्तस्याः प्राचुर्य्यमाख्यापयितुम्।

विरिच्यते च्छर्द्दयति कम्पतेऽथ विमुह्यति ।
क्षाराश्चूर्णानि गुटिकाः शस्यन्ते शूलनाशनाः ॥
गुल्मावस्थाः क्रियाः कार्य्या यथावत् सर्व्वशूलिनाम् ॥३२॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे गुल्मप्रतिषेधो नाम द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

विरिच्यते इति कर्म्मकर्त्तरि नेयम् । क्षाराश्चूर्णानि गुटिकाश्च शूलगुल्महराण्येव बोद्धव्यानि प्रयोगस्त्वेषां संसिद्धाभ्यां छर्द्दिविरेचनाभ्यां निष्कृतावशस्यत्व एवाभिनन्दन्ति कुशलाः, अवशस्यच्छर्द्दनोह्य नलोनार्हति शस्यमौषधानि च तानि कथमपि युगपत् पक्तम् ; एवञ्च यस्य संसिद्धे छर्द्दिविरेचने न जायेते तमादावेव सलवणेनोष्णेन वारिणा कोष्ठशुद्ध्यर्थं वामयेदित्युपदेशः ॥ ३२ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे गुल्म प्रतिषेधो नाम द्विचत्वारिंशत्तमोऽध्यायः ।

त्रिचत्वारिंशोऽध्यायः ।

अथातो हृद्रोगप्रतिषेधं व्याख्यास्यामः ॥ १ ॥

वेगाघातोष्णरूक्षान्नैरतिमात्रोपसेवितैः ।
विरुद्धाध्यशनाजीर्णैरसात्म्यैश्चापि भोजनैः ॥
दूषयित्वा रसं दोषा विगुणा हृदयं गताः ।
कुर्व्वन्ति हृदये बाधां हृद्रोगं तं प्रचक्षते ॥ २ ॥
चतुर्व्विधः स दोषैश्च पञ्चमः क्रिमिभिस्तथा ।
पृथग्लिङ्गं प्रवक्ष्यामि चिकित्सितमनन्तरम् ॥ ३ ॥
आयम्यते मारुतजे हृदयं तुद्यते तथा ।
निर्म्मथ्यते दीर्य्यते च स्फोट्यते पाट्यतेऽपि च ॥ ४ ॥

पूर्व्वाध्याये "तत्राऽपि कर्म्माभिहितं यदुक्तं छर्द्दिकारिणाम्" इति नाममात्रेणोपदिष्टं हृद्रोगचिकित्सितं भिषजां किमति स्वार्थसाधनाय नालमिति कृत्वेदानीं तदेव पुनः प्रपञ्चेनावगमयन् हृद्रोगप्रतिषेधमधिकरोति तथात इत्यादिना ॥ १ ॥

वेगेत्यादि, रसोऽत्र हृद्गतत्वेनानुभवाद्रक्तत्वेन परिणम्यमाणः परिणतो वेत्यध्यवसितव्यं शोणितवर्णनीयमभिसमीक्ष्य । बाधा पीड़ेति पर्य्यायौ, आयम्यते वायुना प्रकोष्ठद्वारच्छदनानि छित्वा दीर्घीक्रियते विष्फार्य्यत इति यावत् । येन शोणित वहानि तानि विष्फारितानि द्वाराणि नाच्छाद्यन्ते यथावत्, असम्यगाच्छादनाच्च तेषां "धक्धक्" इति सहजं हृच्छब्दं तिरस्कृत्य प्रवर्त्तेतरां "घुप्घुप्" इत्यप्रतिहतशोणितवेगाऽभिनिर्वृत्तो वैकारिकः शब्दविशेषः ।

तृष्णोष्मदाहचोषाः स्युः पैत्तिके हृदयक्लमः ।
धूमायनञ्च मूर्च्छा च स्वेदः शोषो मुखस्य च ॥ ५ ॥
गौरवं कफसंस्रावोऽरुचिस्तम्भोऽग्निमार्द्दवम् ।
माधुर्य्यमपि चास्यस्य बलासावतते हृदि ।
त्रिदोषं सर्व्वलिङ्गं स्यादोजः क्षयकरं परम् ।
उत्क्लेशः ष्ठीवनं तोदः शूलो हृल्लासकस्तमः ॥
अरुचिः श्यावनेत्रत्वं शोषश्च क्रिमिजे भवेत् ॥ ६ ॥
पाण्डुत्वं स्वेदशोथौ च श्वासोहृदयकम्पनम् ।
भ्रमक्लमौ सादशोषौ ज्ञेयास्तेषामुपद्रवाः ॥
क्रिमिजे क्रिमिजातीनां श्लैष्मिकाणाञ्च ये मताः ॥ ७ ॥

अथ चेद् हार्द्दं शब्ददैर्घ्यं सुष्ठ्ववगन्तुमिच्छसि, तर्हि वार्क्षीं शार्ङ्गीं तैजसीं वा कलायवाहिच्छिद्रामधःसन्निविष्टकर्णिकां मण्डलाग्रां द्विमुखीं नाड़ीमग्रतः स्वकर्णेऽन्ततश्चातुरहृदयप्रदेशोपरि संसज्य लक्षय तावन्नैपुण्येन। अनयैव दिशा शेषदोषदुष्टहृदयशब्दस्पन्दावपि लक्षणीयौ। तुद्यते सूच्येव, निर्म्मथ्यते दण्डेनेव, दीर्य्यते कुठारेणेव, स्फुट्यते आरयेव, पाट्यते करपत्रेणेव ॥ २।४ ॥

तृष्णेति। हृदयक्लोम इति क्लमशब्दः खल्वायुर्व्वेदे मुख्यया वृत्त्या मनाक् श्वासान्विते श्रमविशेषे प्रवर्त्तत इति निश्चीयते क्लमलक्षणं प्रकृत्यामनन्ति (सु'शा० ४ अ०' "योऽनायासः श्रमोदेहे प्रवृद्धः श्वासवर्ज्जितः" इति, सच हृदये न सम्भवतीति गौण्या वृत्त्या हार्द्दे चिप्रतरे शब्दे स्पन्दे च प्रवर्त्तत इत्यव धारय। यथा केशरादिमानाकृतिविशेषः सिंहशब्दप्रत्ययभाग्भवति, प्रायिकैश्च क्रौर्य्यशौर्य्यादिभि सिंहगुणैः सम्पन्ने माणवके सिंहशब्दस्तद्वत्, एवञ्च चिप्रतरौ शब्दस्पन्दावभिसमीक्ष्य पित्तदुष्टमिदं हृदयमित्यवधारय। गौरवमिति। स्तम्भोऽत्र हृदयस्य मन्दशब्दस्पन्दत्वेन जड़ीभावः। उत्क्लेश इति। उत्क्लेशो नाम (शां ४ अं) "उत्क्लिश्यान्नं न निर्गच्छेत्" इत्याद्युक्तलक्षणः। ष्ठीवनमास्यस्रवणं हृल्लासोऽत्र क्लिमीणामुद्गमनेनोत्क्लेशावभासो विकारविशेषः ॥ ५।६ ॥

वातोपसृष्टे हृदये वामयेत् स्निग्धमातुरम्।
द्विपञ्चमूलक्काथेन सस्नेहलवणेन तु ॥ ८ ॥
पिप्पल्येला वचा हिङ्गु यवभस्मानि सैन्धवम्।
सौवर्चलमथो शुण्ठीमजमोदाञ्च चूर्णितम् ॥
फलधान्याम्लकौलत्थ-दधिमद्यासवादिभिः।
पाययेत विशुद्धञ्च स्नेहेनान्यतमेन वा ॥
भोजयेज्जीर्णशाल्यन्नं जाङ्गलैः सघृतै रसैः।
वातघ्नसिद्धं तैलञ्च दद्याद्वस्तिं प्रमाणतः ॥
श्रीपर्णीमधुकक्षौद्र-सितोत्पलजलैर्वमेत्।
पित्तोपसृष्टे हृदये सेवेत मधुरैः शृतम् ॥
घृतं कषायांश्चोद्दिष्टान् पित्तज्वरविनाशनान्।
दग्धस्य च रसैर्मुख्यैर्जाङ्गलैः सघृतैर्भिषक्।
सक्षौद्रं वितरेद्वस्तिं तैलं मधुकसाधितम् ॥ ९ ॥
वचानिम्बकषायाभ्यां वान्तं हृदि कफात्मके।
चूर्णन्तु पाययेतोक्तं वातजे भोजयेद्घृतम् ॥
फलादिमथमुस्तादिं त्रिफलां वा पिवेन्नरः ॥
श्यामात्रिवृत् कल्कयुतं घृतं वापि विरेचनम्।
वलातैलैर्विदध्याच्च वस्तिं वस्तिविशारदः ॥ १० ॥

अमेति। तेषां पञ्चानां हृद्रोगानाम्। क्रिमिजे पुनर्विशिनष्टि क्रिमिज इति अपि शब्द स्थानाधिष्ठानोऽयं च शब्दः तदयमर्थः श्लैष्मिकानां क्रिमिजातीनां क्रिमीणां ये लक्षणसमूहा वक्ष्यन्ते तेऽप्युपद्रवा इति। वातोपसृष्ट इति। अत्र द्वितीयश्लोके चूर्णितमिति नपुंसकानपुंसकयोगादेकत्वं क्लीवत्वञ्च ज्ञेयम्। वचेति, फलादिः (सू ३९ अं) मदनेत्यादितोक्तोवर्गः। मुस्तादिः सू ३८ अं द्रष्टव्यः। वलातैलं चिं १५ अं उपदिष्टम्। ७।१० ॥

क्रिमिहृद्रोगिणं स्निग्धं भोजयेत् पिशितौदनम् ।
दध्ना वा पललोपेतं त्र्यहं पश्चाद्विरेचयेत् ॥
सुगन्धिभिः सलवणैर्योगैः साजाजिशर्करैः ।
विड़ङ्गगाढ़ं धान्याम्लं पाययेताप्यनन्तरम् ॥
हृदयस्थाः पतन्त्येवमधस्तात् क्रमयो नृणाम् ।
यवान्नं वितरेच्चास्य सविड़ङ्गमतः परम् ॥ ११ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे हृद्रोगप्रतिषेधो नाम त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

क्रिमीति । पललं मांसं, हृदयस्था इति अधस्तान्मूत्रमार्गत एवेति नेयं । हृदयस्था हि ते क्रिमयो रक्तेन सह संसरन्तोहृक्कावतिक्रम्य सद्यैव मूत्रेण पतितु- मर्हन्ति न पुनर्गुदतो गुदाश्रितानां रक्तवहानां शिराधमनीनां निरुद्धमूलत्वात् । परिशिष्टं निगदव्याख्यातम् ॥ ११ ॥

इति श्रीहाराणचन्द्र चक्रवर्त्ति विरचिते सुश्रुतार्थ सन्दीपने सुश्रुतभाष्ये हृद्रोगप्रतिषेधोनाम त्रिचत्वारिंशत्तमोऽध्यायः ।

चतुश्चत्वारिंशोऽध्याय: ।

अथात: पाण्डुरोगप्रतिषेधं व्याख्यास्याम: ॥ १ ॥

व्यवायमम्लं लवणानि मद्यं मृदं दिवास्वप्नमतीव तीक्ष्णम् ।
निषेवमाणस्य विदूष्य रक्तं कुर्व्वन्ति दोषास्त्वचि पाण्डुभावम् ॥
पाण्ड्वामयोऽष्टार्द्धविध: प्रदिष्ट: पृथक् समस्तैर्युगपच्च दोषै: ।
सर्व्वेषु चैतेष्विह पाण्डुभावो यतोऽधिकोऽत: खलु पाण्डुरोग: ॥
त्वक्स्फोटनं ष्ठीवनगात्रसादौ मृद्भक्षणं प्रेक्षणकूटशोथा: ।
विण्मूत्रपीतत्वमथाविपाको भविष्यतस्तस्य पुर:सराणि ॥२॥
स कामलापानकिपाण्डुरोग: कुम्भाह्वयो लाघरकोऽलसाख्य: ।
विभाष्यते लक्षणमस्य कृत्स्नं निबोध वक्ष्याम्यनुपूर्व्वशस्तत् ॥३॥

जाते हि हृदामये निरङ्कुशं पाण्डुत्वमापद्यते तदिदानीं पाण्डुत्वजनकत्वेन हृद्रोगसाधर्म्म्यात् व्याचिख्यासितत्वेन बुद्धिमारूढं पाण्डुरोगमधिकरोति अथात इत्यादिना ॥ १ ॥

त्वगिति । मृद्भक्षणपदमत्राजहत् स्वार्थया लक्षणया तदभिलाषेऽपि प्रवर्त्तेत इत्यवश्यं वक्तव्यं तथैव प्रत्यक्षपरिकलितत्वात् । न ह्यञ्जसा मृद्भक्षणस्येह निदानत्वेनोपदेशेऽपि प्राग्रूपत्वमुपहन्यते विरोधाभावात् ॥ २ ॥

यथैको देवदत्त: स्वगतविशेषापेक्षया मनुष्यो ब्राह्मणोऽवदात: स्वगतावस्थाभेदापेक्षया बालो, युवा, स्थविर: स्वक्रियाभेदापेक्षया पाचको गायक: परापेक्षया च पिता पुत्रो भ्राता जामातेत्यनेकशब्दप्रत्ययभाक् भवति । तथैव पाण्डुरोगोऽपि तंतम् अवस्थाविशेषं तं तं दोषविशेषं तं तञ्च कर्म्मविशेषमासाद्य संज्ञान्तराण्याप्नोतीति साम्प्रतमुक्तं स इति, स पाण्डुरोगो नाम्ना कामलेत्यादिरपि विभाष्यत इत्यन्वय: । अत्र कामलेतिकामशब्दोऽयं साधारणशब्दविशेषात् स्वस्ये

कृष्णेक्षणं कृष्णशिरावनद्धं तद्वर्णविण्मूत्रनखाननञ्च ।
वातेन पाण्डुं मनुजं व्यवस्येद् युक्तं तथान्यैस्तदुपद्रवैश्च ॥
पीतेक्षणं पीतशिरावनद्धं तद्वर्णविण्मूत्रनखाननञ्च ।
पित्तेन पाण्डुं मनुजं व्यवस्येद्युक्तं तथान्यैस्तदुपद्रवैश्च ॥
शुक्लेक्षणं शुक्लशिरावनद्धं तद्वर्णविण्मूत्रनखाननञ्च ।
कफेन पाण्डुं मनुजं व्यवस्येद्युक्तं तथान्यैस्तदुपद्रवैश्च ॥४॥
सर्व्वात्मके सर्व्वमिदं व्यवस्येद्वक्ष्यामि लिङ्गान्यथ कामलायाः ॥५
यो ह्यामयान्ते सहसान्नमम्लमद्यादपथ्यानि च तस्य पित्तम् ।
करोति पाण्डुं वदनं विशेषात् तन्द्राविलत्वं प्रथमोदितांश्च ॥६॥
भेदस्तु तस्याः खलु कुम्भसाह्वं शोफो महांस्तत्र च पर्व्वभेदः ॥७॥
ज्वराङ्गमर्दभ्रमसादतन्द्राक्षयान्वितो लाघवकोऽलसाख्यः ॥८॥
तं वातपित्ताभिपरीतलिङ्गं हलीमकं नाम वदन्ति तज्ज्ञाः ॥९॥

भक्ताद्यभिलाषे प्रवर्त्तते, तं लातीति कामला । दुष्टत्वेन कुत्सितोऽपानोऽपानकः, सोऽस्यास्तीति अपानकी । कामलाख्योऽपानकिपाण्डुरोगः कामलापानकिपाण्डुरोगः कुम्भकामलाख्योऽपानकिपाण्डुरोगस्तत्र कुम्भाह्वय उच्यते, भीमो भीमसेन इतिवत् रोगस्यास्य कुम्भकामलेति संज्ञा तन्त्रान्तर उपदिश्यते "कालान्तरात्खरीभूता कृच्छ्रा स्यात् कुम्भकामला" इति । स एव पुनर्ज्वरादिभिर्लाघवं करोति, सत्यपि सामर्थ्ये कर्म्मस्वनुत्साहञ्च जनयतीत्यलसाख्योऽपानकिपाण्डुरोगस्तु लाघवक उच्यते, एतच्च परमतो निवेदितेन लाघवकलक्षणेनोपपत्स्यते ॥ ३ ॥

सम्प्रति वाक्तुमभ्युपगतं पाण्डुरोगलिङ्गजातं यथाक्रमं व्याहरति कृष्णेति । निगद व्याख्यातमेतत् । नहि तावन्नाममात्रेणोपदिष्टो व्याधिः किमपि भिषजां प्रत्ययाय प्रभवतीति ज्ञात्वा कामलादीनां लिङ्गानि निवेदयितुं प्रतिजानीते वक्ष्यामीति । अत्र लिङ्गतः कुम्भसाह्वस्य लाघवकस्य च विवक्षितत्वे सत्यपि कामलाया इत्येकवचनं नानुपपन्नं तयोरपि तद्विशेषत्वेनोपदेशात् ॥ ४।५ ॥

उपद्रवास्तेष्वरुचिः पिपासा च्छर्दिर्ज्वरो मूर्द्धरुजाग्निसादः।
शोफस्तथा कण्ठगतोऽबलत्वं मूर्च्छा क्लमो हृदयपीड़नञ्च ॥१०॥
साध्यन्तु पाण्डामयिनं समीक्ष्य स्निग्धं घृतेनोर्द्ध्वमधश्च शुद्धम्।
सम्पादयेत् क्षौद्रघृतप्रगाढ़ैर्हरीतकीचूर्णयुतैः प्रयोगैः ॥
पिबेद्घृतं वा रजनीविपक्वं यत् त्रैफलं तैल्वकमेव वापि।
विरेचनद्रव्यकृतं पिबेद्वि योगांश्च वैरेचनिकान् घृतेन ॥
मूत्रे निकुम्भार्द्धपलं विपाच्य पिबेदभीक्ष्णं कुड़वार्द्धमात्रम्।
खादेद्गुड़ं वाप्यभयाविमिश्रमारग्वधादिक्वथितं पिबेद्वा ॥
अयोरजो व्योषविड़ङ्गचूर्णं लिह्याद्धरिद्रां त्रिफलान्वितां वा।
सर्पिर्मधुभ्यां विदधीत वापि शास्त्रप्रदर्शाभिहितांश्च योगान् ॥
हरेच्च दोषान् बहुशोऽल्पमात्रान् श्वयेद्धि दोषेष्वतिनिर्हृतेषु ॥११
धात्रीफलानां रसमिक्षुजञ्च मन्थं पिबेत् क्षौद्रयुतं हिताशी।
उभे बृहत्यौ रजनीं शुकाख्यां काकादनीञ्चापि सकाकमाचीम् ॥
पाटारिबिम्बीं सकदम्बपुष्पीं विपाच्य सर्पिर्विपचेत् कषाये।
तत् पाण्डुतां हन्त्युपयुज्यमानं क्षीरेण वा मागधिकां यथाग्नि ॥

य इति अतिरोहितार्थमेतत् ॥ ६—१० ॥

साध्यमिति। त्रिफलाक्वाथ कल्कसिद्धं त्रैफलं तैल्वकं वातव्याधावुपदिष्टम्। निकुम्भो दन्तीति पर्य्यायौ। अत्र "कर्षादौ तु पलं यावद्दद्यात् षोड़शिकं जलं" इति स्मरणाच्छरावमेयं मूत्रमादेयम्। कुड़वार्द्धमात्रं पिबेदित्येवमविशेषेणोपदेशेऽपि "मात्राया नास्त्यवस्थानम्" इत्याद्यनुशासनाद् यथायोगं मात्रा निरूपणीयेत्युपदेशः। सर्पिरिति। शास्त्रप्रदर्शाभिहितान् पाण्डुरोग चिकित्सितोपदिष्टानन्यांश्च योगान् सर्पिर्मधुभ्यां विदधीतेति योजना। श्वयेत् शोथी भवेत्। मन्थः सू ४६ अम् उपदिष्टः। अत्र क्षौद्रयुतमिति धात्रीफलरसादिभिस्त्रिभिरेव सम्बध्यते। अत्र हिताशीति विशेषणम् एतेषां मात्रावदुपयोगमुपयोगकाले च

हितश्च यष्टीमधुकं कषायं चूर्णं समं वा मधुनावलिह्यात् ॥
गोमूत्रयुक्तं त्रिफलादलानां दत्त्वायसां चूर्णमनल्पकालम् ।
प्रवालमुक्ताञ्जनशङ्खचूर्णं लिह्यात् तथा काञ्चनगैरिकोत्थम् ॥
आजं शकृद्वा कुडवप्रमाणं विड़ं हरिद्रां लवणोत्तमञ्च ।
पृथक्पलांशानि समग्रमेतच्चूर्णं हिताशी मधुनावलिह्यात् ॥
मण्डूरलोहाग्निविड़ङ्गपथ्याव्योषांशकः सर्व्वसमानताप्यः ।
मूत्रायुतोऽयं मधुनावलेहः पाण्डामयं हन्त्यचिरेण घोरम् ॥
विभीतकायोमलनागराणां चूर्णं तिलानाञ्च गुड़श्च मुख्यः ।
तक्रानुपानं वटकाप्रयुक्तं क्षिणोति घोरानपि पाण्डुरोगान् ॥
सौवर्च्चलं हिङ्गुकिराततिक्तं कलायमात्राणि सुखाम्बुना वा ।
मूर्व्वाहरिद्रामलकञ्च लिह्यात् स्थितं गवां सप्त दिनानि मूत्रे ॥
मूलं वलाचित्रकयोः पिवेद्वा पाण्डामयार्त्तोऽक्षसमं हिताशी ।
सुखाम्बुना वा लवणेन तुल्यं शिग्रोः फलं क्षीरभुजोपयोज्यम् ॥
न्यग्रोधवर्गस्य पिवेत् कषायं शीतं सिताक्षौद्रयुतं हिताशी ।
शालादिकञ्चाप्यथ सारचूर्णं धात्रीफलं वा मधुनावलिह्यात् ॥
विड़ङ्गमुस्तत्रिफलाजमोदपरूषकव्योषविनिर्दहन्यः ।
चूर्णीकृता वा गुड़शर्करे च तथैव सर्पिर्मधुनी शुभे च ॥

हितानामेवोपयोज्यत्वं व्यनक्तीति नेयम् । उभे इति शुकाख्या शुकनामित्यनर्थान्तरं । क्षुद्रो दाड़िमः शुकादनो । आदारिविम्बीशब्देनेह तिक्तपटोलमेव ग्राहयन्ति कुशलाः । क्षीरेण वा मागधिकामिति । सामान्येनोक्तेऽपि चिं ५ अं उपदिष्टं पिप्पलीवार्द्धमानकविधिमनुसरन्ति कुशलाः । हितश्चेति । समं सहेत्यर्थः । गोमूत्रेति । खण्डापरपर्य्यायोऽयंदल शब्दः, दत्तायसं यथावज्जारित लोहचूर्णेन मिश्रीकृतं अनल्पकालं गोमूत्रयुक्तं सप्ताहं यावद् गोमूत्रेण भावितं त्रिफलादलानांत्रिफलात्वचां चूर्णं मधुनावलिह्यादिति पूर्व्वेणान्वयः । अन्यद् योगा-

सम्भारमेतद्विपचेन्निधाय सारोदके सारवतो गणस्य ।
जातञ्च लेह्यं मतिमान् विदित्वा निधापयेन्मोचकजे समुद्गे ॥
हन्त्येष लेहः खलु पाण्डुरोगं सशोथमुग्रामपि कामलाञ्च ॥१२॥
सशर्करा कामलिनां त्रिभण्डी हिता गवाक्षी सगुड़ा च शुण्ठी ।
कालेयके चापि घृतं विपक्वं हितञ्च तत् स्याद्रजनीविमिश्रम् ॥१३
धातुं नदीजं जतु शैलजं वा कुम्भाह्वये क्षौद्रयुतं पिबेद्वा ।
मूत्रस्थितं सैन्धवसम्प्रयुक्तं मासं पिबेद्वापि हि लोहकिट्टम् ॥
दग्धाक्षकाष्ठैर्मलमायसं वा गोमूत्रनिर्व्वापितमष्टवारम् ।
विचूर्ण्य लीढ़ं मधुनाचिरेण कुम्भाह्वयं पाण्डुगदं निहन्यात् ॥
सिन्धूद्भवं वाग्निसमञ्च कृत्वा सिक्त्वा च मूत्रे सकृदेव तप्तम् ।
लौहस्य किट्टं बहुशश्च तप्त्वा निर्व्वाप्य मूत्रे बहुशस्तथैव ॥

चाह प्रवालेति। अत्रापि पूर्व्वस्मान् मधुनेत्याकृष्यान्वेयम्, काञ्चनगैरिकः अत्युज्ज्वल-गैरिकः। ताप्यः स्वर्णमाक्षिकः। शालादिकमिति शालादिकं सारचूर्णं शालसारादि चूर्णम्। तक्रेति। वटकाप्रयुक्तमिति भावप्रधानोऽयं निर्द्देशः वटकात्वेन प्रयुक्त-मिति निष्कर्षः। नपुंसकत्वञ्चात्र नपुंसकालपुंसकयोगा देव। विशेषणमिदं कर्षमात्रत्वेन्यस्योपयोगं व्यनक्तीति गम्यते वटकानां तथैवोपयोज्यत्वेनोपदेशात्। विड़ङ्गेति विनिर्द्दहनो मूर्व्वा। सारवतोगणस्य शालसारादिगणस्य सारोदके चतुर्भागविशिष्टप्रस्थमात्रे सारक्वाथे प्रत्येकशः शरावमात्रे गुड़शर्करे मिश्रीकृत्य कुड़वमात्रे तप्ते सर्पिषि निक्षिप्य पचेदादर्व्वीप्रलेपात्। ततः पाकेचासन्ने विड़ङ्गादीनामेकादशानां समुदितानि चूर्णानि कुड़व मात्राणि प्रक्षिप्यावतारयेत् शीतीभूते च तस्मिन् मधुनः कुड़वमात्रमावपेत् मोचकजे समुद्गे पाटल-वृक्षसम्भूते संपुटे निधापयेदित्यर्थनिष्कर्षः॥ ११—१२॥

कामलादिकं नाम पाण्डोरवस्थाविशेषं प्रतीकर्त्तुमुपदिदिक्षति सशर्करेति। त्रिभण्डी त्रिवृत्। नदीजं धातुं स्रोतोञ्जनं शैलजं जतु शिलाजतु लौहकिट्टं मण्डूरंतच्चातीतषष्टिवर्षमेवादेयम्। दग्धेति। आयसं मलं मण्डूरं अक्षकाष्ठैः विभीतककाष्ठैः। सिन्धूद्भवमिति। अत्र सकृद् गोमूत्र निर्व्वापितस्य सैन्धवस्यैको

एकीकृतं गोजलपिष्टमेतदेकध्यमावाप्य पचेदुखायाम्।
यथा न दह्येत तथा विशुष्कं चूर्णीकृतं पेयमुदश्विता तत्।
तक्रौदनाशी विजयेत रोगं पाण्डुं तथा दीपयतेऽनलञ्च ॥१४॥
द्राक्षागुडूच्यामलकीरसैश्च सिद्धं घृतं लाघवके हितञ्च ॥ १५ ॥
गौड़ानरिष्टान् मधुशर्कराश्च मूत्रासवान् क्षारकृतांस्तथैव।

स्निग्धान् रसानामलकैरुपेतान्
कोलान्वितान् वापि हि जाङ्गलानाम्।
सेवेत शोफाभिहितांश्च योगान्
पाण्डुामयी शालियवांश्च नित्यम् ॥१६॥

श्वासातिसारारुचिकासमूर्च्छातृट्छर्दिशूलज्वरशोफदाहान्
तथाविपाकस्वरभेदसादान् जयेद् यथास्वं प्रसमीक्ष्य शास्त्रम् ॥१७
अन्तेषु शूनं परिहीणमध्यं म्लानं तथान्तेषु च मध्यशूनम्।
गुदेऽथ शेफस्यथ मुष्कयोश्च शूनं प्रताम्यन्तमसंज्ञकल्पम्।
विवर्ज्जयेत् पाण्डुकिनं यशोऽर्थी तथातिसारज्वरपीड़ितञ्च ॥१८॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे पाण्डुप्रतिषेधो नाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

भागः सप्तधा निर्व्वापितस्य मण्डूरस्य चैको भागः तयोश्चतुर्गुणं पाकार्थं गोमूत्रमितुरपदेशः ॥ १३—१४ ॥

द्राक्षेति मूत्र संसृष्टान् आसवान् मूत्रासवान् ॥ १५ ॥

पाण्डुरोगासाध्यलक्षणमाह अन्तेष्विति परिशिष्टं निगद व्याख्यातम् ॥ १६—१८ ॥

इति श्रीहाराणचन्द्र चक्रवर्त्ति विरचिते सुश्रुतार्थ सन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे पाण्डुरोग-प्रतिषेधो नाम चतुश्चत्वारिंशोऽध्यायः।

पञ्चचत्वारिंशोऽध्यायः ।

अथातो रक्तपित्तप्रतिषेधं व्याख्यास्यामः ॥ १ ॥

क्रोधशोकभयायास-विरुद्धान्नातपानलान् ।
कट्वम्ललवणक्षार-तीक्ष्णोष्णातिविदाहिनः ॥
नित्यमभ्यस्यतो दुष्टो रसः पित्तञ्च कोपयेत् ।
विदग्धं स्वगुणैः पित्तं विदहत्याशु शोणितम् ॥
ततः प्रवर्त्तते रक्तमूर्द्ध्वञ्चाधो द्विधापि वा ।
आमाशयाद् व्रजेदूर्द्ध्वमधः पक्वाशयाद् व्रजेत् ॥
विदग्धयोर्द्वयोश्चापि द्विधामार्गः प्रवर्त्तते ।
केचित् सयकृतः प्लीह्नः प्रवदन्त्यसृजो गतिम् ॥ २ ॥

जाते हि रक्तपित्ते रक्तक्षयात् पाण्डुत्वं निरङ्कुशमेव भवतीति पाण्डुरोगादनन्तरं रक्तपित्तप्रतिषेधमधिकरोति, अथात इत्यादिना ॥ १ ॥

क्रोधेत्यादि। ऊर्द्ध्वञ्चाधो द्विधापिवेति, स्फोरयति आमाशयादिति। ऊर्द्ध्वं नासाक्षिकर्णास्यतः, अधो मेढ्रयोनि गुदत इत्युन्नेयम्। केचिदिति यकृतः प्लीह्नश्च निःसृतस्यासृजोऽधो गमनाय मार्गाभावात् वचनमिदञ्चेदूर्द्ध्वगरक्तपित्तमेवाधिकरोतीति ब्रवीषि, तर्हि द्विधा मार्गाधिकरणेऽस्मिन् प्रक्रमभङ्गदोषः प्रसज्येत। नापिच यकृत् प्लीह्नोः शोणिताधिष्ठानत्वेनोपदेशादामाशयाद्वा पक्वाशयाद्वान्यतो वा प्रवृत्तमसृक् परमार्थतो यकृतः प्लीह्नश्चैव प्रवर्त्तत इत्येवं सम्प्रधार्य्य वचनमिदं साम्प्रतमुक्तमित्यपिवक्तुं युक्तम्, जीवत्स्वाचार्य्येषु चिरन्तनेषु, तैर्हि "ऊर्द्ध्वं नासाक्षिकर्णास्यैर्मेढ्रयोनिगुदैरधः" इत्युपदेशेनैवान्यतोदुष्टव्रणादितः प्रवृत्तस्यासृजो रक्तपित्तत्वं व्यावर्त्तयन्ति। नह्यञ्जसा प्लीहानञ्च यकृच्चापि तदधिष्ठाय वर्त्तते इत्यालेयानु-

ऊर्द्धं साध्यमधो याप्यमसाध्यं युगपद्गतम् ॥ ३ ॥
सदनं शीतकामित्वं कण्ठधूमायनं वमिः ।
लोहगन्धिश्च निश्वासो भवत्यस्मिन् भविष्यति ॥ ४ ॥
वाह्यासृग्लक्षणैस्तस्य सङ्ख्यादोषोच्छ्रितीर्विदुः ॥ ५ ॥
दौर्ब्बल्यश्वासकासज्वरवमथुमदाः पाण्डुता दाहमूर्च्छा
भुक्ते चान्ने विदाहस्त्वधृतिरपि सदा हृद्यतुल्या च पीड़ा ।
तृष्णा कण्ठस्य भेदः शिरसि च तपनं पूतिनिष्ठीवनञ्च
द्वेषो भक्तेऽविपाको विरतिरपि रते रक्तपित्तोपसर्गाः ॥ ६ ॥
मांसप्रक्षालनाभं क्वथितमिव च यत् कर्द्दमाम्भोनिभं वा
मेदः पूयास्रकल्पं यकृदिव यदिवा पक्वजम्बूफलाभम् ।
यत् कृष्णं यच्च नीलं भृशमतिकुणपं यत्र चोक्ता विकारा-
स्तद्वर्ज्यं रक्तपित्तं सुरपतिधनुषा यच्च तुल्यं विभाति ॥ ७ ॥
नादौ संग्राह्यमुद्रिक्तं यदसृग् बलिनो यतः ।
तत् पाण्डुग्रहणीकुष्ठ-प्लीहगुल्मज्वरावहम् ॥ ८ ॥

शासनमपि विप्रतिषिद्धं भवतीत्याशङ्कितव्यम् । वचनं ह्येतत् प्लीह्नो यकृतश्च रक्तपित्तं प्रवर्त्तत इति वक्ष्यामो-तिप्रवृत्तम् किन्तर्हि तयोरक्ताधिष्ठानत्वमेवेति नानुपपत्ति लेशोऽपि । तस्मादेवं ब्रूमः, प्रवदन्तीति प्रपूर्वो वदिः परस्परालपने प्रवर्त्तत इति निश्चीयते, प्रवादित्यादौ तदर्थे प्रयोगदर्शनात् । तथा च प्रवादमात्रमेतदित्यध्य-वसेयम् । असति प्रतिवन्धे प्रपञ्चप्रत्ययोऽयं मिथ्येत्यभिधातुं न शक्यते केनापि ॥ २—३ ॥

सदनमिति । रक्तस्येव गन्धोऽस्येति लोहगन्धिः । विशेषणमिदमूर्द्धंगरक्त पित्तमेवाधि करोतीति निश्चीयते, नासान्वयित्वादामाशयस्येत्यवधारय । वाह्यासृग् लक्षणैः शोणितवर्णनीयोपदिष्टैः सप्तविधदोषदुष्टरक्तलक्षणैः । दोषोच्छ्रितिर्दोषो-त्कर्षं ॥ ४—५ ॥

अधः प्रवृत्तं वमनैरूर्द्ध्वमार्गं विरेचनैः।
जयेदन्यतरच्चापि क्षीणस्य शमनैरसृक्॥ ९॥
अतिप्रवृत्तदोषस्य पूर्व्वं लोहितपित्तिनः।
अक्षीणबलमांसाग्नेः कर्त्तव्यमपतर्पणम्॥
लङ्घितस्य ततः पेयां विदध्यात् स्वल्पतण्डुलाम्।
तर्पणं पाचनं लेहान् सर्पींषि विविधानि च॥
द्राक्षामधुककाश्मर्य्य-सितायुक्तं विरेचनम्।
यष्टीमधुकयुक्तञ्च सक्षौद्रं वमनं हितम्॥
पयांसि शीतानि रसाश्च जाङ्गलाः सतीनयूषाश्च सशालिषष्टिकाः
पटोलशेलूसुनिषण्णयूथिका वटातिमुक्ताङ्कुरसिन्धुवारजम्॥
हितञ्च शाकं घृतसंस्कृतं सदा यथैव धात्रीफलदाड़िमान्वितम्।
रसाश्च पारावतशङ्खकूर्म्मजास्तथा यवाग्वोऽभिहिता घृतोत्तराः॥
सन्तानिकाश्चोत्पलवर्गसाधिते क्षीरे प्रशस्ता मधुशर्करोत्तराः।
हिमाः प्रदेहा मधुशर्कराश्च ये घृतानि पथ्यानि च रक्तपित्तिनाम्॥
मधूकशोभाञ्जनकोविदारजैः प्रियङ्गुकायाः कुसुमैश्च चूर्णितैः।
भिषग्विदध्याच्चतुरः समाक्षिकान् हिताय लेहानसृजः प्रशान्तये॥
लिह्याच्च दूर्व्वावटजांश्च पल्लवान्
मधुद्वितीयान् सितकर्णिकस्य च।
हितञ्च खर्ज्जूरफलं समाक्षिकं
फलानि चान्यान्यपि तद्गुणान्यथ॥ १०॥

दौर्वल्येत्यादि निगद व्याख्यातम्। नादाविति अन्यतरदित्यनेन द्विविधमेवासृक् पित्तमुपदिष्टं। पश्चतस्तयो रुभयोरेवान्यतरत्वोपपत्तेः॥ ६—९॥

आयुर्वेद आमनन्ति हि, साधनं, नत्वसाध्यानां व्याधीनामुपदिश्यत

रक्तातिसारप्रोक्तांश्च योगानत्रापि योजयेत्।
शुक्लेक्षुकाण्डमापोथ्य नवे कुम्भे हिमाम्भसा॥
योजयित्वा क्षिपेद्रात्रावाकाशे सोत्पलन्तु तत्।
प्रातः स्रुतं क्षौद्रयुतं पिबेच्छोणितपित्तवान्॥
पिबेच्छीतकषायं वा जम्ब्वाम्रार्जुनसम्भवं।
उडुम्बरफलं पिष्ट्वा पिबेत्तद्रसमेव वा॥
त्रपुषीमूलकल्कं वा सक्षौद्रं तण्डुलाम्बुना।
पिबेद्वृक्षसमं कल्कं यष्टीमधुकमेव वा॥
चन्दनं मधुकं रोध्रमेवमेव समं पिबेत्।
करञ्जबीजमेवं वा सिताक्षौद्रयुतं पिबेत्॥
मज्जानमिदङ्गस्यैवं पिबेन्मधुकसंयुतम्।
सुखोष्णं लवणं बीजं कारञ्जं दधिमस्तुना॥
पिबेद्वापि त्र्यहं मर्त्यो रक्तपित्ताभिपीड़ितः।
रक्तपित्तहराः शस्ताः नवैते योगसत्तमाः॥
पथ्यास्वेवावपीडेषु घ्राणतः प्रस्रुतेऽसृजि।
अतिनिस्रुतरक्तो वा क्षौद्रयुक्तं पिबेदसृक्॥
यकृद्वा भक्षयेद्राजमामं पित्तसमायुतम्।
पलाशवृक्षस्वरसे विपक्वं सर्पिः पिबेत्क्षौद्रयुतं सुशीतम्॥
वनस्पतीनां स्वरसैः कृतं वा सशर्करं क्षीरघृतं पिबेद्वा।
द्राक्षामुशीराण्यथ पद्मकं सिता पृथक्पलांशान्युदकेसमावपेत्॥

इति तदिह युगपत् द्विधाप्रवृत्तरक्तपित्तप्रतीकारं प्रतिजोषमास्ते। पयांसीति। सतीनोवर्त्तुलकलायः। लिह्यात्त्वेति। सितकर्णिकोवासकः। शुक्लेक्ष्विति।

स्थितं निशान्तद्रुधिरामयं जयेत्पीतं पयो वाम्बुसमं हिताशिनः ।
तुरङ्गवर्च्चःस्वरसं समाक्षिकं पिबेत्सिताक्षौद्रयुतं वृषस्य वा ॥
लिह्यात्तथा वास्तुकबीजचूर्णं क्षौद्रान्वितं तण्डुलसाह्वयं वा ।
लिह्याच्च लाजाञ्जनचूर्णमेकमेवं सिताक्षौद्रयुतां तुगाख्यां ॥
द्राक्षां सितां तिक्तकरोहिणीञ्च हिमाम्बुना वा मधुकेन युक्ताम् ।
पथ्यामहिंस्रां रजनीं घृतञ्च लिह्यात् तथा शोणितपित्तरोगी ॥११
वासाकषायोत्पलमृत्प्रियङ्गुलोध्राञ्जनाम्भोरुहकेशराणि ।
पीत्वा सिताक्षौद्रयुतानि जह्यात् पित्तासृजो वेगमुदीर्णमाशु ॥
गायत्रीजम्ब्वर्ज्जुनकोविदारशिरीषरोध्रासनशाल्मलीनाम् ।
पुष्पाणि शिग्रोश्च विचूर्ण्य लेह्यो मध्वन्वितः शोणितपित्तरोगे ॥
सक्षौद्रमिन्दीवरभस्मवारि करञ्जबीजं मधुसर्पिषी च ।
जम्ब्वर्ज्जुनाम्रक्वथितश्च तोयं घ्नन्ति त्रयः पित्तमसृक् च योगाः ॥
मूलानि पुष्पाणि च मातुलुङ्ग्याः पिष्ट्वा पिबेत् तण्डूलधावनेन ॥१२
घ्राणप्रवृत्ते जलमाशु देयं सशर्करं नासिकया पयो वा ।
द्राक्षारसं क्षीरघृतं पिबेद्वा सशर्करञ्चेक्षुरसं हिमं वा ॥ १३
शीतोपचारं मधुरञ्च कुर्य्याद्विशेषतः शोणितपित्तरोगे ।
द्राक्षाघृतक्षौद्रसितायुतेन विदारिगन्धादिविपाचितेन ॥
क्षीरेण चास्थापनमग्र्यमुक्तं हितं घृतञ्चाप्यनुवासनार्थम् ।
प्रियङ्गुरोध्राञ्जनगैरिकोत्पलैः सुवर्णकालीयकशङ्खचन्दनैः ॥

आकाशे निरावृते वहिर्देशे त्रपुसौ कर्कटो भेदः । लवणेन संसृष्टं लवणं "लवणाल्लुक्" इति ४।४।२४ पा० सू० तद्धित लुक् । वास्तुकं चिल्लीशाकम् 'वथुया' इति परिचीयते । गायत्रीति : गायत्री खदिरः । १०।११।१२ ॥

सिताश्वगन्धाम्बुदयष्टिकाह्वयैर्मृणालसौगन्धिकतुल्यपेषितैः ।
निरूह्य चैनं पयसा समाक्षिकैर्घृतप्लुतैः शीतजलाम्बुसेचितम् ॥
क्षीरौदनं भुक्तमथानुवासयेद्घृतेन यष्टीमधुसाधितेन च ।
अधोवहं शोणितमाशु नाशयेत् तथातिसारं रुधिरस्य दुस्तरम् ।
विरेकयोगे त्वति चैव शस्यते वाम्यश्च रक्ते विजिते बलान्वितः ॥१४

एवंविधा उत्तवस्तयश्च मूत्राशयस्थे रुधिरे विधेयाः ।
प्रवृत्तरक्तेषु च पायुजेषु कुर्य्याद्विधानं खलु रक्तपैत्तम् ॥
विधिश्चासृग्दरेऽप्येष स्त्रीणां कार्य्यो विजानता ।
शस्त्रकर्म्मणि रक्तं वा यस्यातीव प्रवर्त्तते ॥ १५
त्रयाणामपि दोषाणां शोणितस्य च सर्व्वशः ।
लिङ्गान्यालोक्य कर्त्तव्यं चिकित्सितमनन्तरम् ॥१६॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे रक्तपित्तप्रतिषेधो
नाम पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

निरूह्येति शीतलद्रव्यसिद्धं जलं शीतजलम् अम्बुजलमात्र तच्चशीतानुषङ्गा दौपयौगिकत्वाच्छीतमेवमेतयम् । १३।१४ ॥
अमुना संग्रहगाथयाह त्रयाणा मिति । परिशिष्टं निगद व्याख्यातम् । १५।१६ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
उत्तरतन्त्रे रक्तपित्तप्रतिषेधोनाम पञ्चचत्वारिंशत्तमोध्यायः ।

षट्चत्वारिंशोऽध्यायः ।

अथातो मूर्च्छाप्रतिषेधं व्याख्यास्यामः ॥ १

क्षीणस्य बहुदोषस्य विरुद्धाहारसेविनः ।
वेगाघातादभीघाताद्धीनसत्त्वस्य वा पुनः ॥
करणायतनेषूग्रा बाह्येष्वभ्यन्तरेषु च ।
निविशन्ते यदा दोषास्तदा मूर्च्छन्ति मानवाः ॥ २ ॥
संज्ञावहासु नाड़ीषु पिहितास्वनिलादिभिः ।
तमोऽभ्युपैति सहसा सुखदुःखव्यपोहकृत् ॥
सुखदुःखव्यपोहाच्च नरः पतति काष्ठवत् ।
मोहोमूर्च्छेति तां प्राहुः षड्विधा सा प्रकीर्त्तिता ॥
वातादिभिः शोणितेन मद्येन च विषेण च ।
तासु षट्स्वपि पित्तं हि प्रभुत्वेनावतिष्ठते ॥
हृत्पीड़ा जृम्भनं ग्लानिः संज्ञानाशो बलक्षयः ।
सर्व्वासां पूर्व्वरूपाणि यथास्वमुपलक्षयेत् ॥ ३ ॥
"नीलंवा यदिवा कृष्णमाकाशमथवारुणम् ।
पश्यं स्तमः प्रविशति शीघ्रञ्च प्रतिबुध्यते ॥

पित्तजातत्वसाधर्म्म्याद्रक्तपित्तादनन्तरं मूर्च्छाप्रतिषेधमधिकरोति अथात इत्यादिना ॥ १ ॥

क्षीणस्येति बहुदोषस्य परिमाणतोऽधिकदोषस्य नत्वनेकदोषस्येतिनियम्, पृथग्दोषजानामपि विवक्षितत्वात् । हीनसत्वस्य हीनसत्त्वगुणस्य, बाह्यानि

वेपथुश्चाङ्गमर्द्दश्च प्रपीड़ा हृदयस्य च ।
कार्श्यं श्यावारुणाच्छायामूर्च्छाये वातसम्भवे ॥
रक्तं हरितवर्णं वा वियत्पीतमथाऽपि वा ।
पश्यं स्तम: प्रविशति सस्वेदश्च प्रबुध्यते ॥
सपिपास: ससन्तापोरक्त-पीतारुणेक्षण: ।
संभिन्नवर्च्चा: पीताभो मूर्च्छाये पित्तसम्भवे ॥
मेघसङ्काशमाकाशमावृतं वा तमोघनै: ।
पश्यं स्तम: प्रविशति चिराच्च प्रतिबुध्यते ॥
गुरुभि: प्रावृते रङ्गे यथैवार्द्रेण चर्म्मणा ।
सप्रसेक: सहृल्लासोमूर्च्छाये कफ सम्भवे" ॥४॥

पृथिव्यम्भस्तमोरूपं रक्तं गन्धश्च तन्मय: ।
तस्माद्रक्तस्य गन्धेन मूर्च्छन्ति भुवि मानवा: ॥
द्रव्यस्वभाव इत्येके दृष्ट्वा यदभिमूर्च्छति ॥ ५

करणायतनानि चक्षुर्गोलकादिनि, आभ्यन्तराणिच मनोवहानिस्रोतांसीत्यर्थ:। क्षीणस्येतरादिनोक्तमर्थं स्फोरयति संज्ञेति निगदव्याख्यातम्। २।४॥ पृथिव्यम्भ इति इदमत्रामनन्तिहि "मूर्च्छा पित्ततम: प्राया इति" तदिदं साम्प्रतमुक्तं पृथिव्यम्भ इति पृथिव्यम्बुनोर्हि तमोबहुले, तम: शब्देह रक्तस्वरूपत्वेनो-पदेशाद्रक्ताभिनिर्व्वर्त्तकपित्तगतंतम एवाधिकरोतीति भ्रम:, आमनन्तिहि शोणितवर्णनीये "रञ्जितास्तेजसा" इत्युपक्रम्य "रक्तमित्यभिधीयते" इति, तथाच एतत् स्वरूपं पृथिव्यम्भस्तमोरूपं रक्तम् आहुरिति शेष:। गन्धो रक्तगन्धश्च तन्मयो रक्तमयो रक्तादभिन्नइति यावत्, गुणगुणिनोरभेदादित्याकूतम् एवञ्च रक्तस्य गन्धेन मूर्च्छाभिनिर्व्वृत्तिर्नानुपपन्ना, तम:स्वरूपत्वेनोपलम्भात् पित्तान्वयित्वाञ्चेताध्यवसेयम्। तदिदं समीचीनमुक्तं तस्मादिति, भुविमूर्च्छन्ति सञ्ज्ञांहित्वाकाष्ठवन्निपतन्तीत्यर्थ:। नचैतदश्रद्धेयं "नर: पतति काष्ठवत्,

गुणास्तीव्रतरत्वेन स्थितास्तु विषमद्ययोः।
त एव तस्माज्जायन्ते ताभ्यां मोहा यथेरिताः॥ ६

स्तब्धाङ्गदृष्टिस्त्वसृजा गूढोच्छ्वासश्च मूर्च्छितः।
मद्येन विलपञ्छेते-नष्टविभ्रान्तमानसः॥
गात्राणि विक्षिपन् भूमौ जरां यावन्न याति तत्॥ ७
वेपथुस्वप्नतृष्णाः स्युः स्तम्भश्च विषमूर्च्छिते।
वेदितव्यं तीव्रतरं यथास्वं विषलक्षणैः॥ ८

सेकावगाहौ मणयः सहाराः शीताः प्रदेहा व्यजनानिलाश्च।
शीतानि पानानि च गन्धवन्ति सर्व्वासु मूर्च्छास्वनिवारितानि॥
सितापियालेक्षुरसाम्बु तानि द्राक्षामधूकस्वरसान्वितानि।
खर्ज्जूरकाश्मर्य्यरसैः शृतानि पानानि सर्पींषि सजीवनानि॥
सिद्धानि वर्गे मधुरे पयांसि सदाड़िमा जाङ्गलजा रसाश्च।
तथा यवा लोहितशालयश्च मूर्च्छासु पथ्याश्च सदा सतीनाः॥९

मोहोमूर्च्छेतितामाहुः" इति स्वयमेवाभिधानात्। नन्वेवं गतेरक्तस्य गन्धेनान्यस्यापि मूर्च्छा प्रसज्येतेति पक्षान्तरमाश्रयते द्रव्येति॥ ५॥

विषमद्यनिमित्तस्य मूर्च्छाद्वितयस्य जनिं प्रति युक्तिं दर्शयति गुणा इति। अत्र त इति तदा बुद्ध्या समाकृष्टत्वादन्नपानविधावुपदिष्टेषु गुणेषु मध्ये मूर्च्छानुगुणा स्तीक्ष्णप्रमुखागुणाएव परामृश्यन्तइतिनिश्चीयते, तेषामेव स्थावरविषविज्ञानीये पानात्यय प्रतिषेधेच विषमद्यगुणत्वेनोपदेशात्। एवकारेण गुणान्तराणि व्यावर्त्तयति, यथेरिता इति भाविनि भूतवदुपचारात् पूर्व्वाचार्य्य प्रसिद्धत्वाद्वानानुपपन्नम्॥ ६॥

यथाक्रमं रक्तजादीनां तिसृणां मूर्च्छानां लक्षणानिनिवेदयतिस्तब्धेति ७।८॥

प्रतीकारक्रम मधिकरोति सेकेति। अत्र शीताधिकारात्शीतप्रतीकारत्वाच्च मूर्च्छानां, सेकावगाहावपि शीतावेव नेयौ जीवनानि जीवकर्षभकादीनि। भुजङ्ग-

भुजङ्गपुष्पं मरिचान्युशीरं कोलस्य मध्यञ्च पिवेत् समानि ।
सतीनतोयेन विसं मृणालं क्षौद्रेण कृष्णां सितया च पथ्याम् ।
कुर्य्याच्च नासावदनावरोधं क्षीरं पिवेद्वाप्यथ मानुषीणाम् ।
मूर्च्छाप्रसक्तान्तु शिरोविरेकैर्जयेदभीक्ष्णं वमनैश्च तीक्ष्णैः ॥१०
हरीतकीक्काथघृतं पिवेद्वा धात्रीफलानां स्वरसैः कृतं वा ।
द्राक्षासिताटाड़िमलाजवन्ति शीतानि नीलोत्पलपद्मवन्ति ॥
पिवेत् कषायाणि च गन्धवन्ति पित्तज्वरं यानि शमं नयन्ति ॥११
प्रभूतदोषस्तमसोऽतिरेकात् संमूर्च्छितो नैव विवुध्यते यः ।
संन्यस्तसंज्ञो भृशदुश्चिकित्स्यो ज्ञेयस्तदा वुद्धिमता मनुष्यः ॥
यथामलोष्टं सलिले निषिक्तं समुद्धरेदाश्वविलीनमेव ।
तद्वच्चिकित्सेत् त्वरया भिषक् तमवेदनं मृत्युवशप्रयातम् ॥
तीक्ष्णाञ्जनाभ्यञ्जनधूमयोगैस्तथा नखाभ्यन्तरतोत्रपातैः ।
वादित्रगीतानुनयैरपूर्व्वैर्विघट्टनैर्गुप्तफलावघर्षणैः ॥
आभिः क्रियाभिश्च न लब्धसंज्ञः सानाहलालाश्वसनश्च वर्ज्यः ।
प्रभूतसंज्ञं वमनानुलोम्यैस्तीक्ष्णैर्विशुद्धं लघुपथ्यभुक्तम् ॥

पुष्पं नागकेशरम् । विषं सूक्ष्ममृणालम् । कृष्णां पिवेदिति पूर्व्वेणान्वयः । कुर्य्याच्चेति । पिवेदातुर इति शेषः । भिषक् कर्तृकत्वे तु यथा पाचयन्नपि-देवदत्तः पचति इत्युच्यते तद्वदत्र द्रष्टव्यम् ॥ ८।१० ॥

हरीतकी—क्काथमिदं क्काथमिश्रं वा घृतं हरीतकी क्काथघृतं स्वरसैः कृतमिति घृतानुषङ्गात् घृतमिति शेषः । पित्तज्वरहराणि कषायाणि द्राक्षादिभिः सहोपयुङ्क्ते । तीक्ष्णेत्यादि । तोत्रपातैः सूचीव्यधनैः, बहुवचनं व्यधनस्य पौनः पुन्य माख्यातुम् । गुप्तफलानि शूकशिम्बाफलानि । अश्मजातं शिलाजतु तत् संस्कृतैरिति अश्मजाताज्जतुनः, प्रयोगैस्तत्प्रयोगैर्विति तात्पर्य्यम् । पक्षमोह

फलत्रिकैश्चित्रकनागराद्यैस्तथाश्मजाताज्जतुनः प्रयोगैः।
सशर्करैर्मासमुपक्रमेत विशेषतो जीर्णघृतं स पाय्यः॥ १२
यथास्वञ्च ज्वरघ्नानि कषायाण्युपयोजयेत्।
सर्व्वमूर्च्छापरीतानां विषजानां विषापहम्॥ १२॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे मूर्च्छाप्रतिषेधो नाम षट्चत्वारिंशोऽध्यायः॥ ४६॥

ल्यव् लोपे बहुवचनं प्रयोगस्यास्य पौनःपुन्यमाचष्टइत्यनुसन्धेयम् परिशिष्टं निगदव्याख्यातम्॥ १२॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये मूर्च्छा प्रतिषेधोनाम षट्चत्वारिंशत्तमोऽध्यायः॥

सप्तचत्वारिंशोऽध्यायः ।

अथातः पानात्ययप्रतिषेधं व्याख्यास्यामः ॥ १ ॥

मद्यमुष्णं तथा तीक्ष्णं सूक्ष्मं विशदमेव च ।
रूक्षमाशुकरञ्चैव व्यवायि च विकाशि च ॥
औष्ण्याच्छीतोपचारं तत् तैक्ष्ण्याद्धन्ति मनोगतिम् ।
विशत्यवयवान् सौक्ष्म्याद्वैशद्यात् कफशुक्रनुत् ॥
मारुतं कोपयेद्रौक्ष्यादाशुत्वादाशुकर्म्मकृत् ।
हर्षदञ्च व्यवायित्वाद्विकाशित्वाद्विसर्पति ॥
तदम्लं रसतः प्रोक्तं लघु रोचनदीपनम् ।
केचिल्लवणवर्ज्यांस्तु रसानन्यादिशन्ति हि ॥
स्निग्धैस्तदन्नैर्मांसैश्च भक्ष्यैश्च सह सेवितम् ।
भवेदायुःप्रकर्षाय बलायोपचयाय च ॥
काम्यता मनसस्तुष्टिर्धैर्य्यं तेजोऽतिविक्रमः ।
विधिवत् सेव्यमाने तु मद्ये सन्निहिता गुणाः ॥
तदेवानन्नमत्येन सेव्यमानममात्रया ।
कायाग्निना ह्यग्निसमं समेत्य कुरुते मदम् ॥ २ ॥

मूर्च्छाजनकत्वसाधर्म्म्यात् मूर्च्छाप्रतिषेधादनन्तरं पानात्ययप्रतिषेधमधिकरोति अथात इत्यादिना । १ ॥

पानशब्दोऽयं मद्येरूढ़ इति गम्यते । "पानमानय सैरिन्ध्रि" इति विराटपर्वणि तदर्थे प्रयोगदर्शनात् । अत्येति विनश्यत्यनेनेति अत्ययो व्याधिः । पानमूलोऽत्ययः पानात्ययः ॥

सम्प्रत्यभिज्ञातत्वात् पानात्ययप्रतिषेधेव्याकार्य्ये प्रथमन्तावदुपोद्घातसङ्गत्या

मदेन करणानान्तु भावान्यत्वे कृते सति।
निगूढ़मपि भावं स्वं प्रकाशीकुरुतेऽवश: ॥
त्र्यवस्थश्च मदो ज्ञेय: पूर्व्वो मध्योऽथ पश्चिम:।
पूर्व्वे वीर्य्य-रति-प्रीति-हर्ष-भाष्यादिवर्द्धनम् ॥
प्रलापो मध्यमे हर्षो युक्तायुक्तक्रियास्तथा।
विसंज्ञ: पश्चिमे शेते नष्टकर्म्मक्रियागुण: ॥
श्लैष्मिकानल्पपित्तांश्च स्निग्धान्मात्रोपसेविन:।
पानं न बाधतेऽत्यर्थं विपरीतांस्तु बाधते ॥ ३ ॥

निर्भक्तमेकान्तत एव मद्यं निषेव्यमाणं मनुजेन नित्यम्।
उत्पादयेत् कष्टतमान् विकारानापादयेच्चापि शरीरभेदम् ॥
क्रुद्धेन भीतेन पिपासितेन शोकाभितप्तेन बुभुक्षितेन।
व्यायामभाराध्वपरिक्षतेन वेगावरोधाभिहतेन चापि ॥
अत्यम्लभक्ष्यावततोदरेण साजीर्णभुक्तेन तथाऽबलेन।
उष्णाभितप्तेन च सेव्यमानं करोति मद्यंविविधान् विकारान् ॥
पानात्ययं परमदं पानाजीर्णमथापि वा।
पानविभ्रममुग्रञ्च तेषां वक्ष्यामि लक्षणम् ॥ ४ ॥

मद्यस्यगुणकर्म्मणी समासतो निवेदयति मद्यमिति। गुणानामेषां विस्तरश: कर्म्मान्यत्रपानविधिमवगाह्यावगम्यानि। मदेवेति। मदोऽप्रहृष्टोन्माद:। वक्ष्यतिहि "स चाप्रहृष्टस्तरुणो मदसंज्ञां बिभर्त्ति च" इति, तत् साम्यान्मद इह मत्तता मात्रम्। २ ॥

स्यादेतत् भगवन्! प्रहृष्टेन मदेनोपलक्षितो मानव: किं कुरुते? आह मदेनेति तं पुनर्मदं त्रेधाविभजते त्र्यवस्थश्चेति। श्लैष्मिकानिति न बाधते मद्यानुगुणत्वात्। अत्यम्लेति। अम्लशब्दोऽयं भक्ष्यं विशिनष्टि, भक्ष्यशब्दश्च चतुर्विधमाहारमेव लक्षयतीति गम्यते, अम्लरसवदाहारमात्रस्यैवाविशेषेण मद्यवत् निरङ्कुशं पित्ताभिवर्द्धकत्वेन परिकलितत्वात्. तथाच साम्प्रतमुक्तमत्यम्लेति,

स्तम्भाङ्गमर्द्दहृदयग्रहतोदकम्पाः
पानात्ययेऽनिलकृते शिरसो रुजश्च ॥ ५ ॥
स्वेदप्रलापमुखशोषणदाहमूर्च्छाः
पित्तात्मके वदनलोचनपीतता च ।
श्लेष्मात्मके वमथुशीतकफप्रसेकाः
सर्व्वात्मके भवति सर्व्वविकारसम्पत् ॥
उष्मा शरीरगुरुता विरसाननत्वं
श्लेष्माधिकत्वमरुचिर्मलमूत्रसङ्गः ॥ ६ ॥
लिङ्गं परस्य तु मदस्य वदन्ति तज्ज्ञा-
स्तृष्णा रुजा शिरसि सन्धिषु चापि भेदः ॥ ७ ॥
आध्मानमुद्गिरणमम्लरसो विदाहो-
ऽजीर्णस्य पानजनितस्य वदन्ति लिङ्गम् ।
ज्ञेयानि तत्र भिषजा सुविनिश्चितानि
पित्तप्रकोपजनितानि च कारणानि ॥ ८ ॥
हृद्गात्रतोदवमथु-ज्वर-कण्ठधूम-
मूर्च्छा-कफस्रवण-मूर्द्धरुजो विदाहः ।

अतिमात्राम्लरसवदाहारेण व्याप्तमुदरमस्येत्यत्यम्लभक्ष्यावततोदरः। विविधान् विकारान् कामलादीन्। पानात्ययमित्यादावपि पूर्वस्मात् करोतीत्याकृष्यान्वयम्। अत्र विविधानित्यनेनैव पानात्ययादीनां चतुर्णामुपलब्धेऽपि पृथगुपादानं प्रायिकत्वादित्यध्यवसितव्यम्। ३।४ ॥

तत्र प्रथमन्तावत् पानात्ययमेव चतुर्धाभिनत्ति, स्तम्भेत्यादिना सम्पदित्यनेन ग्रन्थसन्दर्भेण। परमदं निवेदयति उष्मेति। पानाजीर्णमधिकरोति आध्मानमिति। पानाजीर्णं प्रति कारणान्युपदिशति ज्ञेयानीति। तत्र पानाजीर्णे सुविनिश्चितानि "निभक्त मेकान्तत एव मद्यम्" इत्यादिना सम्यङ्निधार्यापि-

द्वेषः सुरान्नविकृतेषु च तेषु तेषु
तं पानविभ्रममुशन्त्यखिलेन धीराः ॥ ९ ॥
हीनोत्तरौष्ठमतिशीतममन्ददाहं
तैलप्रभास्यमतिपानहतं विजह्यात्।
जिह्वौष्ठदन्तमसितन्त्वथवापि नीलं
पीते च यस्य नयने रुधिरप्रभे च।
हिक्काज्वरौ वमथुवेपथुपार्श्वशूलाः
कासभ्रमावपि च पानहतं भजन्ते ॥ १० ॥
तेषां निवारणमिदं हि मयोच्यमानं
व्यक्ताभिधानमखिलेन विधिं निबोध ॥
मद्यन्तु चुक्रमरिचार्द्रकदीप्यकुष्ठ-
सौवर्च्चलायुतमलं पवनस्य शान्त्यै।
पृथ्वीकदीप्यकमहौषधहिङ्गुभिर्वा
सौवर्च्चलेन च युतं वितरेत् सुखाय ॥
आम्रातकाम्रफलदाड़िममातुलुङ्गैः
कुर्य्याच्छुभान्यपि च षाड़वपानकानि।
सेवेत वा फलरसोपहितान् रसादी-
नानूपवर्गपिशितान्यपि गन्धवन्ति ॥

दिष्टानि चकारास्तथा पित्तप्रकोपजनितानि पानात्ययादीनि च कारणानि ज्ञेयानीति सम्बन्धः। ६।८ ॥

असाध्यलक्षणमभिधत्ते हीनेति। हीनोत्तरौष्ठं संक्षिप्तोत्तरोष्ठम्। अतिपान-हतम् अतिपानेन हतप्रायम्। पानात्ययादीन् प्रतिकर्त्तुमुपदिदिक्षति तेषा-मिति। आम्रातकं नामौषधी "आम्रा" इत्यभिधीयते। षाड़वपानकान्यम्लपान-

पित्तात्मके मधुरवर्गकषायमिश्रं
मद्यं हितं समधुशर्करमिष्टगन्धम्।
पीत्वा च मद्यमपि चेक्षुरसप्रगाढ़ं
निःशेषतः क्षणमवस्थितमुल्लिखेच्च॥
लावैणतित्तिरिरसांश्च पिबेद्नम्लान्
मौद्गान् सुखाय सघृतान् ससितांश्च यूषान्॥ ११॥
पानात्यये कफकृते कफमुल्लिखेच्च
मद्येन बिम्बिविदुलोदकसंयुतेन।
सेवेत तिक्तकटुकांश्च रसानुदारान्
यूषांश्च तिक्तकटुकोपहितान् हिताय॥
पथ्यं यवान्नविकृतान्यपि जाङ्गलानि
श्लेष्मघ्नमन्यदपि यच्च निरत्ययं स्यात्॥ १२॥
कुर्य्याच्च सर्व्वमथ सर्व्वभवे विधानं
द्वन्द्वोद्भवे द्वयमवेक्ष्य यथाप्रधानम्॥
सामान्यमन्यदपि यत् सुसमग्रमग्र्यं
वक्ष्यामि यच्च मनसो मदकृत् सुखञ्च॥
त्वङ्नागपुष्पमगधैलमधूकधान्यैः
श्लक्ष्णैरजाजिमरिचैश्च कृतं समांशैः।

विधावुपदिष्टानि। फलरसोपहितान् दाड़िममातुलुङ्गादिरसेनानुविद्धान्। रसादीन् तत्तन्मांसरसयूषादीन्। १०।११॥

पानात्यय इति विदुलं वेतसफलम्। कुर्य्याच्चेति। सन्निपातजे द्वन्द्वजे च बलवन्तं दोषं प्राक् प्रतिकर्त्तुमिदमुच्यते यथा—प्रधानमिति। दोषविशेषाविमर्षेण भेषजजातमुपदेष्टुं प्रतिजानीते सामान्यमिति। शोभनं सर्वमग्रेति सुसमग्रम् विशेषणमिदं प्रत्येकेषामवयवानामप्युपयौगिकत्वं ख्यापयतीति

पानं कपित्थरसवारिपरूषकाढ्यं
पानात्ययेषु विधिवत् सुतमम्बरान्ते ॥ १३ ॥
ह्रीवेर-पद्म-परिपेलव-संप्रयुक्तैः
पुष्पैः प्रलिप्य करवीरजलोद्भवैश्च।
पिष्टैः स पद्मकयुतैरपि सारिवाद्यैः
सेकं जलैश्च वितरेद्दमलैः सुशीतैः ॥ १४ ॥
त्वक्पत्रचोचमरिचैलभुजङ्गपुष्प-
स्रोतोऽञ्जनप्रसवकल्कगुडैरुपेतम्।
द्राक्षायुतं कृतमलं मदरामयार्त्त-
स्तत् पानकं शुचि सुगन्धि नरैर्निषेव्यम् ॥
पिष्ट्वा पिबेच्च मधुकं कटुरोहिणीञ्च
द्राक्षाञ्च मूलमसकृत् त्रपुसोभवं यत्।

नेयम्। मदकृत्—आमोदकृत्। त्वगिति। कृतं रचितमित्यनर्थान्तरम्। पानं मद्यमिति पर्य्यायौ। इदमत्रावधेयम्। त्वगादीनां मिलितानामष्टानां श्लक्ष्णचूर्णमर्द्धपलम्। कपित्थरसादीनां त्रयाणाञ्च पलत्रयं, पलद्वयेन मद्येन मिश्रीकृत्य वस्त्रपूतंकृत्वा प्रयोज्यमित्युपदिशन्त्याचार्य्याः। १२।१३ ॥

ह्रीवेरेति। परिपेलवं कैवर्त्तमुस्तकम्। प्रलेपान्तरमाह पिष्टैरिति। अत्र प्रलिप्य पिष्टैरिति च काकाक्षिगोलकन्यायेनोभयत्र सम्बध्यते। तथाच पिष्टः ह्रीवेरादिभिः तथा पिष्टैः पद्मकयुतैरभिनवपद्मकाष्ठसारेण संमिश्रैः शारिवाद्यैश्च प्रलिप्य स आतुरो जलैः सेकं वितरेत् दद्यादित्यर्थः। माभूत्तस्वतो विकारावस्थानभिज्ञत्वेन लेपसेकयो रुपयोगविभ्रमात् सादृगुण्या-पचयो विकारान्तराभिनिर्वृत्ति र्वेतिसम्प्रधार्य्य यथादेशं यथाकालं यथा मात्रञ्चोपयोक्तुं स इति तदा आतुरमेव कर्त्तृत्वेन प्रयुङ्क्ते इत्यध्यवसेयम्। अतएव सेकं वितरेदिति सामान्येनोक्तेऽपि शुष्यति शुष्के वा लेपे दापयेत् प्रवर्त्तेत तर्ह्येव सेकमभिनन्दन्ति कुशलाः। १४ ॥

त्वगिति। सम्प्रति त्वगादि सप्त समा द्राक्षा, द्विगुणेन गुड़ेन

कार्पासमूलमथ नागबलाञ्च तुल्यां
पीत्वा सुखी भवति साधु सुवर्च्चलाञ्च ॥
काश्मर्य्यदारुविड़दाड़िमपिप्पलीषु
द्राक्षान्वितासु कृतमम्बुनि पानकं यत् ।
तद्बीजपूरकरसायुतमाशु पीतं
शान्तिं परां मदगदेष्वचिरात् करोति ॥
द्राक्षासितामधुकजीरकधान्यकृष्णा-
स्त्वेवं कृतं चिरतया च पिबेत् तथापि ।
सौवर्च्चलायुतमुदाररसं फलाम्लं
भार्गी श्रृतेन च जलेन हितावसेकः ॥ १५ ॥
इक्षाकुधामार्गववृक्षकाणि
काकाह्वयोडुम्बरिकाश्च दुग्धे ।
विपाच्य तस्याञ्जलिना वमेद्धि
मद्यं पिबेदह्नि गते त्वजीर्णे ॥ १६ ॥
त्वक्पिप्पलीभुजगपुष्पविड़ैरुपेतं
सेवेत हिङ्गुमरिचैलयुतं फलाम्लम् ।
उष्णाम्बुसैन्धवयुतास्त्वथ वा विड़त्वक्-
चव्यैलहिङ्गुमगधाफलमूलशुण्ठीः ॥ १७ ॥

मिश्रीकृत्य समुदिताष्टगुणेन जलेनालोड्य वस्त्रपूतञ्च तत् पादमितेन मद्येन संसृज्य पाययितुमिदमुच्यते त्वगिति नेयम्। अत्र भुजङ्गो नागकेशरः। श्लेष्मातको वहुवारः "नोना आता" इति वङ्गैराख्यायते। हृतमलमिति वस्त्रपूतत्वेन, तदिति तदा मद्यं प्रत्यवमृश्यते। तत् संसृष्टं पानकं तत-पातकम्। १५।१६ ॥

त्वक् पिप्पलीति। विड़् लवणपर्य्ययोऽयं विड़शब्दः। श्रीपर्णीति

हृद्यैः खड्डैरपि च भोजनमत्र शस्तं
द्राक्षाकपित्थफलदाड़िमपानकं यत्।
तत् पानविभ्रमहरं मधुशर्कराढ्य-
माम्रातकोलरसपानकमेव वापि ॥
खर्ज्जूरवेत्रकरवीरपरूषकेषु
द्राक्षाश्विहत्सु च कृतं ससितं हितं वा।
श्रीपर्णियुक्तमथवा तु पिबेदिमानि
यष्ट्याह्वयोत्पलहिमाम्बुविमिश्रितानि ॥
क्षीरिप्रवालबिसजीरकनागपुष्प-
पत्रैलवालुसितशारिवपद्मकानि।
आम्रातभव्यकरमर्द्दकपित्थकोल-
वृक्षाम्लवेत्रफलजीरकदाड़िमानि ॥
सेवेत वा मरिचजीरकनागपुष्प-
त्वक्पत्रविश्वचविकैलयुतान् रसांश्च।
सूक्ष्माम्बरस्रुतहिमांश्च सुगन्धिगन्धान्
पानोद्भवान् नुदति सप्त गदानशेषम् ॥ १८ ॥
पञ्चेन्द्रियार्थविषया मृदुपानयोगा
हृद्याः सुखाश्च मनसः सततं नियोज्याः।

श्रीपर्णियुक्तं गणकारिकायुक्तं, ङ्यापोः ६।३।६३ पां सूं ह्रस्वः। योगान्तरमाह अथवेति। सितशारिवा अनन्तमूलम् अत्रापि प्राग्वत् ह्रस्वः। भव्यः करमर्द्दश्चौषधी "चालिता, करमजा" इत्यभिधीयेते। वृक्षाम्लश्च आम्रफल गन्ध्याद्रकभेदः। सेवेतेति। चतुरः पानात्ययान् शेषांस्त्रीन् इति सप्त। १९।१८ ॥

पञ्चेति। पञ्च शब्दस्पर्शरूपरसगन्धान् विषिखन्ति प्रशस्यत्वेन स्वात्मकतया

पानात्ययेषु विकटोरुनितम्बवत्य:
पीनोन्नतस्तनभरानतमध्यदेशा: ॥
प्रौढ़ा: स्त्रियोऽभिनवयौवनपीनगात्य:
सेव्याश्च पञ्चविषयातिशयस्वभावा: ॥ १८ ॥

पिबेद्रसं पुष्पफलोद्भवं वा सितामधूकत्रिसुगन्धियुक्तम् ।
सञ्चूर्ण्य संयोज्य च नागपुष्पैरजाजिकृष्णामरिचैश्च तुल्यै: ॥
वर्षाभूयष्ट्याह्वमधूकलाक्षात्वक्कार्व्वुदाराङ्कुरजीरकाणि ।
द्राक्षाञ्च कृष्णामथ केशरञ्च चोरे समालोड्य पिबेत् सुखोष्णम् ॥२०

भवेच्च मद्येन तु येन पातित: प्रकामपीतेन सुरासवादिना
तदेव तस्मै विधिवत् प्रदापयेद्विपर्य्यये भ्रंशमसौ च गच्छति ।
यथा नरेन्द्रोपहतस्य कस्यचिद्भवेत् प्रसादस्तत एव नान्यत: ॥
ध्रुवं तथा मद्यहतस्य देहिनो भवेत् प्रसादस्तत एव नान्यत: ॥२१

विच्छिन्नमद्य: सहसा योऽतिमद्यं निषेवते ।
तस्य पानात्ययोद्दिष्टा विकारा: सम्भवन्ति हि ॥

आकल्पयन्तीति पञ्चेन्द्रियार्थविषया: । विशालापरपर्य्यायोऽयं विकट शब्द: । आनतमध्यदेशा: मध्येक्षामा न पुनरवनता: प्रशस्यत्वात् "तन्वीश्यामा शिखरिदशना पक्वविम्बाधरोष्ठी मध्येक्षामा" इति कालिदासोऽपि । प्रौढ़ा प्रगल्भा निपुणा वा पञ्चानां शब्दस्पर्शरूपरसगन्धानामतिशय: साधारणशब्दविशेषात् प्रशस्यत्वेन प्राचुर्य्यं स्वीयोभावो यासां ता: पञ्चेन्द्रियार्थविषयातिशय-स्वभावा:, एतावता यासां वागादिमाधुर्य्यं संसिद्धं ता एव स्त्रियो लभ्यन्त इत्यध्यवसेयम् । एवञ्च विषयेषु मध्ये रसस्य माधुर्य्यमधरामृतपानादवगन्तव्यम् शेषाणान्तु श्रोत्रादिभिरेवाव गम्यते ॥ १८ ॥

संप्रति नागकेशरपुष्पादीनि चत्वारि सञ्चूर्ण्य तै: सह सितशर्करादि युक्तं परिणतकुष्माण्डफलरसं पातुं नियुङ्क्ते पिबेदिति । वर्षाभ्विति, त्वक् गुड़त्वक्, कार्व्वुदार: कोविदार: ॥ २० ॥

मद्यस्याग्नेयवायव्यौ गुणावम्बुवहानि च ।
स्रोतांसि शोषयेयातां तेन तृष्णा प्रजायते ॥
पाटलोत्पलकन्देषु मुद्गपर्ण्यां च साधितम् ।
पिबेन्मागधिकामिश्रं तत्राम्भो हिमशीतलम् ॥२२॥
सर्पिः स्तैलवसामज्जदधिभृङ्गरसैर्युतम् ॥
क्वाथेन विल्वयवयोः सर्व्वगन्धैश्च पेषितैः ।
पक्वमभ्यञ्जने श्रेष्ठं सेके क्वाथः सुशीतलः ॥
रसवन्ति च भोज्यानि यथास्वमवचारयेत् ।
पानकानि सुशीतानि हृद्यानि सुरभीणि च ॥२३॥
त्वचं प्राप्तस्तु पानोष्मा पित्तरक्ताभिमूर्च्छितः ।
दाहं प्रकुरुते घोरं पित्तवत्तत्र भेषजम् ॥
शीतं विधानमत ऊर्द्ध्वमहं प्रवक्ष्ये
दाहप्रशान्तिकरमृद्धिमतां नराणां ।
तत्रादितो मलयजेन हितः प्रदेह-
श्चन्द्रांशुहारतुहिनोदकशीतलेन ।
शीताम्बुशीतलतरैश्च शयानमेवं
हारैर्मृणालवलयैरबलाः स्पृशेयुः ॥

सर्पिरिति, अत्राविशेषेऽपि सर्पिरादीनां चतुर्णां प्रस्थो, दधिभृङ्गराजरसयोर्द्वौप्रस्थौ, द्वौचप्रस्थौ विल्वयवक्वाथस्य, सर्वगन्धश्च शरावमितं कल्कः । अथ "चातुर्जातककर्पूरकक्कोलागुरुकुङ्कुमम् । लवङ्गसहितञ्चैव सर्वगन्धं प्रकीर्त्तितम्" इति स्थितेऽपि वहुवचनं स्तुत्यर्थम् तेनैतानिद्रव्याणि प्रशस्यत्वादभिनवान्येव प्रयुञ्जन्ति कुशलाः सुशीतलः स्पर्शतोवीर्य्यतश्च शीतलतरः क्वाथोऽत्र मधुकादिशीतलद्रव्यकृत एव श्रेष्ठ इत्यर्थः ॥ २१।२२ ॥

भिन्नोत्पलोज्ज्वलहिमे शयने शयीत
पत्रेषु वा सजलबिन्दुषु पद्मिनीनां।
आसादयन् पवनमाहृतमिष्टगन्धं
कह्लारपद्मदलशैवलसञ्चयेभ्यः॥
शीतैर्वनान्तपवनैः परिमृश्यमानः
प्रीतश्चरेद्भवनकाननदीर्घिकासु।
दाहाभिभूतमथ वा परिषिचयेत्तु
शीतैरुशीरजलचन्दनवारिभिस्तम्॥२४॥
विस्रावितां हृतमलां नववारिपूर्णां
पद्मोत्पलोज्ज्वलजलामधिवासिताञ्च।
वापीम्भजेत हरिचन्दनभूषिताङ्गः
कान्ताकरस्पर्शनकर्कशरोमकूपः॥

तत्रेति मलयजेन घृष्टेनेति नेयम्। चन्द्रांशुमति देशे संस्थापितत्वात् मुक्तादिहार संसृष्टत्वात्, तुहिनोदकोपर्य्यधिष्ठापितत्वादतितरां शीतलेन चन्द्रांशुहारतुहिनोदकशीतलेन। हिमाम्बुना प्रकृष्टशीतलैः शीताम्बुशीतलतरैर्-हारमृणालवलययोर्विशेषणमेतत्। हारा अत्र शीतवीर्य्यत्वात् मणिमुक्ताप्रवालादिकृता एव बोद्धव्याः। तृतीया चापलक्षणे। शयनं द्वेधा विधातुं विशिनष्टि भिन्नेति। भिन्नं प्रफुल्लमुत्पलमत्रेति भिन्नोत्पलम् आस्तीर्णप्रफुल्लोत्पलमित्येतत्। अतएवोज्ज्वलहिमं विशदहिमम् भिन्नोत्पलोज्ज्वलहिमम्। विचरणप्रकारमुपदिदिक्षति आसादयन्निति कह्लारादिचयेभ्य आहृतमिष्टगन्धं, पवनमासादयन् लभमानः शीतैर्वनान्तपवनैः परिमृश्यमानःस्पृश्यमानोऽतएव प्रीतो भवनादिषु चरेदिति निष्कर्षः॥२४॥

अवगाहप्रकारं निवेदयति विस्राविताम् इति; विस्रावितां निर्ह्रुतजलां हृतमलां परिहृतपङ्कादिकां प्रचितपद्मोत्पलपुष्पत्वादानन्दाभिवर्द्धनत्वेन प्रदीप्तमिव जलमत्रेतिपद्मोत्पलोज्ज्वलजलाम् अधिवासितां गन्धमाल्यादिभिः संस्कृताम्। हरिचन्दनम्, गोशीर्षनामकमलयैकदेशजातः श्वेतचन्दनभेदः। कान्तेत्यादौ

तत्रैनमम्बुरुहपत्रसमैः स्पृशन्त्यः
शीतैः करोरुवदनैः कठिनैःस्तनैश्च ।
तोयावगाहकुशला मधुरस्वभावाः
संहर्षयेयुरबला मधुरैः प्रलापैः ॥२५॥
धारागृहे प्रगलितोदकदुर्दिनाभे
क्लान्तः शयीत सलिलानिलशीतकुक्षौ ।
गन्धोदकैः सकुसुमैरुपसिक्तभूमौ
पद्माम्बुचन्दनरसैरुपलिप्तकुड्ये ॥
मांसी-तमाल-घन-कुङ्कुम-पद्मपत्र-
जात्युत्पल-प्रियक-केशर-पुण्डरीकैः ।
पुन्नाग-नाग-करवीरकृतोपकारे
तस्मिन् गृहे कमलरेणुवरुणे शयीत ॥२६॥

स्पशनं स्पश बाधनस्पर्शनयोरिति भौवादिकस्य रूपं स्पर्शनमित्यर्थः। परशेति पाठेऽपि स एवार्थः "तन्मूर्द्धरत्ननिकरपरशातिताम्रपादाङ्गुलः," तथा "तवाङ्घ्रिरेणुपरशाधिकारः" इति श्रीमद्भागवते "१०स्कं १६ अं २६।३६ श्लोके स्पर्शार्थे परशशब्द प्रयोगदर्शनात्। कर्कशरोमकूपता च हृष्टरोमत्वेनेति नेयम्। तत्रैन मुक्तेन प्रकारेण स्पृशन्त्योऽबलाः संहर्षयेयुरेवं योजना ॥ २५ ॥

धारेति, फुयारा इति प्रसिद्धेन शीकरवर्षिणा यन्त्रेनानुविद्धंगृहं धारागृहं। कुक्षिरत्रान्तःकोष्ठः, सकुसुमैः सुगन्धिपुष्पवासितैः गन्धोदकैः घृष्टचन्दनोदकैः सुगन्धिद्रव्योदकैर्वा, पत्रं तेजपत्रं अम्बु ह्रीवेरं चन्दनमत्रोप यौगिकत्वात् श्वेतमेवादेयम्। रसोऽत्र सन्निहितत्वात् पत्रादीनामेव क्वाथः। तथा च कल्कीकृतैः पद्मादिभिस्तत्क्वाथैश्च इत्यर्थः। कुड्यं भित्तिः। मांसीत्यादावकारो मत्वर्थीयः। प्रियकं कदम्बपुष्पं "पुन्नागो नामौषधिः "पुनां" इति उड्रै राख्यायते। नागो नागकेशरः कृतोपकारे विन्यस्तपुन्नागादिपुष्पत्वेन परिव्याप्तसौरभतया कृतानुगुण्ये ॥ २६ ॥

यत्राहतानिलविकम्पितपुष्पदाम्नि
हेमन्त-विन्ध्य-हिमवन्मलयाचलानाम्।
शीताम्भसां सकदली-हरितद्रुमाणाम्
उद्भिन्ननीलनलिनाम्बुरुहाकराणाम्॥
चन्द्रोदयस्य च कथाः शृणुयान्मनोज्ञा
ग्लानं सुदीनमनसं मनसोऽनुकूलाः।
पीनस्तनोरुजघना घनसारदिग्धा-
स्ता एवमार्द्रवसनाः सह संविशेयुः॥
श्लिष्टावलाः शिथिलमेखलहारयष्ट्यः॥२७॥
हर्षयेयुःपुनर्नार्य्यः स्वगुणैरहसि स्थिताः।
ताः शैत्याच्छमयेयुश्च पित्तपानात्ययं स्त्रियः॥
रक्तपित्ततृषादाहेष्वयमेव विधिः स्मृतः।
सामान्यतो विशेषन्तु शृणु दाहेष्वशेषतः॥

द्वितीयमर्थान्तर माह यत्रेति। हेमन्तादीनां तथा हिमाम्भसां हिमाम्बु सहितानां तथाउद्भिन्ननीलनलिनाम्बुरुहाकराणाम् आहतानिलेन कालस्वभाव समानीतानिलेन कम्पिताः पुष्पदामानः औपयौगिकत्वात् सुगन्धिपुष्पमाला यत्र तस्मिन तथोक्ते अनिलाहतविकम्पितपुष्पदाम्नि यत्र गृहे चन्द्रोदयस्य "चन्द्रोदीप्तौच रम्ये च" इति रभसस्मरणात् शृङ्गारादिरमणीयरसविशेषोत्पत्तेर्मनोज्ञाः कथाः शृणुयात्, तत्रैव ग्लानं दाहादिना ग्लानम् अतएवदीनमनसं मनसोऽनुकूलाइत्याद्युक्तलक्षणाः ताः पूर्व्वोक्ता मधुरस्वभावा एव शिथिलमेखलहारयष्ट्यः श्लिष्टावलाः आलिङ्गनावस्थिताः स्त्रियः तेन सह संविशेयुः शयीरन्। शिथिलमेखलहारयष्ट्य इति। शिथिला सुरतोत्सुकतया परिहृतवसनत्वेन विमुक्त बन्धनत्वात् श्रथा मेखला यत्र सा शिथिल मेखला, तादृशी हारयष्टिर्यासां ताः शिथिल मेखलहारयष्ट्यः एतावता रतोत् सुकतया परिहृतवसना याःस्त्रियो बन्धन विरहात् शिथिलां मेखलां आलिङ्गन प्रतिबन्धनीं मन्यमानाः ऊर्द्ध्वमानीय

कृत्स्नदेहानुगं रक्तमुद्रिक्तं दहति ह्यति ।
सन्धूष्यते दह्यते च ताम्राभस्ताम्रलोचनः ॥
लोहगन्धाङ्गवदनो वह्निनेवावकीर्य्यते ।
तं विलङ्घ्य विधानेन संसृष्टाहारमाचरेत् ॥
अप्रशाम्यति दाहे च रसैस्तस्य जाङ्गलैः ।
शाखाश्रया यथान्यायं रोहिणीर्व्यधयेत्सिराः ॥२८॥
पित्तज्वरसमः पित्तात्स चाप्यस्य विधिर्हितः ।
तृष्णानिरोधादब्धातौ क्षीणे तेजः समुत्थितम् ॥
स वाह्याभ्यन्तरं देहं दहेद्वै मन्दचेतसः ।
संशुष्कगलताल्वोष्ठो जिह्वां निष्कृष्य वेपते ॥
तत्रोपशमयेत्तेजस्त्वब्धातुञ्च विवर्द्धयेत् ।
पाययेत्काममम्भश्च शर्कराढ्यं पयोऽपि वा ॥

हारोपरि स्थापयाम्बभुवुः ता एव स्त्रियो लक्ष्यन्त इत्यनुसन्धेयम्। "हारजुष्टाः" इति पाठे तु शिथिल मेखला इति षष्ठ्यन्तान्यपदार्थे वहुव्रीहिः। ततः कर्मधारये पुंवद्भावः हारजुष्टा इति तु वाहिताग्न्यादिषु द्रष्टव्यम्। अत्र यन्त्राहृतेति दाक्षिणात्याः पठन्ति-तथात्वे यन्त्रेण वाताहरणयन्त्रावलम्बनेनाहृतो यन्त्राहृतः। यत्राहृतेति पाठेऽपि तात्पर्य्यार्थः स एव। अत्र हेमन्तेत्यादिना सार्द्धश्लोकेन मनसः प्रतिघातपरिहारार्थम् आहृतानिलस्यातितरां शीतलत्वं सुगन्धित्वञ्चाख्यातमित्यनुसन्धेयम्। अत्र हरितवर्णाः द्रुमाः हरितद्रुमाः घनसारस्त्वत्र चन्दनदिग्धः कर्पूरः ॥ २७ ॥

कृत्स्नेति। संधूष्यते समीपस्थेन वह्निनेव सन्तप्यते। रक्तस्य गन्धइव गन्धोऽस्येति लोहगन्धं, लोहगन्धमङ्गवदनमस्येति लोहगन्धाङ्गवदनः वह्निनेववाकीर्य्यते ज्वलदङ्गारेणेवात्मानमाचितं मन्यते। संसृष्टमुपक्रमेण संमिश्रं यच्च विधानेति विशेषणेन आहारस्यास्य मण्डपेयादिपुरःसरत्वमाख्यातम्।

शाखाश्रया हस्तपादाश्रया, रोहिणी रक्तवर्णाः ॥ २८ ॥

शीतमिक्षुरसं मन्थं वितरेच्चेरितं विधिम् ।
असृजा पूर्णकोष्ठस्य दाहोऽन्यः स्यात्सुदुस्तरः ॥
विधिःसद्योव्रणीयोक्तस्तस्य लक्षणमेव च ।
धातुक्षयोक्तो यो दाहस्तेन मूर्च्छा तृषान्वितः ॥
क्षामस्वरः क्रियाहीनः स सीदेद्भृशपीडितः ।
रक्तपित्तविधिस्तस्य हितः स्निग्धोऽनिलापहः ॥ २८ ॥
क्षतजेनाश्नतश्चान्यः शोचतोवाप्यनेकधा ।
तेनान्तर्दह्यतेत्यर्थं तृष्णामूर्च्छाप्रलापवान् ॥
तमिष्टविषयोपेतं सुहृद्भिरपि संवृतम् ।
क्षीरमांसरसाहारं विधिनोक्तेन साधयेत् ॥
मर्माभिघातजोऽप्यस्ति सोऽसाध्यः सप्तमो मतः ।
सर्वएव च वर्ज्याःस्युः शीतगात्रेषु देहिषु ॥
एवंविधो भवेद्यस्तु मदिरामयपीडितः ।
प्रशान्तोपद्रवस्यापि शोधनं प्राप्तमाचरेत् ॥
सजीरकाण्यार्द्रकशृङ्गवेरसौवर्चलान्यर्द्धजलप्लुतानि ।
मद्यानि हृद्यान्यथ गन्धवन्ति
पीतानि सद्यः शमयन्ति तृष्णां ॥

पित्तकृते दाहे पित्तज्वरलिङ्गानि तच्चिकित्सितञ्चातिदिशति पित्तेति । तृष्णानिरोधजं दाहमधिकरोति तृष्णेति अब्धातुः, रसः, तेजः पित्तम्, ईरितं प्रागुक्तं । असृजेति सद्योव्रणीयोक्तः सद्यव्रणचिकित्सिते "तस्मिन् भिन्ने रक्तपूर्णे" इत्यादिना सम्यगुपदिष्टः ॥ २८ ॥

लिङ्गप्रतीकारभेदादन्यथा रक्तजं दाहमधिकरोति क्षतज इति । अन्यः पूर्व्वस्माद्रक्तजाद्भिन्नः । सर्व्वे एव नेति इवार्थोऽयमिव शब्दो नत्ववधारणार्थः प्रत्यक्षविरोधात् । दृश्यते हि शीतगात्रेष्वपि दाहः

जलप्लुतश्चन्दनभूषिताङ्गः स्रग्वी सभक्तां पिशितोपदंशां।
पिबेत्सुरां नैव लभेत रोगान् मनोमतिघ्नश्च मदं न याति॥ ३०॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे पानात्ययप्रतिषेधो
नाम सप्तचत्वारिंशोऽध्यायः॥ ४७॥

मद्यं प्रतिसृतः प्रायेण प्रशान्तिमापद्यते। दाहाभिभूतं शीतगात्रं निवृत्तोपद्रवं मदिरामयपीड़ितं प्रति विशिनष्टि एवमिति अतिरोहितार्थमेतत्। सजीरकेति। अत्र मिलितानां जीरकादीनां कर्षद्वयं पलद्वये जले पूर्व्वस्मिन्नहन्याप्लुत्य।परस्मिन्नहनि वस्त्रपूतं कृत्वा चतुःपलेन मद्येन सह पाययेदित्युपदेशः। उपदंशो नाम "चाटनी" इति प्रसिद्धं मद्यपानरोचकं द्रव्यजातम्। परिशिष्टं निगदव्याख्यातम्॥ ३०॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
पानात्ययप्रतिषेधो नाम सप्तचत्वारिंशत्तमोऽध्यायः।

अष्टचत्वारिंशोऽध्यायः ।

अथातस्तृष्णाप्रतिषेधमध्यायं व्याख्यास्यामः ॥ १ ॥

सततं यः पिबेद्वारि न तृप्तिमधिगच्छति ।
पुनः काङ्क्षति तोयञ्च तं तृष्णार्दितमादिशेत् ॥ २ ॥

संक्षोभशोकश्रममद्यपानाद्रूक्षाम्लशुष्कोष्णकटूपयोगात् ।
धातुक्षयाल्लङ्घनसूर्य्यतापात् पित्तञ्च वातश्च भृशं प्रवृद्धौ ॥
स्रोतांसि संदूषयतः समेतौ यान्यम्बुवाहीनि शरीरिणां हि ।
स्रोतःस्वपांवाहिषु दूषितेषु जायेत तृष्णा प्रबला ततस्तु ॥ ३ ॥

तिस्रः स्मृतास्ताः क्षतजा चतुर्थी क्षयात् तथान्यामसमुद्भवा च ।
स्यात्सप्तमी भक्तनिमित्तजातु लिङ्गानि तासांशृणु चौषधानि ॥ ४

पूर्व्वाध्याये "शमयन्ति तृष्णाम्" इति नाममात्रेणोपदिष्टां तृष्णां प्रपञ्चेनावगमयन् तृष्णाप्रतिषेधमधिकरोति अथात इत्यादिना ॥ १ ॥

का नाम तृष्णा ? इत्यपेक्षायामाश्रयाश्रयिणोरभेदं मन्यमानो भगवान् तृष्णार्दितोपदेशेनैव तृष्णां निवेदयति सततमिति ॥ २ ॥

निदानपुरःसरीं संप्राप्तिमुपदिदिक्षति संक्षोभेति । तत इति षष्ठ्यन्तात् सार्व्वविभक्तिकस्तसिल्, येषां शरीरिणां संक्षोभादितः पित्तं वातश्च प्रवृद्धावुक्तलक्षणं कर्म्म कुरुतस्ततस्तेषां प्रबलातृष्णा जायेतेति निष्कर्षः, संप्राप्तिक्रमोऽयं परिष्करति भक्तनिमित्तजां तृष्णामिति तु भक्तनिमित्तजतृष्णाव्याख्यानावसरे प्रतिपादयिष्यामः । इहापि च तिस्र इत्यादौ स्मृता इत्यस्यैव वचनव्यत्यासेनान्वयादेशार्थी-

ताल्वोष्ठकण्ठास्यविशोषदाहाः सन्तापमोहभ्रमविप्रलापाः ।
पूर्व्वाणि रूपाणि भवन्ति तासामुत्पत्तिकालेषु विशेषतोऽपि ॥ ५

शुष्कास्यता मारुतसम्भवायां तोदस्तथा शङ्खशिरोगलेषु ।
स्रोतोनिरोधो विरसञ्च वक्त्रं शीताभिरद्भिश्च विवृद्धिमेति ॥
मूर्च्छाप्रलापारुचिवक्त्रशोषाः पीतेक्षणत्वं प्रततश्च दाहः ।
शीताभिकाङ्क्षा मुखतिक्तता च पित्तात्मिकायां परिधूपनञ्च ॥
वाष्पावरोधात् कफसंवृतेऽग्नौ तृष्णा बलासेन भवेत्तु तत्र ।
निद्रा गुरुत्वं मधुरास्यता च तृष्णार्द्दितः शुष्यति चातिमात्रम् ॥
कण्ठोपलेपो मुखपिच्छिलत्वम् शीतज्वरश्छर्द्दिररोचकश्च ।
कफात्मिकायां गुरुगात्रता च शाखासु शोफस्त्वविपाक एव ।
एतानि रूपाणि भवन्ति यस्यां तयार्द्दितः काङ्क्षति नातिचाम्भः ॥ ६

क्षतस्य रुक्शोणितनिर्गमाभ्यां तृष्णा चतुर्थी क्षतजा मता तु ।
तयाभिभूतस्य निशादिनानि गच्छन्ति दुःखंपिबतोऽपितोयम् ॥ ७

पलब्धावपि विशेषणार्थेन तुकारेण स्यादित्यनेन च पृथक्तेनोपदेशोऽमुमेवार्थं निगूढ़ं सूचयाम्बभूवेति गम्यते । तिस्रोवातपित्तकफजाः ॥ ३—५ ॥

शुष्केत्यादि । स्रोतांसीह कर्णादीनामेव । मूर्च्छेत्यादि । परिधूपनम् अग्निनेव सन्तपनम् । कफजां तृष्णामधिकरोति वाष्पेति । वाष्पमुष्मेति पर्य्यायौ । उष्मा पित्तमित्यनर्थान्तरम् । वदन्ति हि "उष्मा पित्तादृते नास्ति" इति अग्निश्च जाठरो नैव पित्ताद्भिद्यते इत्यवधारय, "न खलु पित्तव्यतिरेकादन्योऽग्निरुपलभ्यते" इति सू ं २१ अ ं अतिक्रान्तावेक्षणात् । तथाच कफसंवृतेऽग्नौपित्ते वाष्पावरोधात् पित्तावरोधात् बलासेन अग्नेरावरकेण श्लेष्मणेत्यर्थः । दाक्षिणात्यास्तत्र वाष्पेत्यादिश्लोकाधिष्ठाने "कफावृताभ्यमनिलानलाभ्यां कफोऽपिशुष्कः प्रकरोति तृष्णाम्" इति पठन्ति । अतिमात्रं शुष्यति श्लेष्मणा रसवहस्रोतसामावृतत्वादित्याकूतम् । नातिचाम्भः काङ्क्षति श्लेष्मान्वयादित्यभिसन्धिः ।

रसक्षयादृया क्षयसम्भवा सा तयाभिभूतस्तु निशादिनेषु ।
पेपीयतेऽम्भः स सुखं न याति तां सन्निपातादिति केचिदाहुः ।
रसक्षयोक्तानि च लक्षणानि तस्यामशेषेण भिषग्व्यवस्येत् ॥ ८ ॥
त्रिदोषलिङ्गामसमुद्भवा च हृच्छूलनिष्ठीवनसादयुक्ता ॥ ९ ॥
स्निग्धं तथाम्लं लवणञ्च भुक्तं गुर्व्वन्नमेवाशु तृषां करोति ॥ १०
क्षीणं विचित्तं वधिरं तृषार्त्तं विवर्ज्जयेन्निर्गतजिह्वमाशु ॥ ११ ॥
तृषाभिपन्नस्य तु दरे च पूर्णे तं वामयेन्मागधिकोदकेन ।
विलेपनञ्चात्र हितं वदन्ति स्याद्दाड़िमाम्रातकमातुलुङ्गैः ॥ १२
तृष्णा प्रयोगैरिह सा निवार्य्या शीतैश्च सम्यग्रसवीर्य्यजातैः॥१३॥
गण्डुषमम्लैर्विरसे च वक्त्रे कुर्य्याच्छुभैरामलकस्य चूर्णैः ॥ १४ ॥
सुवर्णरूप्यादिभिरग्नितप्तैर्लोष्ट्रैः कृतं वा सिकतोपलैर्वा ।
जलं सुखोष्णं शमयेत् तु तृष्णां सशर्करं क्षौद्रयुतं हिमं वा ॥१५॥
पञ्चाङ्गिकाः पञ्चगणा य उक्तास्तेष्वम्बु सिद्धं प्रथमे गणे वा ।
पिबेत् सुखोष्णं मनुजोऽल्पशस्तु तृषोविमुच्येत हि वातजायाः ॥

रसेति । रसक्षयोक्तानि सू १५ अ० उक्तानि हृत्पीड़ादीनि । भक्तनिमित्तजामुपक्रमते स्निग्धमिति । अत्र लवणञ्चेति चकारात् मधुरादीनामादेशः क्रियते । भक्तशब्दः स्वाभ्यवहृतवस्तुमात्रोपलक्षणमित्यवश्यं वक्तव्यम् । अतिमात्रमभ्यवहृतेक्षीरादावपि तृष्णागमदर्शनात् तथाचातिमात्रं भुक्तपीतमन्नपानमात्रमेव प्रभवात् तृषां करोत्येवमेवकारेणार्थोपलम्भात् प्रागुक्ता सम्प्राप्तिर्भक्तनिमित्तजां परिहरतीति नेयम् ॥९—११॥

प्रतिकारक्रमसुपदिदिक्षति तृष्णेति विलेपनमत्र शिरसि जिह्वायाञ्च प्रयोज्यमित्याहुः । विलोभनमिति पाठेतु श्रा तृष्णोपशमादातुरसमक्षम् दाड़िमरसादीनामालोड़नम्, मुहुर्मुहुरुत्पातनावपातनञ्चेत्याहुः । तृष्णेति । प्रयोगैः प्रयुक्तैः ॥ १२—१५ ॥

पञ्चेति पञ्चाङ्गिकाः पञ्चगणाः, पञ्च पञ्च मूलानि ।

पित्तघ्नवर्गेण कृतः कषायः सशर्करः क्षौद्रयुतः सुशीतः ।
पीतस्तृषां पित्तकृतां निहन्ति क्षीरं शृतं वाप्यथ जीवनीयैः ॥
विल्वाढ़कीकण्टकपञ्चमूलीदर्भेषु सिद्धं कफजां निहन्ति ।
हितं भवेच्छर्द्दनमेव चात्र तप्तेन निम्वप्रसवोदकेन ॥ १६ ॥
सर्व्वासु तृष्णास्वथवापि पैत्तं कुर्य्याद्विधिं तेन विना न शान्तिः ।
पर्य्यागतोडुम्बरजो रसस्तु सशर्करस्तत्क्वथितोदकं वा ।
वर्गस्य सिद्धस्य च सारिवादेः पातव्यमम्भः शिशिरं तृषार्त्तैः ।
कशेरुशृङ्गाटकपद्ममोचविसेषु सिद्धं क्षतजां निहन्ति ।
नीलोत्पलोशीरकुचन्दनानि दत्त्वा प्रवाते निशि वासयेत् तु ॥
तदुत्तमं तोयमुदारगन्धि सितायुतं क्षौद्रयुतं तथैव ।
द्राक्षाप्रगाढ़ञ्च हिताय वैद्यस्तृष्णार्द्दितेभ्यो वितरेन्नरेभ्यः ॥१७॥
स* सारिवादौ तृणपञ्चमूले तथोत्पलादौ मधुरे गणे च ।
कुर्य्यात् कषायञ्च यथैव युक्तं मधूकपुष्पादिषु वापरेषु ॥
राजादनक्षीरिकपीतनेषु षट्पानकान्यत्र हितानि च स्युः ।
सतुण्डिकेरीण्यथवा पिवेत् तु पिष्टानि कार्पाससमुद्भवानि ॥१८॥

पित्तघ्नवर्गः "सू' ३८ अं" उपदिष्टः काकल्यादिप्रभृतिः । विल्वेति । कण्टकः 'सू' ३८ अं' उक्तः कण्टकसंज्ञः । पञ्चमूली विल्वादिः । हितमिति । प्रसवः फलं पुष्पं वा "पुष्पे फले च प्रसवो मतः" इत्यजयः ॥ १६—१७ ॥

समस्यन्तेन पदषट्केन षट्पानकान्युपदिशति स इत्यादिना । *स तृषार्त्तः अत्र शीतफाण्ट कषाय कषायेषु मध्ये यमेव यावन्त मौपयोगिकं मन्येत तमेव तावन्तं कारयितुमिद मुच्यते यथैव युक्तमिति । मधूक पुष्पादिष्वित्यादिग्रहणात् पित्त हरत्वेन वकुलकोविदारागस्त्यपुष्पादीनामादेशः च—शब्दस्यानाधिष्ठानोऽयं वाशब्दः । परेषूत्कृष्टेषु प्रस्फुटितत्वेनाभिनवत्वेन च सम्यग्प्रसवोर्य्यवत्स्विति

क्षतोद्भवां रुग्विनिवारणेन जयेद्रसानामसृजश्च पानैः ॥
क्षयोत्थितां क्षीरघृतं निहन्यान्मांसोदकं वा मधुकोदकं वा ॥१९॥
आमोद्भवां विल्ववचायुतानां जयेत् कषायैरथ दीपनानाम् ।
आम्रातभल्लातवलायुतानि पिवेत् कषायाण्यथ दीपनानि ॥२०॥
गुर्व्वन्नजाता वमनैर्ज्जयेच्च क्षयादृते सर्व्वकृताश्च तृष्णाः ॥२१॥
श्रमोद्भवां मांसरसो निहन्ति गुडोदकं वाप्यथवापि मन्थः ॥२२॥
भक्तोपरोधात् तृषितो यवागूमुष्णां पिवेन्मन्थमथो हिमञ्च ॥२३॥
या स्नेहपीतस्य भवेच्च तृष्णा तत्रोष्णमम्भः प्रपिवेन्मनुष्यः ॥२४॥
मद्योद्भवामर्द्धजलं निहन्ति मद्यं तृषां यापि हि मद्यपस्य ॥२५॥
उष्णोद्भवां हन्ति जलं सुशीतं सशर्करं सेक्षुरसं तथाम्भः ॥२६॥
स्वैः स्वैः कषायैर्वमनानि तासां तथा ज्वरोक्तानि च पाचनानि॥२७
लेपावगाहौ परिषेचनानि कुर्य्यात् तथा शीतगृहाणि चापि ।
संशोधनं क्षीररसौ घृतानि सर्व्वासु लेहान् मधुरान् हिमांश्च॥२८

इति सुश्रुतसंहितायामुत्तरतन्त्रे तृष्णाप्रतिषेधो
नामाष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

यावत् । राजादनः पियालः, क्षीरीह उडुम्बरः, कपीतनः आम्रातकः, अत्र पानकानीत्युपदेशात् शर्करामधुरत्वमेषां व्याजेनोपदिष्टमित्यध्यवसितव्यम् । पानकशब्दो हि तथात्वे रूढ़िः । कार्पासमूलकृतानि पानकानि, वनकार्पासीमूलत्वचा सह पाययितु मिदमुच्यते सेति । तुण्डिकेरी वनकार्पासी ॥ १८-२१ ॥

प्रसङ्गात् श्रमादिजानामपि तृष्णानां प्रतिकारक्रमसुपक्रमते श्रमेति । भक्तोपरोधादाहारावरोधात् । परिशिष्टं निगदव्याख्यातम् ॥ २२—२८ ॥

इति श्रीहाराणचन्द्र चक्रवर्त्ति विरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
तृष्णाप्रतिषेधोनाम अष्टचत्वारिंशत्तमोऽध्यायः ।

एकोनपञ्चाशोऽध्यायः ।

अथातश्छर्द्दिप्रतिषेधमध्यायं व्याख्यास्यामः ॥ १

अतिद्रवैरतिस्निग्धैरहृद्यैर्लवणैरपि ।
अकाले चातिमात्रैश्च तथासात्म्यैश्च भोजनैः ॥
श्रमात् भयात् तथोद्वेगादजीर्णात् क्रिमिदोषतः ।
नार्य्याश्चापन्नसत्वायास्तथातिद्रुतमश्नतः ॥
वीभत्सैर्हेतुभिश्चान्यैर्द्रुतमुत्क्लेशितो बलात् ।
छादयन्नाननं वेगैरर्द्दयन्नङ्गभञ्जनैः ।
निरुच्यते च्छर्द्दिरिति दोषो वक्त्रं प्रधावितः ॥ २ ॥

पूर्व्वाध्याये "हितं भवेच्छर्द्दनमेव चात्र" इत्येवं प्रस्तुतां छर्द्दिं शिष्यशिशिक्ष-यिषया विस्तरशो निवेदयन् छर्द्दिप्रतिषेधमधिकरोति अथातइत्यादिना ॥ १ ॥

प्रतिपादयिता हि प्रतिपित्सितमर्थमनेकधा प्रतिपादयन् सम्यक् प्रतिपादकगुणैर्वरिष्ठोभवत्यतितरां स्पृहनीयवचनत्वेन, प्रतिपित्सवश्च ज्ञान गौरवेण समन्वीयन्ते यथावत्, तदिदानीं "छर्द वमने" इति धात्वर्थेनैव छर्द्देर्वमनार्थोप-लम्भेऽपि निदानानुविद्धमन्यथा छर्द्दिशब्दं निर्व्वक्ति "अतीत्यादिना प्रधावितः" इत्यन्तेन ग्रन्थसन्दर्भेण । उद्वेगोऽत्र साधारणशब्दविशेषादामाशये वायोर्यथाकथञ्चिदुद्गतोवेगः, वीभत्सैर्जुगुप्सितैः अन्यैश्चैवंविधैर्हेतुभिर्बलात् बलमाश्रित्यद्रुतमुत्क्लेशितः शां ४ अं उक्तोनोत्क्लेशलक्षणेनान्वितो वक्त्रं प्रधावितो बहिर्निर्गन्तुं जवेन वक्त्रमागतोदोष आननं वेगैश्छादयन् अङ्गभञ्जनैरनेकधा शिरःपार्श्वपृष्ठकौटिल्यैः पीड़यन् छर्द्दिरितिनिरुच्यते । चषकमुखमानयनात् चा-मुखेतिवत् । अत्र छादयन्निति छदेः सम्बरणार्थत्वात् । वक्त्रं प्रधावित इति प्रशब्दो पादानाच्च वक्त्रात् निःसृत एवदोषश्छर्द्दिसंज्ञां लभत इति निश्चीयते । वक्त्रात्विनिश्चरन् इति दाक्षिणात्यपाठस्तवतिरोहितार्थः ॥ २ ॥

दोषानुदीरयन् वृद्धानुदानो व्यानसङ्गतः ।
ऊर्द्धमागच्छति भृशं विरुद्धाहारसेविनाम् ॥ ३ ॥
हृल्लासोद्गाररोधौ च प्रसेको लवणस्तनुः ।
द्वेषोऽन्नपाने च भृशं वमीनां पूर्व्वलक्षणम् ॥ ४ ॥
प्रच्छर्द्दयेत् फेनिलमल्पमल्पं शूलार्द्दितोऽभ्यर्द्दितपार्श्वपृष्ठः ।
श्रान्तः सघोषं बहुशः कषायं जीर्णेऽधिकं सानिलजा वमिस्तु ॥५॥
योऽम्लं भृशं वा कटुतिक्तवक्त्रः पीतं सरक्तं हरितं वमेद्वा
सदाहचोषज्वरवक्त्रशोषमूर्च्छान्विता पित्तनिमित्तजा सा ॥ ६ ॥
यो हृष्टरोमा मधुरं प्रभूतं शुक्लं हिमं सान्द्रकफानुविद्धम्
अभक्तरुग्गौरवसादयुक्तो वमेद्वमी सा कफकोपजा स्यात् ॥७॥
सर्व्वाणि रूपाणि भवन्ति यस्यां सा सर्व्वदोषप्रभवा मता तु ॥८॥
बीभत्सजा दौहृदजाऽमजा च याऽसात्म्यतो वा क्रिमिजा च या हि
सा पञ्चमी तांश्च विभावयेत् तु दोषोच्छ्रयेणैव यथोक्तमादौ ॥९॥
शूलहृल्लासबहुला क्रिमिजा च विशेषतः ।
क्रिमिहृद्रोगतुल्येन लक्षणेन च लक्षिता ॥ १० ॥
क्षीणस्योपद्रवैर्युक्तां सासृक्पूयां सचन्द्रिकाम् ।
छर्द्दिं प्रसक्तां कुशलो नारभेत चिकित्सितुम् ॥ ११ ॥

छर्द्दिःप्राग्रूपमाह दोषानिति । दोषजानां चतसृणां छर्द्दीनां लिङ्गान्युपदिदिक्षति प्रच्छर्द्दयेदित्यादिना मतात्वित्यनेन ग्रन्थेन ॥ ३—८ ॥

बीभत्सजादिषु पञ्चसु छर्द्दिषु दोषलिङ्गान्यतिदिशति बीभत्सजेति । दौहृदजा द्विहृदयजा गर्भिणीसम्भूतेति यावत् क्रिमिजां विशिनष्टि शूलेत्यादिना ॥ ९—११ ॥

आमाशयोत्क्लेशभवाश्च सर्व्वास्तस्माद्धितं लङ्घनमेव तासु ।
वमीषु बहुदोषासु छर्द्दनं हितमुच्यते ।
विरेचनं वा कुर्व्वीत यथादोषोच्छ्रयं भिषक् ॥
संसर्गांश्चानुपूर्व्व्येण यथास्वं भेषजैर्युतान् ।
लघूनि परिशुष्काणि सात्म्यान्यन्नानि वा चरेत् ।
यथास्वञ्च कषायाणि ज्वरघ्नानि प्रयोजयेत् ॥ १२ ॥
हन्यात् क्षीरघृतं पीतं छर्द्दिं पवनसम्भवाम् ।
मुद्गामलकयूषो वा ससर्पिष्कः ससैन्धवः ॥
यवागूं मधुमिश्रां वा पञ्चमूलीकृतां पिबेत् ।
पिबेद्वा व्यम्लसिन्दुत्थफलाम्लं वैष्किरं रसम् ॥
सुखोष्णांलवणं वात्र हितं स्नेहविरेचनम् ॥ १३ ॥
पित्तोपशमनीयानि पानानि शिशिराणि च ।
कषायाण्युपयुक्तानि घ्नन्ति पित्तकृतां वमीम् ॥
शोधनं मधुरैश्चात्र द्राक्षारससमायुतैः ।
बलवत्यां प्रशंसन्ति सर्पिस्तैल्वकमेव च ॥ १४ ॥
आरग्वधादिभिर्यूषं दशाङ्गयोगमेव च ।
पाययेताथ सक्षौद्रं कफजायां चिकित्सकः ॥ १५ ॥

प्रतिकारक्रममधिकरोति आमेति । संसर्गांश्चेति । अनुपूर्व्व्येण यथाक्रमेण, मण्डपेयाविलेप्यादिक्रमेनेति यावत्, यथास्वं भेषजैर्युतान् सिद्धान् संसर्गान् मण्डादींस्तां स्तानाहारान् वा शब्दात् परिशुष्कानि सात्म्यान्यन्नानि लाजचूर्णादीनिचेति यावत् । आचरेदिति योजना । पिबेदिति । लवणञ्चेति वैष्किररसविशेषणमेतत् लवणेन संसृष्टं लवणं "लवणाल्लुक" इति पां सूं ४।४।२४ । तद्धितलुक् ।

कृतं गुडूच्या विधिवत् कषायं हिमसंज्ञितम्।
तिसृष्वपि भवेत् पथ्यं माक्षिकेण समन्वितम्॥ १६॥
बीभत्सजां हृद्यतमैर्दौर्हृदीं काङ्क्षितैः फलैः।
लङ्घनैर्वमनैश्चामां सात्म्यैश्चासात्म्यकोपजाम्॥ १७॥
कृमिहृद्रोगवच्चापि कृमिजां साधयेदिमाम्।
वितरेच्च यथादोषं शस्तं विधिमनन्तरम्॥ १८॥
दधित्थरससंयुक्तां पिप्पलीं माक्षिकान्विताम्।
मुहुर्मुहुर्नरो लीढ्वा च्छर्दिभ्यः प्रतिमुच्यते॥
समाक्षिका मधुरसा पीता वा तण्डुलाम्बुना।
तर्पणं वा मधुयुतं तिसृणामपि भेषजम्॥ १९॥
स्वयंगुप्तां सयष्ट्याह्वां तण्डुलाम्बुमधुद्रवाम्।
पिबेद्यवागूमथवा सिद्धां पत्रैः करञ्जजैः॥ २०॥
युक्ताम्ललवणाः पिष्टाः कुस्तुम्बुर्व्योऽथवा हिताः।
तण्डुलाम्बुयुतं खादेत् कपित्थं तूषणेन वा॥ २१॥

आरग्वधेति दशाङ्गशब्देनेह "नागरं धान्यकं भार्गीमभयां सुरदारु च वचां पर्पटकं मुस्तं भूतीकमथ कट्फलम् विनिष्क्वाथ्य पिबेत् क्वाथं दशाङ्गं योगमुत्तमम्"। इति स्मरणान्नागरादीन्येतान्येवोपदिशन्त्याचार्य्याः॥ १२—१६॥

बीभत्सजामिति। दौर्हृदीं गर्भिणीसम्भूताम् गर्भग्रहणनिमित्ततो जातामितिनिष्कर्षः। फलैरिति फलशब्दोऽयमभ्यवहार्य्यवस्तुमात्रोपलक्षणम्। बीभत्सजादिषु यथा दोषं प्रतिकर्त्तुमुपदिशति वितरेच्चेति। सामान्यं विधिमुपदिशति दधित्थेति। मधुरसा मूर्व्वा। स्वयमिति। तण्डुलाम्बुमधुनी द्रवे यत्र तां तथोक्ताम् तण्डुलाम्बुमधुद्रवाम्। अत्र तण्डुलाम्बुपलं शेषाणि त्रीणि प्रत्येकमर्द्धकर्षोणि-मेयानि, करञ्जशब्देनेह "करमजा" इति प्रसिद्धोऽम्लफलविशेषएवाभिप्रेयते तत्पत्राणि कल्कीकृत्य पोट्टलीं बद्धा तया सह यवागूं पक्वा पिबेदित्युपदेशः॥ २०॥

सिताचन्दनमध्वाक्तां लिह्याद्वा मक्षिकाशकृत्।
पिबेत् पयोऽग्नितप्तश्च निर्व्वाप्य गृहगोधिकाम्॥
सर्पिः क्षौद्रयुतान् वापि लाजशक्तून् पिबेत् तथा।
सर्पिःक्षौद्रसितोपेतां मागधीं वा लिहेत् तथा॥
धात्रीरसे चन्दनं वा शृतं मुद्गदलाम्बु वा।
कोलामलकमज्जानं लिह्याद्वा त्रिसुगन्धिकम्॥
सक्षौद्रां शालिलाजानां यवागूं वा पिबेन्नरः।
प्रेयाण्युपहरेच्चापि मनोज्ञाणसुखानि च॥
जाङ्गलानि च मांसानि स्वादुवत्पानकानि च।
भोजनानि विचित्राणि कुर्य्यात् सर्व्वाण्यतन्द्रितः॥ २२॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे छर्द्दिप्रतिषेधो नामैकोनपञ्चाशोऽध्यायः॥ ४९॥

गृहगोधिका जेष्ठीति पर्य्यायौ "टिकटिकी" इति प्रथते तामग्नौ दग्ध्वा अग्निसन्तप्तेजले निर्व्वाप्य तज्जलं किञ्चित् किञ्चित् मुहुर्मुहुः पाययितुमिदमुच्यते पिबेदिति। परिशिष्टमतिरोहितार्थम्॥ २१—२२॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे छर्द्दिप्रतिषेधो नाम एकोनपञ्चाशत्तमोऽध्यायः।

पञ्चाशोऽध्यायः ।

अथातो हिक्काप्रतिषेधं व्याख्यास्यामः ॥ १ ॥

विदाहिगुरुविष्टम्भि-रूक्षाभिष्यन्दिभोजनैः ।
शीतपानासनस्थान-रजोधूमानिलानलैः ॥
व्यायामकर्म्मभाराध्व-वेगाघातापतर्पणैः ।
आमदोषाभिघातस्त्री-क्षयरोगप्रपीड़नैः ॥
विषमाशनाध्यशनैस्तथा समशनैरपि ।
हिक्का श्वासश्च कासश्च नृणां समुपजायते ॥ २ ॥

मुहुर्म्मुहुर्वायुरुदेति सस्वनो
यकृत्प्लीहान्त्राणि मुखादिवाक्षिपन् ।
स घोषवानाशु हिनस्त्यसून् यत-
स्ततस्तु हिक्केति भिषग्भिरुच्यते ॥ ३ ॥

आयुर्व्वेद इदमामनन्ति हि "पित्तं पङ्गु कफः पङ्गुपङ्गवोमलधातवः । वायुना यत्र नीयन्ते तत्र वर्षन्ति मेघवत्" ॥ तदिह दोषान्तरजातं तृणीकृत्य वातमेव प्रधानं मन्यमानो भगवान् उद्गतवातकृतत्वसाधर्म्म्यात् छर्द्दिप्रतिषेधादनन्तरं हिक्काप्रतिषेधमधिकरोति अथात इत्यादिना ॥ १ ॥

विदाहीति । नेह विषमेत्यादौ पञ्चमषष्ठयोर्गुरुलघुत्वेन छन्दोदोषः प्रसज्यत "भ्रौन्तौ च" इति "५अः" १८ पिङ्गलसूत्रवृत्तौ, "वटे वटे वैश्रवणः" इति लक्ष्यत्वेनोपदेशात् ॥ समशनम् "सू ४६ अ" हिताहितोपसंयुक्तमित्याद्युक्तम् । वदन्ति हि मितञ्च सारञ्च वचोहि वाग्मिता, तदिहैवमसमाननिदानत्वादिदमुच्यते "हिक्काश्वासश्चकासश्च" इति ॥ २ ॥

अन्नजां यमलां क्षुद्रां गम्भीरां महतीं तथा ।
कफेनानुगतो वायुः पञ्च हिक्काः करोति हि ॥ ४ ॥
मुखं कषायमरतिर्गौरवं कण्ठवक्षसोः ।
पूर्व्वरूपाणि हिक्कानामाटोपो जठरस्य च ॥ ५ ॥
पानान्नैरतिसंयुक्तैः सहसा पीड़ितोऽनिलः ।
हिक्कयत्यूर्द्धगो भूत्वा तां विद्यादन्नजां भिषक् ॥ ६ ॥
चिरेण यमलैर्वेगैर्य्या हिक्का सम्प्रवर्त्तते ।
कम्पयन्ती शिरोग्रीवं यमलां तां विनिर्द्दिशेत् ॥ ७ ॥
विक्रुष्टकालैर्य्या वेगैर्मन्दैः समभिवर्त्तते ।
क्षुद्रिका नाम सा हिक्का जत्रुमूलात् प्रधाविता ॥ ८ ॥
नाभिप्रवृत्ता या हिक्का घोरा गम्भीरनादिनी ।
शुष्कौष्ठकण्ठजिह्वास्य-श्वासपार्श्वरुजाकरी ।
अनेकोपद्रवयुता गम्भीरा नाम सा स्मृता ॥ ९ ॥
मर्म्माण्यापीड़यन्तीव सततं या प्रवर्त्तते ।
देहमायम्य वेगेन घोषयत्यतितृष्यतः ॥
महाहिक्केति सा ज्ञेया सर्व्वगात्रप्रकम्पिणी ॥ १० ॥
आयम्यते हिक्कतोऽङ्गानि यस्य
दृष्टिश्चोर्द्ध्वं ताम्यते यस्य गाढ़म् ।
क्षीणोऽन्नविट् कासते यश्च हिक्की
तौ द्वावन्त्यौ वर्ज्जयेद्धिक्कमानौ ॥ ११ ॥

मुहुरिति यतोऽसून् हिनस्ति तत एव हिक्केत्युच्यते, मह्यां रौतीति व्युत्पत्त्या मयूर इतिवत्। पानान्नैरिति। हिक्कयतीति "हिक्क अव्यक्तशब्दे" इत्यस्य रूपम्। तत्करोतीति णिचि नेय मिति केचित्, हिक्कां करोतीत्यर्थः ॥ १—११ ॥

प्राणायामोद्वेजनत्रासनानि सूचीतोदैः संभ्रमश्चात्र शस्तः ।
यष्ट्याह्वं वा माक्षिकेणावपीडः पिप्पल्यो वा शर्कराचूर्णयुक्ताः ॥
सर्पिः कोष्णं क्षीरमिश्रो रसो वा नातिक्षीणे स्रंसनं छर्दनञ्च ।
नारीपयःपिष्टमशुक्लचन्दनं घृतं सुखोष्णञ्च ससैन्धवं तथा ॥
चूर्णीकृतं सैन्धवमम्भसा तथा निहन्ति हिक्काञ्च हितञ्च नस्यतः ।
युञ्ज्याद्धूपं शालनिर्यासजातं नैपालं वा गोविषाणोद्भवं वा ॥
सर्पिःस्निग्धैश्चर्म्मवालैः कृतं वा हिक्कास्थाने स्वेदनं वापि कार्य्यम् ॥
क्षौद्रोपेतं गैरिकं काञ्चनाह्वं लिह्याद्भस्म ग्राम्यसत्त्वास्थिजं वा ॥१२
तद्वच्छ्वाविन्मेषगोशल्लकानां रोमाण्यन्तर्धूमदग्धानि चात्र ।
मध्वाज्याक्तं बर्हिपत्रप्रसूतमेवं भस्मौडुम्बरं तैल्वकं वा ।
स्वर्जिक्षारं वीजपूराद्रसेन क्षौद्रोपेतं हन्ति लीढ्वाशु हिक्काम् ॥

सर्पिःस्निग्धा घ्नन्ति हिक्कां यवाग्वः
कोष्णग्रासाः पायसो वा सुखोष्णाः ॥

शुण्ठीतोये साधितं क्षीरमाजं तद्वत् पीतं शर्करासंयुतं वा ।
स्त्रा स्तन्यैर्वा सेव्यमानं निहन्याद्द्ध्रातं हिक्कामाशु मूत्रन्त्वजाव्योः ॥१३

प्रतिकारक्रम मुपदिदिक्षति प्राणायामेति । प्राणायामः प्राणवायोः संयमनम् श्वासावरोधनमित्येतत् ।—उद्वेजनमत्र निपुणं कल्पितेन धनवान्धव संक्षयादिसंवादेन क्षोभनम् । त्रासनं पुनर्यथा कथञ्चिद्भीत्युत्पादनम् । काञ्चनाभं गैरिकं सुवर्ण गैरिकम् ॥ १२ ॥

तद्वदिति बर्हिपत्रप्रसूतं मयूरपिच्छसम्भूतं संभ्रमोऽकस्मादेकत्वाऽभिनिवर्त्तनम् । श्वावित् क्षुद्रः शल्लकः शल्लकस्तु तद्वच्छरीरः, उभावेव "शजारु" इति परिचीयेते ॥ १३ ॥

सपूतिकीटं लशुनीयगन्धाहिङ्गूजमाचूर्ण्यं सुभावितं तत् ।
क्षौद्रं सितां वारणकेशरञ्च पिबेद्रसेनेक्षुमधूकजेन ॥
पिबेत् पलं वा लवणोत्तमस्य द्वाभ्यां पलाभ्यां हविषः समयम् ।
हरीतकीं कोष्णजलानुपानां पिबेद्घृतं क्षारमधुप्रपन्नम् ॥
रसं कपित्थान्मधुपिप्पलीभ्यां पिचुप्रमाणं प्रपिबेत् सुखाय ॥
कृष्णां सिताञ्चामलकञ्च लीढ़ं सशृङ्गवेरं मधुनाथवापि ।
कोलास्थिमज्जाञ्जनलाजचूर्णं हिक्कां निहन्यान्मधुना च लीढ़म् ॥१४

पाटलायाः फलं पुष्पं गैरिकं कटुरोहिणी ।
खर्ज्जुरमध्यं मागध्यः कासीसं दधिनाम च ॥
चत्वारो यूषयोगाः स्युः प्रतिपादप्रदर्शिताः ।
मधुद्वितीयाः कर्त्तव्यास्ते हिक्कासु विजानता ॥ १५

कपोतपारावतलावशल्लक-
श्वदंष्ट्रगोधाद्दषदंशजान् रसान् ।
पिबेत् फलाम्लानहिमान् ससैन्धवान्
स्निग्धांस्तथैवर्ष्यमृगद्विजोद्भवान् ॥

सपूतीति । पूतिगन्धिः कीटः पूतिकीटः । स च "गाँधि" इति पादुरा कीट इति च नाम्ना विज्ञायते। सुभावितं सन्निहितत्वात् अजाक्षीमूत्रेनेति ज्ञेयम् । प्रातं निहन्यादिति पूर्व्वेणान्वयः। पिबेदिति। योगोऽयं वमनेन हिक्कां शमयतीतिकृत्वा यावता सैन्धवेन वमनं प्रवर्त्तते तावदेवसैन्धवं प्रयुज्यम्, हविषश्च मानं लेणानुगुणमेवेत्युपदेशः। हरितकीमिति। क्षारो यवक्षारः। पिचुप्रमाणं कर्षमात्रम् ॥ १४ ॥

पाटलाया इति। गैरिकशब्देनेह सुवर्णगैरिकमेव ग्राह्यन्ति। खर्ज्जुरमध्यं खर्ज्जुरबीजमज्जा। दधिनाम कपित्थफलम्। मुद्गयूषेण युज्यन्त इति यूषयोगाः।

विरेचनं पथ्यतमंससैन्धवम्
घृतं सुखोष्णञ्च सितोपलायुतम् ।
सदागतावूर्द्ध्वगतेऽनुवासनं
वदन्ति केचिच्च हितायहिक्किनाम् ॥१६॥
इति सुश्रुतसंहितायामुत्तरतन्त्रे हिक्काप्रतिषेधो
नाम पञ्चाशोऽध्यायः ॥ ५० ॥

कपोतेति । ऋष्यो मृगभेदः । मृगस्तु मृगसामान्यम् । द्विजाश्चात्र प्राधान्यात् विष्किरा एव ज्ञेयाः । परिशिष्टं निगदव्याख्यातम् ॥ १५—१६ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्ति विरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये हिक्काप्रतिषेधोनाम पञ्चाशत्तमोऽध्यायः ।

एकपञ्चाशोऽध्यायः ।

अथातः श्वासप्रतिषेधं व्याख्यास्यामः ॥ १ ॥

यैरेव कारणैर्हिक्का बहुभिः संप्रवर्त्तते ।
तैरेव कारणैः श्वासो घोरो भवति देहिनाम् ॥ २ ॥

विहाय प्रकृतिं वायुः प्राणोऽथ कफसंयुतः ।
श्वासयत्यूर्द्ध्वगो भूत्वा तं श्वासं परिचक्षते ॥ ३ ॥

क्षुद्रकस्तमकश्छिन्नो महानूर्द्ध्वश्च पञ्चधा ।
भिद्यते स महाव्याधिः श्वास एको विशेषतः ॥ ४ ॥

प्राग्रूपं तस्य हृत्पीड़ा भक्तद्वेषोऽरतिः परा ।
आनाहः पार्श्वयोः शूलं वैरस्यं वदनस्य च ॥ ५ ॥

किञ्चिदारभमाणस्य यस्य श्वासः प्रवर्त्तते ।
निषण्णस्यैति शान्तिञ्च स क्षुद्र इति संज्ञितः ॥ ६ ॥

तृट्स्वेदवमथुप्रायः कण्ठघर्घुरिकान्वितः ।
विशेषाद् दुर्द्दिने ताम्येच्छ्वासः स्यात् तमको मतः ॥ ७ ॥

आयुर्व्वेद इदमामनन्ति हि "कामं प्राणहरा रोगा बहवो न तु ते तथा । यथा श्वासश्च हिक्का च प्राणानाशु निकृन्ततः" । इति तदिदानी-मात्ययिकत्वसाम्यात् समानहेतुकत्वाच्च हिक्काप्रतिषेधादनन्तरं श्वासप्रतिषेध-मधिकरोति अथात इत्यादिना । यैरेवेति । प्रकृतिं विहाय दुष्टो भूत्वेत्यर्थः । "प्रायशः कुरुते दुष्टो हिक्काश्वासादिकान् गदान् ।" इति हि निरदिक्षत् । प्रागेव हिक्काश्वासयोः समाननिदानत्व उपदिष्टेऽपि व्यवसायाऽभिवृद्धये पुनरिह यैरेवेत्युक्तमित्यनुसन्धेयम् ॥ १—६ ॥

घोषेण महताविष्टः सकासः सकफो नरः।
यः श्वसित्यबलोऽन्नद्विट् सुप्तस्तमकपीड़ितः॥
स शाम्यति कफे क्षीणे स्वपतश्च विवर्द्धते॥ ८॥
मूर्च्छाज्वराभिभूतस्य ज्ञेयः प्रतमकस्तु सः॥ ९॥
आध्मातो दह्यमानेन वस्तिना सरुजं नरः।
सर्व्वप्राणेन विच्छिन्नं श्वस्याच्छिन्नं तमादिशेत्॥ १०॥
निःसंज्ञः पार्श्वशूलार्त्तः शुष्ककण्ठोऽतिघोषवान्।
संरब्धनेत्रस्त्वायम्य यः श्वस्यात् स महान् स्मृतः॥ ११॥
मर्म्मस्वायम्यमानेषु श्वसन् मूढ़ो मुहुश्च यः।
ऊर्द्ध्वप्रेक्षी हतस्वस्तमूर्द्ध्वश्वासमादिशेत्॥ १२॥
क्षुद्रः साध्यतमस्तेषां तमकः कृच्छ्र उच्यते।
त्रयः श्वासा न सिध्यन्ति तमको दुर्व्वलस्य च॥ १३॥
स्नेहवस्तिं विना केचिदूर्द्ध्वञ्चाधश्च शोधनम्।
मृदु प्राणवतां श्रेष्ठं श्वासिनामादिशन्ति हि॥ १४॥
कासे श्वासे च हिक्कायां हृद्रोगे चापि पूजितम्।
घृतं पुराणं संसिद्धमभयाविड़रामठैः॥
सौवर्च्चलाभयाविल्वैः संस्कृतं वा नवं घृतम्।
पिप्पल्यादिप्रतीवापं सिद्धं वा प्रथमे गणे॥
सपञ्चलवणं सर्पिः श्वासकासौ व्यपोहति॥ १५॥

दहिति ताम्येदिति तमु खेदे धातुः दुःखयतीत्यर्थः। अतएव तमकोमत इति भावः। निःसंज्ञ इत्यादौ आयम्यदीर्घीभूय प्रथमेगणे सू० ३८ अ० उक्ते विदारिगन्धादौ॥ ७—१५॥

हिंस्राविडङ्गपूतीक-त्रिफलाव्योषचित्रकैः ।
द्विक्षीरं साधितं सर्पिश्चतुर्गुणजलान्वितम् ॥
कोलमात्रैः पिबेत् तद्धि श्वासकासौ व्यपोहति ।
अर्शांस्यरोचकं गुल्मं शकृद्भेदं क्षयं तथा ॥
कृतस्ने वृषकषाये वा पचेत् सर्पिश्चतुर्गुणे ।
तन्मूलकुसुमावापं शीतं क्षौद्रेण योजयेत् ॥
शृङ्गीमधुरिकाभार्गी-शुण्ठीतार्क्ष्यसिताम्बुदैः ।
सहरिद्रैः सयष्ट्याह्वैः समैरावाप्य योगतः ॥
घृतप्रस्थं पचेद्धीमान् शीततोये चतुर्गुणे ।
श्वासं कासं तथा हिक्कां सर्पिरेतन्नियच्छति ॥
सुवहा कालिका भार्गी शुकाख्या नैचुलं फलम् ॥
काकादनीं शृङ्गवेरं वर्षाभूर्बृहतीद्वयम् ।
कोलमात्रैर्घृतप्रस्थं पचेदेभिर्जलाढकम् ।
कटूष्णं पीतमेतद्धि श्वासामयविनाशनम् ॥
सौवर्चलयवक्षार-कटुकाव्योषचित्रकैः ।
वचाभयाविडङ्गैश्च साधितं श्वासशान्तये ॥
गोपवल्ल्युदके सिद्धं स्यादन्यद्द्विगुणे घृतम् ॥ १६ ॥

हिंस्रेति । हिंस्रानामौषधिः "काँटागर" इति परिचीयते कृतस्ने इति । जलापरपर्य्यायोयं कृतस्नशब्दः "कृतस्नं सर्व्वाम्बुकुक्षिषु" इति मेदिनी । तन्मूलकुसुमावापं यथालाभं वृषमूलकुसुमकल्कम् अत्र क्षौद्रस्योष्णविरोधित्वात् साक्षादुक्तं शीतमिति । शृङ्गीत्यादि । तार्क्ष्यं रसाञ्जनम् । सुवहेत्यादि । सुवहा रास्ना, कालिकाजटामांसी "कालिका मांसी काकी शिवासु च" इति मेदिनी । शुकाख्या शुकशिम्बा । काकादनीगुञ्जा गोपवल्ली श्यामलता ॥ १६ ॥

तालीशतामलक्युग्रा-जीवन्तीकुष्ठसैन्धवैः ।
विल्वपुष्करभूतीक-सौवर्च्चलकणाग्निभिः ॥
पथ्यातेजोवतीयुक्तैः सर्पिर्जलचतुर्गुणम् ।
हिङ्गुपादयुतं सिद्धं सर्व्वश्वासहरं परम् ॥
पञ्चैतानि हवींष्याहुर्भिषजः श्वासकासयोः ॥
वासाघृतं षट्पलञ्च घृतञ्चात्र हितं भवेत् ॥ १७ ॥
तैलं दशगुणे सिद्धं भृङ्गराजरसे शुभे ।
सेव्यमानं यथान्यायं श्वासकासौ व्यपोहति ॥ १८ ॥
फलाम्ला विष्किररसाः स्निग्धाः प्रव्यक्तसैन्धवाः ।
एणादीनां शिरोभिर्वा कौलत्था वा सुसंस्कृताः ।
हन्युः श्वासञ्च कासञ्च संस्कृतानि पयांसि च ॥ १९ ॥
तिनिशस्य च वीजानि कर्कटाख्या सुवर्च्चिका ।
दुरालभाथ पिप्पल्यः कटुकाख्या हरीतकी ॥
श्वाविन्मयूररोमाणि कोला मागधिकाकणाः ।
मार्गी त्वक् शृङ्गवेरञ्च शर्कराशल्लकाङ्गजम् ।
त्रिकण्टकस्य वीजानि चूर्णितानि तु केवलम् ॥

तालीशेति । तामलकी भूम्यामलकी । भूतीकं यमानी तेजोवती चव्यम् । पञ्चैतानि शृङ्गीत्यादिनोक्तानि, आहुः श्रेष्ठानीतिशेषः । वासाघृतं "उ० ४१ अ०" "लतृबङ्घषे" इत्यादिना, षट्पलञ्च "चि० १४ अ०" पिप्पली पिप्पलीमूलेत्यादिनाभिहितम् ॥ १७ ॥

फलाम्ला इति । सुसंस्कृता इति तु वातघ्नैर्दशमूलादिभिरेवेति ज्ञेयम् । तिनिशस्येति । तिनिशोनामौषधी मथुरायां "तिनास" इति प्रथितं ।

पञ्चश्लोकार्द्धिकास्त्वेते लेहा ये सम्यगीरिताः ।
सर्पिर्मधुभ्यां ते लेह्याः कासश्वासार्द्दितैर्नरैः ॥ २० ॥
सप्तच्छदस्य पुष्पाणि पिप्पलीश्चापि मस्तुना ।
पिवेत् सञ्चूर्ण्य मधुना धानाश्चाप्यथ भक्षयेत् ॥
अर्काङ्कुरैर्भावितानां यवानां साध्वनेकशः ।
तर्पणं वा पिवेदेषां सक्षौद्रं श्वासपीड़ितः ॥
शिरीषकदलीकुन्द-पुष्पमागधिकायुतम् ।
तण्डुलाम्बुयुतं पीत्वा जयेच्छ्वासानशेषतः ॥
कोलमज्जस्तालमूलमृष्यचर्म्ममसोमपि ।
लिह्यात् क्षौद्रेण भार्गीं वा सर्पिर्मधुसमायुताम् ॥ २१ ॥
निम्बैः कदम्बवीजं वा सक्षौद्रं तण्डुलाम्बुना ॥
द्राक्षां हरीतकीं कृष्णां कर्कटाख्यां दुरालभाम् ॥
सर्पिर्मधुभ्यां विलिहन् हन्ति श्वासान् सुदारुणान् ॥
हरिद्रां मरिचं द्राक्षां गुड़ं रास्नां कणां शठीम् ।
लिह्यात् तैलेन तुल्यानि श्वासार्त्तो हितभोजनः ॥
गवां पुरीषस्वरसं मधुमागधिकायुतम् ।
लिह्यात् श्वासेषु कासेषु वाजिनां वा शकृद्रसम् ॥ २२ ॥
पाण्डुरोगेषु शोथेषु ये योगाः सम्प्रकीर्त्तिताः ।
श्वासकासापहास्तेऽपि कासघ्ना ये च कीर्त्तिताः ॥ २३ ॥

कर्कटाख्या कर्कटशृङ्गी कोला चव्यम्। मागधिकाकणाः पिप्पलीतण्डुलाः ॥ १८—२० ॥

सप्तेति। धानाभृष्टयवा। कोलेति। कोलमज्जामिति पाठेतु मज्जपर्य्यायोयं मज्जाशब्दः। निम्बैरिति। बहुवचनञ्चात्र यथालाभं मूलपत्रफलपुष्पत्वचां परिग्र-

भार्गीत्वक्चूर्णं तैलं हरिद्रां कटुरोहिणीम् ।
पिप्पलीं मरिचं चण्डां गोशकृद्रसमेव च ॥ २४ ॥
तलकोटस्य वीजेषु पचेदुत्कारिकां शुभाम् ।
सेव्यमाना निहन्त्येषा श्वासानाशु सुदुस्तरान् ॥ २५ ॥
पुराणसर्पिः पिप्पल्यः कौलत्था जाङ्गला रसाः ।
सुरा सौवीरकं हिङ्गु मातुलुङ्गरसो मधु ।
द्राक्षामलकविल्वानि शस्तानि श्वासहिक्किनाम् ॥ २६ ॥
श्वासहिक्कापरिगतं स्निग्धैः स्वेदैरुपाचरेत् ।
युक्तैर्लवणतैलाभ्यां तैरस्य ग्रथितः कफः ।
स्वस्थो विलयनं याति मारुतश्चास्य शाम्यति ॥
स्निग्धं ज्ञात्वा ततश्चैव भोजयित्वा रसौदनम् ॥ २७ ॥
वातश्लेष्मविवन्धे वा भिषग्धूमं प्रयोजयेत् ।
मनःशिलादेवदारु-हरिद्राच्छदनामिषैः ।
लाक्षोरुवूकमूलैश्च कृत्वा वर्त्तीर्विधानतः ॥
सर्पिर्नवमधूच्छिष्ट-शालनिर्यासजं तथा ।
शृङ्गवालखुरस्नायुत्वक् समस्तं गवामपि ॥

स्वार्थं । भार्गीति । चण्डा च कपिकच्छुः । तलेति । तलकोटोऽङ्कोठः । उत्कारिका च वारिपक्कः कल्कः ॥ २१—२६ ॥

श्वासेति । निरङ्कुशमवस्थितः स्वस्थः । “स्वस्था भवन्तुमयि जीवति धार्त्तराष्ट्राः । इति वेणीसंहारः । स्थिर इति तात्पर्य्यम् । स्वस्थ इति पाठे-तु स्वस्यःस्रोतसि स्थित इत्यर्थः । वातेति । छदनं तेजपत्रम् तदादिकमामिषं भोग्य-वस्तु लवङ्गजीरकादिकमित्येतत् “उत्कोचे पललेन स्त्री, आमिषं भोग्यवस्तुनि” इति रभसः । सर्पिरिति । सर्पिरादिकं तथा गवां शृङ्गादि समस्तं तथा तुरुष्क-

तुरुष्कशल्लकीनाञ्च गुग्गुलोः पद्मकस्य च।
एते सर्व्वे ससर्पिष्का धूमाः कार्य्या विजानता॥ २८॥
बलीयसि कफग्रस्ते वमनं सविरेचनम्।
दुर्ब्बले चैव रूक्षे च तर्पणं हितमुच्यते।
आह्लोरभ्रजैर्मांसैरानूपैर्वा सुसंस्कृतैः॥ २९॥
निदिग्धिकाश्चामलकप्रमाणां हिङ्गुद्वययुक्तां मधुना सुयुक्ताम्।
लिहन् नरः श्वासनिपीड़ितो हि श्वासं जयत्येव बलात् त्र्यहेण॥
यथाग्निरिद्धः खलु काष्ठसङ्घं वज्रं यथा वा सुरराजमुक्तम्।
रोगास्तथैते खलु दुर्निवाराः श्वासश्च कासश्च विलम्बिका च॥ ३०

इति सुश्रुतसंहितायामुत्तरतन्त्रे श्वासप्रतिषेधो नामैकपञ्चाशोऽध्यायः॥ ५१॥

प्रभृतीनाञ्चचूर्णाश्च वर्त्तीः कृत्वा धूमं प्रयोजयेदित्यन्वयः। अत्र तुरुष्कः सिह्लकः सल्लकी "शिलारस" इति विख्यायते। उक्तमर्थं विशिनष्टि एत इति। एते सर्व्वधूमाः ससर्पिष्का एव कार्य्या इत्येवं व्याख्येयम् "असति बाधे सर्व्वं वाक्यं सावधारणम्" इति स्मरणात् वातश्लेष्मविबन्धप्रतियौगिकत्वाच्च। अत्र सर्व्वे इति विशेषणात् सर्पिरादिभिः कृतयाऽपि वर्त्त्या धूमोपयोगकाले विमृश्य यथायोगं सर्पिः प्रयोक्तुमुपदिशन्ति प्राञ्चः। निदिग्धिकामिति। आमलकप्रमाणां मध्यस्योभयभागित्वात् मध्यमामलकमितां अर्द्धकर्षमितामिति केचित्। परिशिष्टमतिरोहितार्थम्॥ २७—३०॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे श्वासप्रतिषेधोनामैकपञ्चाशत्तमोऽध्यायः।

द्विपञ्चाशोऽध्यायः।

अथातः कासप्रतिषेधमध्यायं व्याख्यास्यामः ॥ १ ॥
उक्ता ये हेतवो नृणां रोगयोः श्वासहिक्कयोः।
कासस्यापि च विज्ञेयास्त एवोत्पत्तिहेतवः ॥ २ ॥
धूमोपघाताद्रजसस्तथैव व्यायामरूक्षान्ननिषेवणाच्च।
विमार्गगत्वादपि भोजनस्य वेगावरोधात् क्षवथोस्तथैव ॥
प्राणो ह्युदानानुगतः प्रदुष्टः
संभिन्नकांस्यस्वनतुल्यघोषः।
निरेति वक्त्रात् सहसा सदोषः
कासः स विद्वद्भिरुदाहृतस्तु ॥ ३ ॥

तुल्यहेतुकत्वसाधर्म्यात् श्वासप्रतिषेधादनन्तरं कासप्रतिषेधमधिकरोति अथात इत्यादिना ॥ १—२ ॥

धूमोपघातादिति। मुखं नासाच्छिद्रारोकृत्य तालुनि नासामूले च धूमेनोपघातस्तद्धूमोपघातः। एतेनैव रजसस्तथैवेति प्रायेण व्याख्यातम्। भोज्यते यत्तद्भोजनम् तस्य भोजनस्यान्नादेर्विमार्गगत्वात् तालुनि श्वासमार्गे वा गमनात्। वेगो वातमूत्रपुरीषादीनां निःसरणाय प्रयत्नः। एतेनैव क्षवथुवेगस्याप्युपलम्भेऽपि पृथगुपादनं दोषातिशयजनकत्वमाख्यातुम्। सदोषः सकफपित्तः। कासउदाहृतः "कासृशब्दकुत्सायाम्" इति धात्वर्थस्मरणात्, भग्नभिन्नकांस्यस्वनतुल्यघोषस्तथा सदोष इति विशेषणात् तथाविधविकृतस्वरादन्यत्र शुष्ककासेच कासशब्दोगौणः सार्षपस्नेहादौ तैलशब्दवत् ॥ ३ ॥

स वातपित्तप्रभवः कफाच्च क्षतात् तथान्यः क्षयजोऽपरश्च।
पञ्चप्रकारः कथितो भिषग्भिर्विवर्द्धितो यक्ष्मविकारकृत् स्यात् ॥४

भविष्यतस्तस्य तु कण्ठकण्डूर्भोज्योपरोधो गलतालुलेपः।
स्वशब्दवैषम्यमरोचकोऽग्निसादश्च लिङ्गानि भवन्त्यमूनि ॥ ५

हृच्छङ्खमूर्द्धोदरपार्श्वशूली क्षामाननः क्षीणबलस्वरौजाः।
प्रसक्तवेगश्च समीरणेन कासेत् तु शुष्कं स्वरभेदयुक्तम् ॥
उरोविदाहज्वरवक्त्रशोषैरभ्यर्द्दितस्तिक्तमुखस्तृषार्त्तः।
पित्तेन पीतानि वमेत् कटूनि कासेत् स पाण्डुः परिदह्यमानः॥
विलिप्यमानेन मुखेन सीदन् शिरोरुजार्त्तः कफपूर्णदेहः।
अभक्तरुग्गौरवसादयुक्तः कासेद्भृशं सान्द्रकफः कफेन ॥ ६ ॥
वक्षोऽतिमात्रं विहतञ्च यस्य व्यायामभाराध्ययनाभिघातैः।
विश्लिष्टवक्षाः स नरः सरक्तं ष्ठीवत्यभीक्ष्णं क्षतजः स उक्तः ॥

अतिव्यवायभाराध्वयुद्धाश्वगजविग्रहैः।
रूक्षस्योरः क्षतं वायुर्गृहीत्वा कासमावहेत् ॥

स इति। यक्ष्माइवविकारो यक्ष्मविकारः क्षयकरत्वदुःसाध्यत्वसाधर्म्म्यात् क्षयसमाख्यःकास इति तात्पर्य्यम्। इदमत्रावधेयम् स च विवर्द्धितो वातादिनिमित्तजः कासः क्षयकृत् भूत्वा स्वयंनिवर्त्तत इति पश्यन्तो भिषजः क्षयाय परिणमन्तइत्याहुः। तन्त्रान्तरे कासं प्रकृत्यामनन्ति हि। "क्षयायोपेक्षिताः सर्व्वे" इति उपेक्षिता उपेक्षणात् विवर्द्धिताः सन्तः सर्व्वे ते कासाः क्षयाय प्रवर्त्तन्तइत्युपलभ्यात् क्षयरूपेण परिणमन्त इति तत्र निष्कर्षः। न च तावत् कासनिचयः स क्षयकृत् भूत्वा निवर्त्तत इत्यनुपपन्नम् स्मरन्ति हि "कश्चिद्धि रोगो रोगस्य हेतुर्भूत्वा प्रशाम्यति" इति ॥ ४ ॥

भविष्यत इति। भोज्यानां गलेसङ्गो भोज्योपरोधः। गलतालुलेपः श्लेष्मणेतिशेषः। स्वशब्दवैषम्यम् आत्मनः स्वरवैलक्षण्यम्। अत्रशब्दवैषम्य-

स पूर्व्वं कासते शुष्कं ततः ष्ठीवेत् सशोणितम् ।
कण्ठेन रुजताऽत्यर्थं विभिन्नेनेव चोरसा ॥
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना ।
दुःखस्पर्शेन शूलेन भेदपीड़ाभितापिना ॥
पर्व्वभेदज्वरश्वास-तृष्णावैस्वर्य्यपीड़ितः ।
पारावत इवाकूजन् कासवेगात् क्षतोद्भवात् ॥ ७ ॥
विषमासात्म्यभोज्यातिव्यवायाद् वेगनिग्रहात् ।
घृणिनां शोचतां नृणां व्यापन्नेऽग्नौ त्रयो मलाः ।
कुपिताः क्षयजं कासं कुर्य्युर्देहक्षयप्रदम् ॥
स गात्रशूलज्वरदाहमोहान् प्राणक्षयञ्चोपलभेत कासी ।
शुष्यन् विनिष्ठीवति दुर्व्वलस्तु प्रक्षीणमांसो रुधिरं सपूयम् ॥
तं सर्व्वलिङ्गं भृशदुश्चिकित्स्यं चिकित्सितज्ञाः क्षयजं वदन्ति ॥८॥
वृद्धत्वमासाद्य भवत्यथो वै याप्यं तमाहुर्भिषजस्तु कासम् ॥९॥
शृङ्गीवचाकट्फलकत्तृणाब्दधान्याभयाभार्ग्यमराह्वविश्वम् ।
उष्णाम्बुना हिङ्गुयुतन्तु पीत्वा वह्वास्यमप्याशु जहाति कासम् ॥

मिति सिद्धे खशब्दः करकङ्कणन्यायात् झटित्यवबोधार्थः । क्षदित्यादि । कासे-दिति परस्मैपदमार्षम् केचित्तु कासइवाचरे दित्येवं व्याहर्त्तुं "सर्व्वप्रातिपदिकेभ्यः क्विप् वा वक्तव्यः" इति वार्त्तिकमवलम्बन्ते । एतेन शेषं व्याख्यातम् ॥ ५—८ ॥

स्वाविर्य्यमूलं कासमधिकरोति वृद्धत्वमिति । व्याधयोहिप्रायेण कालप्रकर्षात् याप्यत्वं प्राप्नुवन्त्ययन्तूत्पत्त्यनन्तरमेवेत्यावेदयितुमत्राथोशब्दं प्रायुङ्क्त वै शब्दस्त्ववधारयितुमित्यूनेयम्, तदयमर्थः । वृद्धत्वम् "असति बाधे सर्व्वं वाक्यं सावधारणम्" इति स्मरणात् वृद्धत्वमेवासाद्य यः कासो भवति तन्तु कासमथोवै उत्पत्त्यनन्तरमेव भिषजोयाप्यमाहुः ॥ ९ ॥

फलत्रिकव्योषविडङ्गशृङ्गीरास्नावचापद्मकदेवकाष्ठैः ।
लेहः समैः क्षौद्रसिताघृताक्तः कासं निहन्यादचिरात्सुदीर्घम् ॥
पथ्यां सितामामलकानि लाजां समागधीश्चापि विचूर्ण्य शुण्ठीम् ।
खादेत् गुड़ं नागरपिप्पलीभ्यां द्राक्षाञ्च सर्पिर्मधुनावलिह्यात् ।
द्राक्षां सितां मागधिकाश्च तुल्यां सशृङ्गवेरं मधुकं तुगाञ्च ॥१०॥
लिह्याद्घृतक्षौद्रयुतां समांशां सितोपलां वा मरिचांशयुक्ताम् ।
धात्रीकणाविश्वसितोपलाश्च संचूर्ण्य मण्डेन पिबेच्च दध्नः ॥११॥
हरेणुकां मागधिकाश्च तुल्यां दध्ना पिबेत् कासगदाभिभूतः ॥
उभे हरिद्रे सुरदारु शुण्ठीं गायत्रिसारञ्च पिबेत् समांशम् ॥
बस्तस्य मूत्रेण सुखाम्बुना वा दन्तीं द्रवन्तीञ्च सतिल्वकाशाम् ।
भृष्टानि सर्पिष्यथ बादराणि खादेत् पलाशानि ससैन्धवानि ।
कोलप्रमाणं प्रपिबेद्धि हिङ्गु सौवीरकेणाम्लरसेन वापि॥ १२ ॥
क्षौद्रेण लिह्यान्मरिचानि वापि भार्गीवचाहिङ्गुकृता च वर्त्तिः ।
धूमे प्रशस्ता घृतसंप्रयुक्ता वेणुत्वगेलालवणैः कृता च ॥१३॥
सर्पिर्मधुभ्यां विलिहीत कासी ससैन्धवां कोष्णजलेन कृष्णाम् ॥

प्रतीकारक्रममुपदिदिक्षति शृङ्गीति । कत्तृणं गन्धतृणम् । बद्धास्यमिति बद्धा आस्या आसना येन तं तथोक्तं येन कासेनोपविश्याऽपि शान्तिं नाप्नुवन्ति तमपीति यावत् । पादचतुष्केन चत्वारोयोगा उपदिश्यन्ते खादेदित्यादिना । अन्त्ये पादद्वितयेच पूर्व्वस्मात्सर्पिर्मधुनावलिह्यादित्याकृष्यान्वेयम् ॥ १० ॥

हरेणुकामिति । गायत्रिसारः खदिरसारः । अत्र "क्षापो" पासू ६।३।६३। ह्रस्वः । तिल्वकोलोध्रः । भृष्टानीति । वातकासे सद्यः फलोऽयं योगः । पलाशानि पत्राणि । कोलेति । कर्षार्द्धापरपर्य्यायोऽयं कोलशब्दः,

मुस्तेङ्गुदीत्वङ्मधुकाद्गमांसीमनःशिलालेभ्कगलाम्बुपिष्टैः ।
विधाय वर्त्तीः सपयोऽनुपानं धूमं पिवेद्वातवलासकासी ॥
पिवेच्च सौधुं मरिचान्वितं वा तेनाशु कासं शममभ्युपैति ॥१४॥
द्राचाम्बुमञ्जिष्ठपुराह्वयाभिः चीरं शृतं माचिकसंप्रयुक्तम् ।
निदिग्धिकानागरपिप्पलीभिः खादेच्च मुद्गान् मधुना सुसिद्वान्॥१५
उत्कारिकां सर्पिषि नागराभ्यां पक्वा समूलैस्त्रुटिकोलपत्रैः ।
एभिर्निषेवेत कृताच्च पेयां तन्वीं सुशीतां मधुना विमिश्राम् ॥१६
यत् प्रोक्तं सर्पिर्विहितं षड़ङ्गं तद्वातकासं जयति प्रसह्य ।
विदारिगन्धादिकृतं घृतं वा रसेन वा वासकजेन पक्वम् ॥
विरेचनं स्नैहिकमत्र चोक्तमास्थापनञ्चाप्यनुवासनञ्च ।
धूमं पिवेत् स्नैहिकमप्रमत्तः पिवेत् सुखोष्णां घृतमेव चात्र ॥

तत्प्रमाणं हिङ्गु समं विभज्याष्टकत्वो रात्रिन्दिवं वलवत्समातुरं पाययेदित्युपदेशः । नोपदेशोऽयमनुपपन्नः "माषिकं हिङ्गु सिन्धूत्थम्" इति स्मरणात् ॥११—१३॥

द्राचेत्यादि । अम्बु ह्रीवेरम् पुरोगुग्गुलुः । द्राचाद्या आह्वया नामानि यासां ताभिर्द्राचाम्बुमञ्जिष्ठपुराह्वयाभिरोषधीभिरितिशेषः । निदिग्धिकेत्यादि । निदिग्धिकादिभिः सुसिद्धान् मुद्गान् मधुना खादेदित्यन्वयः । अत्रमुद्गैःसहत्वे मुद्गयूषोमधुना सह पेयइत्युपदेशः ॥ १५ ॥

उत्कारिका मिति । उत्कारिका सूक्ष्मपिष्टःकल्कः । मूलशब्देनेह पिप्पलीमूलमेवाभिप्रेयते साधारणशब्दविशेषादौपयौगिकत्वात् "मूलं पिप्पलीमूले स्यात्" इति कोषान्तरदर्शनाच्च । त्रुटिः सूक्ष्मैला । खादेति पूर्व्वेणान्वयः । उक्तेनोत्कारिकाद्रव्येण पक्वा अल्पसिक्थां तण्डुलपेयां पाययितुं नियुङ्क्ते एभिरिति । यदिति । षड़ङ्गं षट्पलकम् । विरेचनमिति । प्राक् कासे निषिद्धे अप्यास्थापनानुवासने वातकासाधिकारात् दोषप्रत्यनीकत्वेनोपयुङ्क्ते

हिता यवाग्वश्च रसेषु सिद्धाः पयांसि लेहाः सघृतास्तथैव ।
प्रच्छर्द्दनं कायशिरोविरेकास्तथैव धूमाः कवलग्रहाश्च ॥१७॥
उष्णाश्च लेहाः कटुका निहन्युः कफं विशेषेण विशोषणं वा ॥
कटुत्रिकस्यापि वदन्ति पथ्यं घृतं कृमिघ्नस्वरसे विपक्वम् ।
निर्गुण्डिपत्रस्वरसे च पक्वं सर्पिः कफोत्थं विनिहन्ति कासम् ॥१८
पाठा-विड्-व्योष-विडङ्ग-सिन्धु-त्रिकण्ट-रास्ना-हुतभुग्बलाभिः ।
शृङ्गी-वचा-म्बोधर-देवदारु-दुरालभा-भार्ग्यभया-शटीभिः ।
सम्यग्विपक्वं द्विगुणेन सर्पिर्निर्दिग्धिकायाः स्वरसेन चैतत् ॥
श्वासाग्निसादस्वरभेदभिन्नान् निहन्त्युदीर्णानपि पञ्च कासान् ॥१९
विदारिगन्धोत्पलसारिवादीन् निःक्वाथ्य वर्गान् मधुकञ्च कृत्स्नम्॥
घृतं पचेदिक्षुरसाम्बुदुग्धैः काकोलिवर्गे च सशर्करं तत् ।
प्रातः पिबेत् पित्तकृते च कासे रतिप्रसूते क्षयजे च कासे ॥२०॥

इत्यनुसन्धेयम्। स्नेहिकधूमविधिस्तु "चि० ४० अ०" अनुसन्धायाध्यवसितव्यम्। रसेषु छागमांसभवेष्विति यावत् ॥ १६—१७ ॥

उष्णा इति। उष्णा उष्णवीर्य्या कटुकाः कटुरसाः। अत्र उष्णग्रहणेनैव कटुकानामुपलब्धेऽपि पृथगुपादानं सद्यः प्रत्ययकारकत्वमाख्यातुम्। विशोषणं लङ्घनं लघुभोजनादिकञ्चेत्यर्थः। पाठेत्यादौ त्रिकण्ट स्त्रिकण्टकः। हुतभुक् चित्रकम्। अम्बोधरो मुस्तकम् ॥ १८– १९ ॥

विदारीत्यादि। इहोक्ताः काकोल्यादिवर्गसहिता विदारिगन्धाद्यास्त्रयो गणाः "सू० ३८ अ०" मधुरोवर्गश्च "सू० ४२ अ०" निवेदिताः। काकोलिवर्गे काकोलिवर्गक्वाथे इत्यर्थः। अत्र पाकात्परं घृततुरीयांशेन शर्करा मिश्रीकृत्य यथा मात्रं पिबेदित्युपदेशः। रतिप्रसूत इति रतिशब्दः क्षयहेतूनामुपलक्षणम् तथाच क्षयसमाख्ये इत्यर्थनिष्कर्षः ॥ २० ॥

खर्ज्जूरभार्गीमगधापियालमधूलीकैलामलकैः समांशैः।
चूर्णं सिताक्षौद्रघृतप्रगाढ़ं क्षीन् हन्ति कासानुपयुज्यमानम् ॥
रक्तां हरिद्राञ्जनवह्निपाठामूर्व्वोपकुल्या विलिहेत् समांशाः।
क्षौद्रेण कासे क्षतजे क्षयोत्थे पिवेद् घृतञ्चेक्षुरसे विपक्कम् ॥
चूर्णं पिवेच्चामलकस्य वापि क्षीरेण पक्कं सघृतं हिताशी ॥
चूर्णानि गोधूमयवोद्भवानि काकालिवर्गस्य कृतः सुसूक्ष्मः।
कासेषु पेयस्त्रिषु कासवद्भिः क्षीरेण सक्षौद्रघृतेन वापि ॥ २१॥
गुड़ोदकं वा क्वथितं पिवेद्धि क्षौद्रेण शीतं मरिचोपदंशम् ॥२२॥
प्रस्थत्रयेणामलकीरसस्य शुद्धस्य दत्त्वार्द्धतुलां गुड़स्य।
चूर्णीकृतैर्ग्रन्थिक-चव्य-जीर-व्योषेभकृष्णा-हवुषाजमोदैः ॥
विड़ङ्ग-सिन्धु-त्रिफला-यमानी-पाठाग्निधान्यैश्च पिचुप्रमाणैः।
दत्त्वा त्रिवृच्चूर्णपलानि चाष्टावष्टौ च तैलस्य पचेद् यथावत् ॥
तं भक्षयेदक्षफलप्रमाणं यथेष्टचेष्टं त्रिसुगन्धियुक्तम्।
अनेन सर्व्वे ग्रहणीविकाराः सश्वासकासस्वरभेदशोथाः ॥
शाम्यन्ति चायं चिरमन्तरग्नेर्हतस्य पुंस्त्वस्य च वृद्धिहेतुः।
स्त्रीणाञ्च वन्ध्यामयनाशनः स्यात् कल्याणको नाम गुड़ः प्रतीतः॥२३

खर्ज्जूरेति। मधूलिका मूर्व्वा। रक्तेत्यादि। रक्तामञ्जिष्ठा, विलिहेदितिच्छान्दसः विलिह्यादित्यर्थः। चूर्णानीति। तत्र कासवद्भिरिति भूम्निमतुप् तथाच येषां कासः प्रचुरतरस्तैरेव त्रिषु कासेषु पेयइत्यर्थः। एवञ्च विशेषणमिदं भेषजस्यचास्य प्रशस्तत्वं सूचयत्यापयतीति प्रत्येतव्यम् कासत्रितयेषु पयोगात् ॥२१—२२॥
प्रस्थेति। तिलम्बुलमत्र तैलेमनाक् भृष्ट्वा चूर्णीकृत्यप्रक्षिपन्ति प्राञ्चः।

द्विपञ्चमूलेभकणात्मगुप्ताभार्गीशठीपुष्करमूलविश्वान्।
पाठामृताग्रन्थिकशङ्खपुष्पीरास्नाग्न्यपामार्गबलायवासान्॥
द्विपालिकांशांश्च यवाढकञ्च हरीतकीनाञ्च शतं गुरूणाम्॥
द्रोणे जलस्याढकसंयुते च क्वाथे कृते पूतचतुर्थभागे॥
पचेत् तुलां शुद्धगुड़स्य दत्त्वा पृथक् च तैलात् कुड़वं घृताच्च।
चूर्णाच्च तावन्मगधोद्भवाया देयञ्च तस्मिन् मधु सिद्धशीते॥
रसायनात् कर्षमतो विलिह्यादद्याद्द्वे चाभये नित्यमथाशु हन्यात्।
तद्राजयक्ष्मग्रहणीप्रदोषशोफाग्निमान्द्यस्वरभेदकासान्॥
पाण्ड्वामयश्वासशिरोविकारान् हृद्रोगहिक्काविषमज्वरांश्च।
मेधाबलोत्साहमतिप्रदञ्च चकार चैतद् भगवानगस्त्यः॥ २४॥
कुलीरशृङ्गीचटकैणलावान् निःक्वाथ्य वर्गैर्मधुरैस्तथान्यैः।
पचेद् घृतं तत् तु निषेव्यमाणं हन्यात् क्षतोत्थं क्षयजंच कासम्।
शतावरीनागबलाबलाभिर्घृतं विधेयञ्च हिताय कासिनाम्॥२५॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे कासप्रतिषेधो
नाम द्विपञ्चाशोऽध्यायः॥ ५२॥

द्विपञ्चेति। ग्रन्थिकं पिप्पलीमूलम् शङ्खपुष्पी शङ्खाह्वी व्यवहारस्तु "ढोलकलमी" इति प्रसिद्धाया लताया एव। अग्निश्चित्रकः। द्विपालिकांशांश्चेति पाठेतु न्यस्य चिह्न। एकीकृत्येति तात्पर्य्यम् गुरूणामिति "वोतो गुणवचनात्" इति पा० सू० ४।१।४४। ङीष् प्रतिपक्षे रूपम्। गुरूणां गुर्व्वीणां स्थूलानामिति यावत्। तावत् कुड़वप्रमाणम् चकारात् मध्वपि कुड़वप्रमाणमेवेति नेयम्। कुलीरेति। शृङ्गीपर्य्यायोऽयं शृङ्गीशब्दः। परिशिष्टमतिरोहितार्थम्।२३--२५॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
उत्तरतन्त्रे कासप्रतिषेधोनाम द्विपञ्चाशत्तमोऽध्यायः।

त्रिपञ्चाशोऽध्यायः ।

अथातः स्वरभेदप्रतिषेधमध्यायं व्याख्यास्यामः ॥ १ ॥

अत्युच्चभाषणविषाध्ययनाभिघात-
शीतादिभिः प्रकुपिताः पवनादयस्तु ।
ते शब्दवाहिधमनीषु गताः प्रतिष्ठां
हन्युः स्वरं भवति चापि हि षड्विधः सः ॥ २ ॥

वातेन कृष्णनयनाननमूत्रवर्च्चा
भिन्नं शनैर्वदति गर्द्दभवत् खरञ्च ।
पित्तेन पीतवदनाक्षिपुरीषमूत्रो
ब्रूयाद्गलेन च विदाहसमन्वितेन ॥
कृच्छ्रात् कफेन सततं कफरुद्धकण्ठो
मन्दं शनैर्वदति चापि दिवा विशेषात् ।
सर्व्वात्मके भवति सर्व्वविकारसम्प-
दव्यक्तता च वचसस्तमसाध्यमाहुः ॥ ३ ॥

परमतो निवेद्रयिष्यते हि "यः श्वासकासविधिरादित एव चोक्त स्तत्स्वाप्य-
शेषमवतारयितुं यतेत" इति तदिदानीं प्रायेण प्रतीकारसाम्यात् कासप्रति-
षेधादनन्तरं स्वरभेदप्रतिषेधमधिकरोति अथात इत्यादिना । १—३ ।

धूप्येत वाक्क्षयकृते क्षयमाप्नुयाच्च
वागेष वापि हतवाक् परिवर्ज्जनीयः ॥ ४ ॥
अन्तर्गतस्वरमलच्यपदं चिरेण
मेदोऽन्वयाद्वदति दिग्धगलौष्ठतालुः ॥ ५ ॥
क्षीणस्य वृद्धस्य कृशस्य चापि चिरोत्थितो यश्च सहोपजातः।
मेदस्विनः सर्व्वसमुद्भवश्च स्वरामयो यो न स सिद्धिमेति ॥ ६ ॥
स्निग्धान् स्वरातुरनरानपकृष्टदोषान्
संयोजयेद्वमनरेचनवस्तिभिश्च।
नस्यावपीड़मुखधावनधूमलेहैः
सम्पादयेच्च विविधैः कवलग्रहैश्च ॥ ७ ॥
यः श्वासकासविधिरादित एव चोक्त-
स्तञ्चाप्यशेषमवतारयितुं यतेत।
वैशेषिकञ्च विधिमूर्द्धमतो वदामि
तंवै स्वरातुरहितं निखिलं निबोध ॥ ८ ॥

धूप्येतेति। आद्योऽयं वाक्शब्द उपचारात् वागधिष्ठाने प्रवर्त्तेत इत्यवश्यं वक्तव्यं क्षयगामित्वेनोपदिष्टाया वाचोधूपितत्वानुपपत्तेः, तथाच वाग्धूप्येत विवक्षोवागधिष्ठानं क्षयनिमित्ततोनीरसत्वादग्निनेव सन्तप्यते। क्षयमाप्नुयाच्च पूर्व्वस्मादेव हेतोर्नापि च वाङ्निर्गच्छतीत्यर्थः। एष वापीति। वा शब्दोऽयम-धारणार्थो गर्हार्थश्चाऽपि शब्दः, तदयमर्थः, अप्येष हतवाक् नष्टवचनकः परिवर्ज्जनीय एव॥ ४—६ ॥

प्रतिकारक्रममुपदिदिक्षति स्निग्धानिति मुखधावनं गण्डूषः ॥ ७—८ ॥

स्वरोपघातेऽनिलजे भुक्तोपरि घृतं पिबेत् ॥ ९ ॥
कासमर्द्दक-वार्त्ताकी-मार्कवस्वरसे शृतम् ॥
पीतं घृतं हन्त्यनिलं सिद्धमार्त्तगले रसे ॥ १० ॥
यवक्षाराजमोदाभ्यां चित्रकामलकेषु वा ॥
देवदार्व्वग्निकाभ्यां वा सिद्धमाज्यं समाक्षिकम् ॥ ११ ॥
सुखोदकानुपानो वा ससर्पिष्को गुडौदनः ॥ १२ ॥
क्षीरानुपानं पित्ते तु पिबेत् सर्पिरतन्द्रितः।
अश्नीयाच्च ससर्पिष्कं यष्टीमधुकपायसम् ॥
लिह्यान्मधुरकाणां वा चूर्णं मधुघृताप्लुतम्।
शतावरीचूर्णयोगं बलाचूर्णमथापि वा ॥
पिबेत् कटूनि मूत्रेण कफजे स्वरसंक्षये।
लिह्याद्वा मधुतैलाभ्यां भुक्त्वा खादेत् कटूनि च ॥
स्वरोपघाते मेदोजे कफवद्विधिरिष्यते।
सर्व्वजे क्षयजे चापि प्रत्याख्यायाचरेत् क्रियाम् ॥

स्वरोपेति। कासमर्द्दको नामौषधिः "कालकासन्दो" इति विख्यायते। मार्कवो भृङ्गराजः। आर्त्तगलो नीलझिण्टी। अनिलमिति। अत्र स्वनिष्ठजनकता-निरूपितत्वसम्बन्धेन अनिलोऽस्यास्तीत्यकारो मत्वर्थीयः। तं तथोक्तम् अनिलम-निलजंस्वरभेदमिति निष्कर्षः ॥ ९—१० ॥

यवेति अत्र विभक्त्यन्तेन पदत्रितयेन त्रीणि सर्पींषि साध्यानीत्याहुः। अत्र घृतानुषङ्गादाजशब्दोऽयमाज्यं घृतमेव लक्षयतीति नेयम्। सुखोदकेति। विधि-रयमनिलज इत्येव ॥ ११—१२ ॥

पित्तजस्वरभेदप्रतिकार मधिकरोति क्षीरेति। यष्टीमधुकसंयुक्तः पायसः

शर्करामधुमिश्राणि शृतानि मधुरैः सह ।
पिबेत् पयांसि यस्योच्चैर्वदतोऽभिहतः स्वरः ॥ १३ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे स्वरभेदप्रतिषेधो
नाम त्रिपञ्चाशोऽध्यायः ॥ ५१ ॥

यष्टीमधुकपायसः स्निग्धादिति। मधुरको वर्गः सू ४२ अं उपदिष्टः। परिशिष्टमति-रोहितार्थम् ॥ १३ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्ति विरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
उत्तरतन्त्रे स्वरभेदप्रतिषेधो नाम त्रिपञ्चाशत्तमोऽध्यायः ।

चतुःपञ्चाशोऽध्यायः ।

अथातः क्रिमिरोगप्रतिषेधमध्यायं व्याख्यास्यामः ॥ १ ॥

अजीर्णाध्यशनासात्म्यैर्विरुद्धमलिनाशनैः ।
अव्यायामदिवास्वप्न-गुर्व्वतिस्निग्धशीतलैः ॥
माषपिष्टान्नविदल-विसशालूकसेरुकैः ।
पर्णशाकसुराशुक्त-दधिक्षीरगुड़ेक्षुभिः ॥
पललानूपपिशित-पिण्याकपृथुकादिभिः ।
स्वाद्वम्लद्रवपानैश्च श्लेष्मा पित्तञ्च कुप्यति ॥
क्रिमीन् बहुविधाकारान् करोति विविधाश्रयान् ॥ २ ॥
आमपक्वाशये तेषां कफविड्जन्मनां पुनः ।
धमन्यां रक्तजानाञ्च प्रसवः प्रायशः स्मृतः ॥ ३ ॥

अथो च्छर्द्दिप्रतिषेधादनन्तरं व्याहर्त्तव्यमर्थमेकं हित्वा सुदूरमागतोऽस्मि कथाप्रसङ्गेन, आस्तां तावदिदानीं तमेवार्थं प्रवर्त्तयिष्याम इत्यभिसन्धाय क्रिमिप्रतिषेधमधिकरोति अथात इत्यादिना ॥ १ ॥

अजीर्णेति । शालु शालूकम् कशेरुर्नामौषधिः "केशुर" इति प्रथते । पललमत्र तिलकल्कः । पिण्याकस्तु प्रपीड़िततया निःस्नेहस्तिलकल्कः "खइल" इति परिचीयते ॥ २ ॥

क्रिमीणां तेषामुत्पत्तिस्थानं निवेदयति आमेति । धमनीशब्दोऽयं रक्तवहामेव धमनीं लक्षयतीति नेयम्, रक्तजक्रिमियोनित्वात् "शोणितजानाम्"

विंशतेः क्रमिजातीनां त्रिविधः सम्भवः स्मृतः ।
पुरीषकफरक्तानि तेषां वक्ष्यामि लक्षणम् ॥
अजवा विजवाः किप्याश्चिप्या गण्डूपदास्तथा ।
चूरवो द्विमुखाश्चैव सप्तैवैते पुरीषजाः ॥
श्वेताः सूक्ष्मास्तुदन्तीते गुदं प्रति सरन्ति च ।
तेषामेवापरे पुच्छैः पृथवश्च भवन्ति हि ॥
शूलाग्निमान्द्यपाण्डुत्व-विष्टम्भबलसंचयाः ।
प्रसेकारुचिहृद्रोग-विड्भेदास्तु पुरीषजैः ॥
रक्ता गण्डूपदा दीर्घा गुदकण्डूनिपातिनः ।
शूलाटोपशकृद्भेद-पक्तिनाशकराश्च ते ॥ ४ ॥

इत्युपक्रम्याचार्येण विमाने सप्तमाध्याये "स्थानं रक्तवाहिन्यो धमन्यः" इत्युक्तेश्च। अत्र प्रायश इत्यनेन सिरादीनामादेशः, उक्तश्च वाग्भटेन "रक्तवाहिसिरोत्थाना रक्तजा जन्तवः" इति। प्रसव उत्पत्तिरित्यनर्थान्तरम्। केचिदत्र "आमपक्वाशये तेषां प्रसवः प्रायशः स्मृतः" इत्येवमाद्यन्तपादावेव सम्यक् पर्य्याप्तश्च विज्ञाय व्याहर्त्तुं बहुधा प्रलपन्तो देवानांप्रिया इव कथं नापत्रपेरन् ॥ ३ ॥

उपादानकारणपुरःसरं विस्तरशः क्रिमीन् निवेदयितुं प्रतिजानीते विंशतेरिति। सम्भवत्यस्मादिति सम्भवः, प्रकृतमनुसरति अजवा इति। अजवादयः पुरीषजानां क्रिमीणां नामधेयानि। एष्वजवा अन्त्राण्यदन्तीतिव्युत्पत्त्या अन्त्रादाः विजवाश्च उदरमावेष्ट्य तिष्ठन्तीति व्युत्पत्त्या उदरावेष्टा उच्यन्ते इति तु परम्परोपदेशः। किप्याश्चिप्याश्च विजिज्ञासितव्याः। गण्डूपदाः किञ्चुलुका स्तत्साम्यात् गण्डूपदा उच्यन्ते। चूरवः प्रथुलाः दीर्घाश्च। श्वेता इति। गुदं प्रति गुदं लक्षीकृत्येत्यर्थः। रक्ता इति। गुदकण्डूर्निपातयितुमुपस्थापयितुं शीलमेषामिति गुदकण्डूनिपातिनः, न च तावत् निपततेरेवमर्थोऽप्रसिद्धः। "सकृदंशो निपतति" तथा "मरणव्याधिशोकानां किमद्य निपतिष्यति" इति मन्वाद्युक्तौ तदर्थे प्रयोगदर्शनात्। तथाच गुदकण्डूजनना इति निष्कर्षः॥ ४ ॥

दर्भपुष्पा महापुष्पाः प्रलूनाश्चिपिटास्तथा ।
पिपीलिका दारुणाश्च कफकोपसमुद्भवाः ॥
रोमशा रोममूर्द्धानः सपुच्छाः श्यावमण्डलाः ।
रूढ़धान्याङ्कुराकाराः शुक्लास्ते तनवस्तथा ॥
मज्जादा नेत्रलेढ़ारस्तालुश्रोत्रभुजस्तथा ।
शिरोहृद्रोगवमथु-प्रतिश्यायकराश्च ते ॥ ५ ॥
केशरोमनखादाश्च दन्तादाः किक्किशास्तथा ।
कुष्ठजाश्च परीसर्पा ज्ञेयाः शोणितसम्भवाः ॥
ते सरक्ताश्च कृष्णाश्च स्निग्धाश्च पृथवस्तथा ।
रक्ताधिष्ठानजान् प्रायो विकारान् जनयन्ति ते ॥ ६ ॥
माषपिष्टान्नलवण-गुड़शाकैः पुरीषजाः ।
मांसमाषगुड़क्षीर-दधितैलैः कफोद्भवाः ।
विरुद्धाजीर्णशाकाद्यैः शोणितोत्था भवन्ति हि ॥
ज्वरो विवर्णता शूलं हृद्रोगः सदनं भ्रमः ।
भक्तद्वेषोऽतिसारश्च सञ्जातक्रिमिलक्षणम् ॥ ७ ॥

दर्भेति। महापुष्पा अपराजितालता तत्सादृश्यात् क्रिमयस्त्वेते महापुष्पाः कथ्यन्ते। अन्तरान्तरा छिन्ना इवेति प्रलूना। चिपिटः पृथुका तदाकृतयश्चिपिटाः दारुणा गोमयकीटाकृतयो दृढ़शिरसः एते तु प्रायः शिरसि जाता शिरोरोगं जनयन्तीति बहुकृत्वोऽपश्याम। कफजानेतान् विशिनष्टि रोमशा इति। तनवः कृशाः, सूत्राकारा इति यावत् ॥ ५ ॥

केशेति। किक्किशा उडुम्बरबीजसदृशाः। परि सर्व्वतः सरन्तीति परीसर्पाः। ते तु पुनः सूक्ष्मा यूका इव लक्ष्यन्त इत्याहुः प्राञ्चः ॥ ६ ॥

दृश्या इति। अदृश्यास्तु सौक्ष्म्यादित्यभिसन्धिः। द्वावाद्यौ अजव-विजव-

इत्यष्टास्त्रयोदशाद्यास्तु क्रिमीणां परिकीर्त्तिताः।
केशादाद्यास्तु इत्यष्टास्ते द्वावाद्यौ परिवर्ज्जयेत् ॥ ८ ॥
एषामन्यतमं ज्ञात्वा जिघांसुः स्निग्धमातुरम्।
सुरसादिविपक्वेन सर्पिषा वान्तमादितः।
विरेचयेत् तीक्ष्णतरैर्योगैरास्थापयेच्च तम् ॥
यवकोलकुलत्थानां सुरसादेर्गणस्य च।
विडङ्गस्नेहयुक्तेन क्वाथेन लवणेन च ॥
प्रत्यागते निरूहे तु नरं स्नातं सुखाम्बुना।
भुञ्जात् क्रिमिघ्नैरशनैस्ततः शीघ्रं भिषग्वरः ॥
स्नेहेनोक्तेन चैनन्तु योजयेत् स्नेहवस्तिना।
ततः शिरीषकिणिहीरसं क्षौद्रयुतं पिबेत् ॥
केवूकस्वरसं वापि पूर्व्ववत् तीक्ष्णभोजनः।
पलाशवीजस्वरसं कल्कं वा तण्डुलाम्बुना ॥
पारिभद्रकपत्राणां क्षौद्रेण स्वरसं पिबेत्।
पत्तूरस्वरसं वापि पिबेद्वा सुरसादिजम् ॥

समाख्याविल्यर्थः। केचित्तु "असाध्यौ द्वौ तु विज्ञेयौ रोमकेशादसञ्ज्ञितौ" इत्याहुः। तत्तु न सम्यक्, तयोरिन्द्रलुप्तप्रतिकारेणैवोपशमदर्शनात्। वक्ष्यति च "इन्द्रलुप्तविधिश्चापि विधेयो रोमभोजिषु" इति ॥ ७—८ ॥

प्रतीकारक्रममुपदिदिक्षति एषामिति। यवेति। लवणेन संसृष्टं लवणं, लवणाल्लुक् इति पां सू ४।४।२४ तद्धितलुक्। तेन तथोक्तेन। तत इति। किणिही अपामार्गः। केवूको नाम ओषधिः "केउ" इति परिचीयते। पत्तूरं रक्तचन्दनम्। तस्य पत्रमत्रादेयं, तदभावे छष्टं रक्तचन्दनमेव ग्राहयन्ति कुशलाः।

लिह्यादश्वशकृच्चूर्णं विडङ्गं वा समाक्षिकम् ॥ ९ ॥
पत्रैर्मूषिकपर्ण्या वा सुपिष्टैः पिष्टमिश्रितैः ॥
खादेत् पूपालिकान् पक्वान् धान्याम्लञ्च पिबेदनु ।
सुरसादिगणे तैलं पक्वं वा पानमिष्यते ॥
विडङ्गचूर्णपिष्टाभ्यां तस्मिन् भक्ष्यन्तु कारयेत् ।
तत्कषायप्रपीतानां तिलानां स्नेहमेव वा ॥
श्वाविधः शकृतश्चूर्णं सप्तकृत्वः सुभावितम् ।
विडङ्गानां कषायेण त्रैफलेन तथैव च ॥
क्षौद्रेण लीढ्वानु पिबेद्रसमामलकोद्भवम् ।
अक्षाभयारसस्यापि विधिरेषोऽयसामपि ॥
पूतीकस्वरसं वापि पिबेद्वा मधुना सह ।
पिबेद्वा पिप्पलीमूलमजामूत्रेण संयुतम् ॥
सप्तरात्रं पिबेद्घृष्टं त्रपु वा दधिमस्तुना ।
पुरीषजान् कफोत्थांश्च हन्यादेवं क्रमीन् भिषक् ॥ १० ॥
शिरोहृद्घ्राणवक्त्राक्षिसंश्रितांश्च पृथग्विधान् ।
विशेषेणाञ्जनैर्नस्यैरवपीडैश्च साधयेत् ॥

सुरसादिजं यथालाभं सुरसादिगणस्वरसम्, अभावे क्वाथचूर्णकल्कादीनपि ग्राहयन्तिभिषजो वृद्धिमन्तः ॥ ९ ॥

पत्रैरिति । मूषिकपर्णी आखुपर्णी "इन्दुरकानी" इति "थानकुनी" इति च प्रथते। पिष्टमत्र यवचूर्णम्। तत्कषायेति । अत्र तदिति तदा पूर्व्वस्मात् सुरसादिगणे इति पदं विभक्तिव्यत्ययाद्याविसेनाकृष्यान्वेयम्। श्वाविधाम पशुः "सजारु" इति परिचीयते। अक्षं विभीतकफलम्। पूतीको "नाटा" करञ्जः। त्रपु

शकृद्रसं तुरङ्गस्य सुशुष्कं भावयेदिति ।
निःक्वाथेन विडङ्गानां चूर्णं प्रधमनन्तु तत् ॥
अयश्चूर्णान्यनेनैव विधिना योजयेद् भिषक् ।
सकांस्यनीलं तैलञ्च नस्यं स्यात् सुरसादिके ॥
इन्द्रलुप्तविधिश्चापि विधेयो रोमभोजिषु ॥ ११ ॥
दन्तादानां समुद्दिष्टं विधानं मुखरोगिकम् ॥
रक्तजानां समुद्दिष्टं कुर्य्यात् कुष्ठचिकित्सितं ।
सुरसादिन्तु सर्व्वेषु सर्व्वथैवोपयोजयेत् ॥
प्रव्यक्तातिक्तकटुकं भोजनञ्च हितं भवेत् ॥
कुलत्थक्वाथसंसृष्टं क्षीरपानञ्च पूजितम् ॥ १२ ॥
क्षीराणि मांसानि घृतानि चैव दधीनि शाकानि च पर्णवन्ति ।
समासतोऽम्लान् मधुरान् हिमांश्च क्रमीन जिघांसुः परिवर्ज्जयेत् तु॥१३

इति सुश्रुतसंहितायामुत्तरतन्त्रे क्रिमिरोगप्रतिषेधो नाम
चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥

सीसकम् । सकृदिति । प्रधमनं शिर आदिस्थितेषु क्रिमिष्विति नेयम् । इन्द्रेति । अत्र रोमग्रहणेनैव केशस्याप्यादेशः सजातीयत्वात् । परिशिष्टं निगदव्याख्यातम् ॥ १०—१३ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे क्रिमिरोगप्रतिषेधोनाम चतुःपञ्चाशत्तमोऽध्यायः ।

पञ्चपञ्चाशोऽध्यायः ।

अथात उदावर्त्तप्रतिषेधमध्यायं व्याख्यास्यामः ॥ १ ॥

अधश्चोर्द्ध्वञ्च भावानां प्रवृत्तानां स्वभावतः ।
न वेगान् धारयेत् प्राज्ञो वातादीनां जिजीविषुः ॥ २ ॥

वातविण्मूत्रजृम्भाश्रु-क्षवोद्गारवमीन्द्रियैः ।
व्याहन्यमानैरुदितैरुदावर्त्तो निरुच्यते ॥
क्षुत्तृष्णाश्वासनिद्राणामुदावर्त्तो विधारणात् ।
तस्याभिधास्ये व्यासेन लक्षणञ्च चिकित्सितम् ॥ ३ ॥

प्राक् "न वेगान् धारयेत्" इति चिं २४ अं संक्षेपेणोक्तमर्थमिदानीमवसरवशात् प्रपञ्चेनोपदेष्टुमुदावर्त्तप्रतिषेधमधिकरोति अथात इत्यादिना ॥ १ ॥

अध इति । अधः प्रवृत्ता भावा, अधोवातादयः, ऊर्द्ध्वप्रवृत्ताश्चोद्गारादयः । भगवन् वेगधारणे का हानिर्भवति ? येनोक्तं "न वेगान् धारयेत्" इत्येव सार्द्ध-सूत्रमाकुर्व्वन् हेतूपदेशानुविद्धमुदावर्त्तशब्दं निर्व्वक्ति वातेति । उदूर्द्ध्वम् आ समन्ताद्वर्त्तत इत्युदावर्त्तः । इन्द्रियशब्देनेह जननेन्द्रियसम्बन्धिधमनीसमाश्रितत्वात् परमतस्थे-ते विकारा विहिताः तु शुक्रे इत्युक्तेः शुक्रमेव लक्षणीयम् । न चैतदत्रैवोक्तम्, वदन्ति हि "यदत्र सन्दिग्धं तच्छेषात् निर्णीयते" इति । नच तावदेभिरेवोदावर्त्ता जायन्ते इत्याह क्षुत्तृष्णेति । अत्र क्षुधादिजनितानामितेषामुदावर्त्तानामव्याशुप-देशात् प्रागुक्तानां वातादिजनितानां दुःसाध्यत्वमध्यवसितव्यम् । अन्यथा हेतुभेदेनाभिधानमपार्थकं स्यात् । तस्येत्यादि त्रयोदशविधस्याप्यस्य वातादीनां

त्रयोदशविधश्चासौ भिन्न एतैस्तु कारणैः ।
अपथ्यभोजनाच्चापि वक्ष्यते च तथापरः ॥ ४ ॥
आध्मानशूलौ हृदयोपरोधं शिरोरुजं श्वासमतीव हिक्काम् ।
कासप्रतिश्यायगलग्रहांश्च बलासपित्तप्रसरञ्च घोरम् ॥
कुर्य्यादपानोऽभिहतः स्वमार्गे हन्यात् पुरीषं मुखतः क्षिपेत् वा ॥ ५
आटोपशूलौ परिकर्त्तनञ्च सङ्गः पुरीषस्य तथोर्द्ध्ववातः ।
पुरीषमास्यादपि वा निरेति पुरीषवेगेऽभिहते नरस्य ॥ ६ ॥
मूत्रस्य वेगेऽभिहते नरस्तु कृच्छ्रेण मूत्रं कुरुतेऽल्पमल्पम् ।
मेढ्रे गुदे वङ्क्षणमुष्कयोश्च नाभिप्रदेशेष्वथवापि मूर्द्ध्नि ।
आनद्धवस्तेश्च भवन्ति तीव्राः शूलाश्च शूलैरिव भिन्नमूर्त्तेः ॥ ७ ॥

नवानां क्षुधादीनां पश्चानाञ्च वेगावरोधादित्येव। अपथ्येति। अपथ्यभोजनाच्चापरस्तु परमतो निवेदयिष्यते वायुः कोष्ठानुगो रूक्षैरित्यादिना ग्रन्थसन्दर्भेण ॥२—४॥

व्यावर्त्तुमभ्युपगतमर्थं क्रमशो निवेदयति आध्मानेत्यादिना। स्वमार्गे गुदेऽभिहतः प्रतिहतोऽपानो वायु राध्मानादीन् कुर्य्यात्, अयमाशयः, अभिहतो हि स वायुरूर्द्ध्वगो भूत्वा पित्तामाशयौ प्रथमं तावत् प्रपीडयति। तत्प्रपीडनाच्च यकृत्प्लीह-फुप्फुसहृदयगलशिरांसि प्रपीड्यन्ते। तत्रश्चाध्मानशूलादीनि प्रादुर्भवन्तीति सम्यगुक्तमाध्मानशूलाविति। यदा तु पुनः स वायुः पुरीषं निरुणद्धि ऊर्द्ध्वं वा निनीषति तदात्वे पुरीषप्रवर्त्तनाय सर्व्व एव प्रयत्नोऽपार्थको भवति मुखतो वा प्रवर्त्तते, तदिदमुक्तं हन्यादिति। क्रमप्राप्तं पुरीषनिमित्तमुदावर्त्तमधिकरोति आटोपेति। आटोपो नामोदरे "गुड़गुड़ा" शब्दानुविद्धो वेदनाविशेषः परिकर्त्तनञ्च गुदे कर्त्तनवद्वेदनानुभवः, वातोदावर्त्तः एते एव लिङ्गे निर्दिश्येते इत्यवधारय, चकारैश्च वातोदावर्त्तलिङ्गानामादेशात् ॥ ५—६ ॥

मूत्रजमुदावर्त्तमधिकरोति मूत्रस्येति। मूत्रनिग्रहैरायकृच्छ्र यथा यथा

मन्यागलस्तम्भशिरोविकारा जृम्भोपघातात् पवनात्मकाः स्युः।
श्रोत्राननघ्राणविलोचनोत्था भवन्ति तीव्राश्च तथा विकाराः ॥८॥
आनन्दजं शोकसमुद्भवं वा नेत्रोदकं प्राप्तममुञ्चतो हि।
शिरोगुरुत्वं नयनामयाश्च भवन्ति तीव्राः सह पीनसेन ॥ ९ ॥
भवन्ति गाढं क्षवथोर्विघाताच्छिरोऽक्षिनासाश्रवणेषु रोगाः।
कण्ठास्यपूर्णत्वमतीव तोदः कूजश्च वायोरथवा ऽप्रवृत्तिः ॥ १० ॥
उद्गारवेगेऽभिहते भवन्ति घोराविकाराः पवनप्रसूताः ॥ ११ ॥
छर्द्देर्विघातेन भवेच्च कुष्ठं येनैव दोषेण विदग्धमन्नं ॥ १२ ॥
मूत्राशये वा गुदमुष्कयोश्च शोफो रुजा मूत्रविनिग्रहश्च।
शुक्राश्मरी तत्स्रवणं भवेद्वा ते ते विकारा विहते तु शुक्रे ॥
तन्द्राङ्गमर्द्दावरुचिः श्रमश्च क्षुधोऽभिघातात् कृशता च दृष्टेः ॥ १३
कण्ठास्यशोषः श्रवणावरोधस्तृष्णाभिघाताद्धृदये व्यथा च ॥१४॥
श्रान्तस्य निश्वासविनिग्रहेण हृद्रोगमोहावथवापि गुल्मः।
जृम्भाङ्गमर्द्दोऽङ्गशिरोऽक्षिजाड्यं निद्राभिघातादथवापि तन्द्रा ॥१५

तृष्णार्द्दितं परिक्लिष्टं क्षीणं शूलैरभिद्रुतम्।
शकृद्वमन्तं मतिमानुदावर्त्तिनमुत्सृजेत् ॥ १६ ॥

तीव्रावेदना भवन्ति तथा तथैवाख्यापीत्यावेदयितुमिदमुच्यते शूलैरिव भिन्नमूर्त्तेरिति। छर्द्देरिति। येन दोषेण छर्द्दिवेगविघातेन अन्नं विदग्धं भवेदितिशेषः। ॥ ७—१२ ॥

इन्द्रियप्रकोपदिष्टशुक्रनिमित्तजमुदावर्त्तं आचष्टे मूत्राशये इति। विहते शुक्रे निर्गच्छत्शुक्रावरोध इत्यर्थः। ॥ १३—१६ ॥

सर्व्वेष्वेतेषु विधिवदुदावर्त्तेषु कृत्स्नशः।
वायोः क्रिया विधातव्या स्वमार्गप्रतिपत्तये॥
सामान्यतः पृथक्त्वेन क्रियां भूयो निबोध मे॥ १७॥
आस्थापनं मारुतजे स्निग्धे स्विन्ने विशिष्यते।
पुरीषजे तु कर्त्तव्यो विधिरानाहिको भवेत्॥ १८॥
सौवर्च्चलाढ्यां मदिरां मूत्रे त्वभिहते पिबेत्।
एलामप्यथ मद्येन चीरं वापि पिबेन्नरः॥
धात्रीफलानां स्वरसं सजलं वा पिबेत् त्र्यहम्।
रसमश्वपुरीषस्य गर्द्दभस्याथवा पिबेत्॥
मांसोपदंशं मधु वा पिबेद्वा सीधु गौड़िकम्॥
भद्रदारु घनं मूर्व्वां हरिद्रां मधुकं तथा।
कोलप्रमाणानि पिबेद्दान्तरीक्षेण वारिणा॥
दुःस्पर्शास्वरसं वापि कषायं कुङ्कुमस्य च।
एर्व्वारुबीजं तोयेन पिबेद्वाऽलवणीकृतम्॥
पञ्चमूलीशृतं चीरं द्राक्षारसमथापि वा।
योगांश्च वितरेत् तत्र पूर्व्वोक्तानश्मरीभिदः॥
मूत्रकृच्छ्रक्रमं वापि कुर्य्यान्निरवशेषतः॥ १९॥

प्रतीकारक्रममुपदिदिक्षति सर्व्वेष्विति। आनाहिको विधि र्विसूचिकाप्रतिषेधे निवेदयिष्यते। सौवर्च्चलेति। मांसमेवोपदंशो मद्यपानरोचकं द्रव्यमस्येति मांसोपदंशम्। मधु मद्यम्। "गर्ज्ज गर्ज्ज क्षणं मूढ़ मधु यावत् पिबाम्यहम्" इति देवी माहात्म्यम्। कोलप्रमाणानि मेलयित्वार्द्धकर्षाणि। एर्व्वारुः कर्कटी। अलवणी कृतं सैन्धवेन संमिश्रम्।

भूयो वक्ष्यामि योगांश्च मूत्राघातोपशान्तये ॥ २० ॥
स्नेहस्वेदैरुदावर्त्तं जृम्भाजं समुपाचरेत् ।
अश्रुमोक्षोऽश्रुजे कार्य्यः स्निग्धस्विन्नस्य देहिनः ॥ २१ ॥
तीक्ष्णाञ्जनावपीडाभ्यां तीक्ष्णगन्धोपसिङ्घनैः ।
वर्त्तिप्रयोगैरथवा क्षवशक्तिं प्रवर्त्तयेत् ॥
तीक्ष्णौषधप्रधमनैरथवादित्यरश्मिभिः ।
उद्गारजे क्रमोपेतं स्नैहिकं धूममाचरेत् ॥
सुरां सौवर्च्चलवतीं वीजपुररसान्विताम् ।
छर्द्द्याघातं यथादोषं सम्यक् स्नेहादिभिर्जयेत् ॥
सक्षारलवणोपेतमभ्यङ्गं वात्र दापयेत् ॥
वस्तिशुद्धिकरावापं चतुर्गुणजलं पयः ।
आ वारिनाशात्क्वथितं पीतवन्तं प्रकामतः ।
रमयेयुः प्रिया नार्य्यः शुक्रोदावर्त्तिनं नरम् ॥
क्षुद्विघाते हितं स्निग्धमुष्णमल्पञ्च भोजनम् ।
तृष्णाघाते पिबेन्मन्थं यवागूं वापि शीतलाम् ॥

भूय इति । यान् योगान् वक्ष्यामि तानपि कुर्य्यात् । अश्विति । अश्रुज उदावर्त्ते अश्रुमोक्षः कार्य्यः कट्वाद्युपयोगेनेति शेषम् ॥ १९—२१ ॥

तीक्ष्णेत्यादि । शिघि आघ्राणे इति धात्वर्थस्मरणात् तीक्ष्णगन्धोपशिङ्घनैः पौनः पुन्येन तीक्ष्णगन्धोपादानैरित्यर्थः । वर्त्तिप्रयोगैः चिं ४० अं उक्तेन विधिना धूमवर्त्त्युपयोगैः । क्षवशक्तिं प्रवर्त्तयेत् क्षवज उदावर्त्ते इति शेषः । न च तावत् तीक्ष्णौषधप्रधमनैरिति पौनरुक्त्यम् । चिं ४० अं अवपीड़प्रधमनयोर्भेदेनोपदेशात् । आदित्यरश्मिभिः सूर्य्याभिमुखमूर्द्ध्वमुखीभूय नासारन्ध्रे आदित्य-

भोज्यो रसेन विश्रान्तः श्रमश्वासातुरो नरः।
निद्राघाते पिबेत् क्षीरं स्वप्याच्चेष्टकथारतः॥
आध्मानाद्येषु रोगेषु यथास्वं प्रयतेत हि।
यच्च यस्मिन् भवेत् प्राप्तं तच्च तस्मिन् प्रयोजयेत्॥ २२॥
वायुः कोष्ठानुगो रूक्षैः कषायकटुतिक्तकैः।
भोजनैः कुपितः सद्य उदावर्त्तं करोति हि॥
वातमूत्रपुरीषासृक्-कफमेदोवहानि वै।
स्रोतांस्युदावर्त्तयति पुरीषञ्चातिवर्त्तयेत्॥
ततो हृद्वस्तिशूलार्त्तो गौरवारुचिपीड़ितः।
वातमूत्रपुरीषाणि कृच्छ्रेण कुरुते नरः॥
श्वासकासप्रतिश्याय-दाहमोहवमिज्वरान्।
तृष्णाहिक्काशिरोरोग-मनःश्रवणविभ्रमान्।
लभते च बहूनन्यान् विकारान् वातकोपजान्॥
तं तैललवणाभ्यक्तं स्निग्धं स्विन्नं निरूहयेत्।
दोषतोऽभिन्नवर्चस्कं भुक्तञ्चाप्यनुवर्त्तयेत्॥ २३॥

रश्मिप्रवेशेनेत्यर्थः। वस्तीति। वस्तिशुद्धिकरावापं पञ्चमूल्यादिकल्कं आ वारिनाशात् क्वथितं पयःशेषं पक्वमित्यर्थः। अत्र "द्रव्यादष्टगुणं क्षीरं क्षीरात्तोयं चतुर्गुणम्। क्षीरावशेषः कर्त्तव्यः क्षीरपाकेत्वयं विधिः" इति परिभाषा स्मर्त्तव्या। निद्राघात इति। इष्टकथा अनुकूलकथाः शृण्वन्निति शेषः। आध्मानादिषु यथास्वं चिकित्सितमतिदिशति आध्मानेति, प्राप्तं न्याय्यत्वेन लब्धम्॥ २२॥

"अपथ्यभोजनाच्चापि वक्ष्यते च तथा परः"। इति व्याहृत्तमव्यवहितमर्थमवसरवशात् सम्प्रत्यधिकरोति वायुरिति। उदावर्त्तस्यास्य प्रतीकारक्रममुपदिशति तमिति। दोषतो दोषवलमभिसमीक्ष्येत्यर्थः।

न चेच्छाम्यं प्रयात्येवमुदावर्त्तः सुदारुणः ।
अथैनं बहुशः स्विन्नं युञ्ज्यात् स्नेहविरेचनैः ।
पाययेत त्रिवृत्पीलु-यवानीरम्लपाचनैः ॥
हिङ्गुकुष्ठवचास्वर्ज्जि-विडङ्गं वा द्विरुत्तरम् ।
योगावेतावुदावर्त्तं शूलञ्चापि नियच्छतः ॥
देवदार्व्वग्निकं कुष्ठं वचां पथ्यां पलङ्कषाम् ।
पौष्कराणि च मूलानि तोयस्याढ्काढके पचेत् ॥
पादावशिष्टं तत् पीतमुदावर्त्तं व्यपोहति ॥
मूलकं शुष्कमार्द्रञ्च वर्षाभूः पञ्चमूलकम् ।
आरेवतफलञ्चाप्सु पक्त्वा तेन घृतं पचेत् ।
तत् पीयमानं शमयेदुदावर्त्तमशेषतः ॥ २४ ॥
वचामतिविषां कुष्ठं यवक्षारं हरीतकीम् ।
कृष्णां निर्द्दहनीञ्चापि पिबेदुष्णेन वारिणा ॥
इक्ष्वाकुमूलं मदनं विशल्यातिविषे वचाम् ।
कुष्ठं किण्वाग्निकौ चापि पिबेत् तुल्यानि पूर्व्ववत् ॥
मूत्रेण देवदार्व्वग्नि-त्रिफलाबृहतीः पिबेत् ॥

पाययेतेति । पीलु कोङ्कणदेशप्रसिद्धो गुडफलविशेषः । अम्लपाचनैरिति । अम्लं काञ्जिकं पाचनानि चित्रकादीनि पदमिदं हिङ्गुकुष्ठेत्यादावपि योजनीयम् । मूलकमिति । पञ्चमूलकं विल्वादिपञ्चमूलकम् । आरेवतफलं शम्पाकफलं अप्सु पक्त्वा क्वाथयित्वेत्यर्थः । अत्र पीयमानमिति विशेषणात् पानमात्रमेवोपशमयेदित्याख्यातम्, स्तुतिरियं घृतस्यास्येति नेयम्, वनस्पतयः सत्रं मासत इतिवत् ॥२३—२४॥

वचामिति । निर्द्दहनी मूर्व्वा । इक्ष्वाकुमूलमिति । इक्ष्वाकुः कटुतुम्बी । विशल्येह दन्ती । किण्वः सुराबीजम् । मदनेति । माषा प्रथमेदित्युक्तोऽपि

यवप्रस्थं फलैः सार्द्धं कण्टकार्य्या भलाढ़के ।
पञ्चार्द्धप्रस्थशेषन्तु पिबेद्धिङ्गुसमन्वितम् ॥
मदनालावुबीजानि पिप्पलीं सनिदिग्धिकाम् ।
सञ्चूर्ण्य प्रधमेन्नाड्या विशल्येतद् यथा गुदम् ॥
चूर्णं निकुम्भकम्पिल्ल-श्यामेक्ष्वाक्वग्निकोद्भवम् ।
कृतवेधनमागध्यो लवणानाञ्च साधयेत् ॥
गवां मूत्रेण ता वर्त्तीः कारयेत् तु गुदानुगाः ।
सद्यः शमकरावेतौ योगावमृतसम्मतौ ॥ २५ ॥

इति उत्तरतन्त्रे उदावर्त्तप्रतिषेधोनाम
पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥

चूर्णान्येतानि जलेनालोड्य "पिचकारी"ति प्रसिद्धेन यन्त्रेण प्रवेशयन्ति भिषजो बुद्धिमन्तः । चूर्णमिति । निकुम्भो दन्ती । कम्पिल्यो नामौषधिः "कमला गुंड़ि" इति परिचीयते । श्यामा श्याममूला-त्रिवृत् । अग्निकोऽत्र स्नूहीक्षीरम् । कृतवेधनं क्रोषातकीफलम् । परिशिष्टं निगद व्याख्यातम् ॥ २५ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
उत्तरतन्त्रे उदावर्त्तप्रतिषेधोनाम पञ्चपञ्चाशत्तमोऽध्यायः ।

षट्पञ्चाशोऽध्यायः ।

अथातो विसूचिकाप्रतिषेधमध्यायं व्याख्यास्यामः ॥ १ ॥

अजीर्णमामं विष्टब्धं विदग्धञ्च यदीरितम् ।
विसूच्यलसकौ तस्माद्भवेच्चापि विलम्बिका ॥
सूचीभिरिव गात्राणि तुदन् सन्तिष्ठतेऽनिलः ।
यस्याजीर्णेन सा वैद्यैरुच्यते तु विसूचिका ॥
न तां परिमिताहारा लभन्ते विदितागमाः ।
मूढास्तामजितात्मानो लभन्तेऽशनलोलुपाः ॥ २ ॥
मूर्च्छातिसारौ वमथुः पिपासा शूलं भ्रमोद्वेष्टनजृम्भदाहाः ।
वैवर्ण्यकम्पौ हृदये रुजश्च भवन्ति तस्यां शिरसश्च भेदः ॥ ३ ॥

भगवन् श्रुतमवधारितञ्च सम्यगुदावर्त्ताधिकारे यथातथमुपदिष्टं वचनजात-मिदानीमुदावर्त्तानां विजातीयत्वेनानुभूतां विसूचिकां सजातीयत्वेन प्रतीते चालसकविलम्बिके एव हेतुलिङ्गौषधज्ञानतो विज्ञापयतु भगवानःकृतार्थीकर्त्तुमि-त्येव मनुनीतो विसूचिकाप्रतिषेधमधिकरोति अथात इत्यादिना । विसूचिका शब्दोऽयं तुल्यहेतुकत्वं प्रकृत्याजहत्स्वार्थया लक्षणयाऽलसकविलम्बिके अपि लक्षयतीत्यवश्यं वक्तव्यम् । परमतस्ते प्रति यथावत् हेत्वादीनामुपदेशात् न चैतन्नराकाङ्क्ष्यं वदन्ति हि "यदग्रे सन्दिग्धं तच्छेषान्निर्णीयते" इति ॥ १ ॥

अजीर्णमिति । ईरितम् अन्नपानविधाविति शेषः । काः ? नाम विसूचिका-ऽलसकविलम्बिका इत्येवं वादिनां मुखमुद्रनाय क्रमेणासां लिङ्गान्युपदिदिक्षति

कुक्षिरानह्यतेऽत्यर्थं प्रताम्यत्यथ कूजति ।
निरुद्धो मारुतश्चापि कुक्षावुपरि धावति ॥
वातवर्च्चोनिरोधश्च कुक्षौ यस्य भृशं भवेत् ।
तस्यालसकमाचष्टे छिक्कोद्गारौ तु यस्य तु ॥ ४ ॥

दुष्टन्तु भुक्तं कफमारुताभ्यां प्रवर्त्तते नोर्द्धमधश्च यस्य ।
विलम्बिकां तां भृशदुश्चिकित्स्यामाचक्षते शास्त्रविदः पुराणाः॥५
यत्रस्थमामं विरुजेत् तमेवं देशं विशेषेण विकारजातैः ।
दोषेण येनावततं स्वलिङ्गैस्तं लक्षयेदामसमुद्भवैश्च ॥ ६ ॥
यः श्यावदन्तौष्ठनखोऽल्पसंज्ञश्छर्द्यर्दितोऽभ्यन्तरयातनेत्रः ।
क्षामस्वरः सर्व्वविमुक्तसन्धिर्यायान्नरोऽसौ पुनरागमाय ॥ ७ ॥
साध्यासु पार्ष्णोर्दहनं प्रशस्तमग्निप्रतापो वमनञ्च तीक्ष्णम् ।
पक्के ततोऽन्ने तु विलङ्घनं स्यात् सम्पाचनञ्चापि विरेचनं च ॥८॥
विशुद्धदेहस्य हि सद्य एव मूर्च्छातिसारादिरुपैति शान्तिम् ।
आस्थापनञ्चापि वदन्ति पथ्यं सर्व्वासु योगानपरान्निबोध ॥९॥

सूचीभिरिति । मूर्च्छेति । उद्वेष्टनं हस्तपादयोर्वन्धनवत् वेदनाविशेषः ॥२—५॥ विसूचिकादिष्वामदोषकर्त्तृकाया वेदनाया अनिर्व्वचनीयतां दोषानुविद्धताञ्च निवेदयन्नाह यत्रेति । आ ईषदम्यते पच्यते इत्यामम् "आङीषदर्थे" इत्यमरश्च, अजीर्णमित्यर्थः । आमं यत्रस्थं तमेव देशमामसमुद्भवैर्विकारजातैः-स्तम्भाध्मानादिभिर्विरुजेत् । तच्चामं येन दोषेणावततं व्याप्तं तच्चदोषं स्वलिङ्गै-स्तत्तद्दोषलिङ्गैर्लक्षयेच्चेति योजना । असाध्य लक्षणमाह य इति ॥ ६—७ ॥

प्रतीकारक्रममुपदिदिक्षति साध्यास्विति । तत इति तृतीयान्तात् सार्व्वविभक्तिकस्तसिल् ततः प्रागुक्तैःकर्म्मभिः पक्के "स्याद्विनाशोन्मुखं पक्कम्" इत्यमरस्मरणात्, विनाशोन्मुखे अन्ने विलङ्घनं न्याय्यंलङ्घनमित्येतत् । सम्पाचनञ्चापि विरेचन-

पथ्यावचाहिङ्गुकलिङ्गगृञ्जसौवर्च्चलैः सातिविषैश्च चूर्णम् ।
सुखाम्बुपीतं विनिहन्त्यजीर्णं शूलं विसूचीमरुचिञ्च सद्यः ॥
क्षारागदं वा लवणं विड़ं वा गुड़प्रगाढ़ानथ सर्षपान् वा ।
अम्लेन वा सैन्धवहिङ्गुयुक्तौ सबीजपूर्णौ सघृतौ त्रिवर्गौ ॥
कटुत्रिकं वा लवणैरुपेतं पिबेत् स्नुहीक्षीरविमिश्रितन्तु ।
कल्याणकं वा लवणं पिबेत् तु यदुक्तमादावनिलामयेषु ॥
कृष्णाजमोदक्षवकाणि वापि तुल्यौ पिबेद्वा मगधानिकुम्भौ ।
दन्तीयुतं वा मगधोद्भवानां कल्कं पिबेत् कोषवतीरसेन ॥
उष्णाभिरद्भिर्मगधोद्भवानां कल्कं पिबेन्नागरकल्कयुक्तम् ।
व्योषं करञ्जस्य फलं हरिद्रे मूलं समं वाप्यथ मातुलुङ्ग्याः ।
छायाविशुष्का गुटिका कृतास्ता हन्युर्विसूचीं नयनाञ्जनेन ।
सुवामितं साधु विरेचितं वा सुलङ्घितं वा मनुजं विदित्वा ॥
पेयादिभिर्दीपनपाचनीयैः सम्यक्क्षुधार्त्तं समुपक्रमेत ॥ १० ॥
आमं शकृद्वा निचितं क्रमेण भूयो विबद्धं विगुणानिलेन ।
प्रवर्त्तमानं न यथास्वमेनं विकारमानाहमुदाहरन्ति ॥

श्चेति लङ्घनान्तरमेवेत्यध्यवसेयम् । आमनन्ति हि "दोषच्छेदोऽनलोमालं पक्तुं दोषौषधाशनम्" इति । पथ्येति । गृञ्जो-गृञ्जनः "गाँजोर" इति प्रसिद्धो रसोनभेदः । गृञ्जनं प्रकृत्य वदन्ति च "गन्धाकृतिरसैस्तुल्यः सूक्ष्मनालः पलाण्डुना" इति । क्षारागदं दुन्दुभिस्वनीये निरदिक्षत् । त्रिवर्गस्त्रिफला त्रिकटुकौ । कृष्णेत्यादि । क्षवकमत्रापामार्गमूलम् । निकुम्भो दन्ती । कोषवती घोषकभेदः ॥ ८—१० ॥

प्रायेणालसकसाम्यादिदानीमानाहमधिकरोति आममिति । आममजीर्णं

तस्मिन् भवन्त्यामसमुद्भवे तु तृष्णाप्रतिश्यायशिरोविदाहाः।
आमाशये शूलमथो गुरुत्वं हृल्लास उद्गारविघातनञ्च ॥
स्तम्भः कटीपृष्ठपुरीषमूत्रे शूलोऽथ मूर्च्छा च शकृद्वमिश्च।
श्वासश्च पक्काशयजे भवन्ति लिङ्गानि चात्रालसकोद्भवानि ॥ ११
आमोद्भवे वान्तमुपक्रमेत संसर्गभक्तक्रमदीपनीयैः।
अथेतरं यो न शकृद्वमेत् तमामं जयेत् स्वेदनपाचनैश्च ॥
विसूचिकायां परिकीर्त्तितानि द्रव्याणि वैरेचनिकानि यानि।
तान्येव वर्त्तीर्वितरेद्विचूर्ण्य महिष्यजावीभगवान्तु मूत्रैः ॥
स्विन्नस्य पायौ विनिवेश्य तांश्च चूर्णानि चैषां प्रधमेत् तु नाड्या ॥१२
मूत्रेषु संसाध्य यथाविधानं द्रव्याणि यान्यूर्द्धमधश्च यान्ति ॥

शकृदपि प्रकरणादाममेव प्रत्येतव्यम्। यथास्वं यथावत् यथामार्गमित्येतत्। आमसमुद्भवं शकृत्समुद्भवञ्च पृथक्त्वेन निवेदयति तस्मिन्नित्यादिना श्लोकद्वितयेन। शकृज्जो हि परमार्थतः पक्काशये एव जायते तदिदमुच्यते पक्काशयज इति। कटीपृष्ठपुरीषमूत्रेस्तम्भः कट्यादीनामप्रचार इति निष्कर्षः ॥ ११ ॥

प्रतीकारक्रमसुपदिदिक्षति आमेति। संसर्ग-भक्तक्रममिश्राणि दीपनीयानि संसर्गभक्तक्रमदीपनीयानि पिप्पल्यादिप्रभृतिपरिपक्कानि मण्डादीनीत्यर्थः। अथेत्यानाहाधिकारे यो न सकृद् वमेत् तस्य त माम मामदोषानुविद्धमितरं शकृज्जमानाहं स्वेदनपाचनैरेव जयेदिति चकारेनावधार्य्यते। आनाहेऽर्द्धरति-प्रसङ्गाशङ्कातो वैरेचनिकभेषजानां पानादिनोपयोगं परिहृत्य वर्त्त्योप योगसुपदिदिक्षति विसूचिकायामिति ॥ १२ ॥

निरूहक्रमसुपदिशति मूत्रेष्विति बहुवचनमष्टानामेव मूत्राणां परि-

क्काथेन तेनाशु निरूहयेच्च मूत्रार्द्धयुक्तेन समाक्षिकेण ।
त्रिभण्डियुक्तं लवणप्रकुञ्चम् दत्त्वा विरिक्तक्रममाचरेच्च ।
एष्वेव तैलेन च साधितेन प्राप्तं यदि स्यादनुवासयेच्च ॥ १२ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे विसूचिकाप्रतिषेधो
नाम षट्पञ्चाशोऽध्यायः ॥ ५६ ॥

मस्त्वर्थम् । विधानमनतिक्रम्येति यथाविधानम् । निरूहार्थं कृते क्काथे तस्मिन् प्रक्षेप्तुमिदमुच्यते त्रिभण्डीति । त्रिभण्डी त्रिवृत् । अत्र लवणप्रकुञ्चमित्युक्तेऽपि व्याध्यादिबलाबलमभिसमीक्ष्य सैन्धवस्य द्वित्राः कर्षा एव प्रयोज्याः । प्रकुञ्चं पलम् विरिक्तक्रमम् आतुरोपद्रवचिकित्सिते उपदिष्टविरेचनक्रमम् । परिशिष्टं निगदव्याख्यातम् ॥ १२ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
उत्तरतन्त्रे विसूचिकाप्रतिषेधोनाम षट्पञ्चाशत्तमोऽध्यायः ।

सप्तपञ्चाशोऽध्यायः।

अथातोऽरोचकप्रतिषेधमध्यायं व्याख्यास्यामः ॥ १ ॥

दोषैः पृथक् सह च चित्तविपर्य्ययैश्च
भक्तायनेषु हृदि चावतते प्रगाढ़म् ।
नान्ने रुचिर्भवति तं भिषजो विकारं
भक्तोपघातमिह पञ्चविधं वदन्ति ॥ २ ॥

भगवन् जिह्वास्यमेकमापन्नं दृश्यतेहि विसूचिकादिषु जनिष्यमाणेषु जातेषु चैकान्ततोनान्नं रोचत इत्यतस्तेषां स्वलक्षणत्वेन प्रतीतोऽयमरोचको नच कथं तत्र गन्धमात्रेणापि तथात्वेनोपदिश्यते, एवं विप्रतिपन्नानामन्तेवासिना मनुप्रश्नार्थमर्थतत्त्वं प्रतिपिपादयिषुर्भगवान् सत्यामेव वुभुक्षायां स्वादुतराणा-मप्याहाराणां तद्प्रतियोगितरत्वेनानुभवोऽरोचकेति संज्ञां लभते, रुचे रास्वादनार्थत्वात्, न पुनरितरत्रेत्यतोऽजीर्णाभिनिर्वृत्तेषु विसूचिकादिष्वरोचको नैवस्वलक्षणत्वेनोपदिश्यते, इत्येव व्यजेनोपदेष्टुमिदानीमरोचक प्रतिषेधमधि-करोति अथात इत्यादिना। एवं च क्षुत्प्रणाशोऽरुचिस्तृष्णेत्यादावरुचिशब्दोऽति-दिष्टइत्यध्यवसेयम् ॥ १ ॥

दोषैरिति। भक्तायनपदेनेह प्रकरणात् जिह्वागतानि भक्तरसा-स्वादनानि तानि तानि स्रोतांस्येवाभिप्रेयन्ते इति निश्चीयते; तेष्वेव हि दोषदुष्टेष्वास्वादवन्त्यप्याहारद्रव्याणि नास्वाद्यन्ते कथञ्चिदपि यथावत्। अतएव नैषधेऽप्युक्तम् "पित्तेन दूने रसने सितापि तिक्तायते हंसकुलावतंस!" इति। अवतत इति पदञ्च भक्तेत्योदौ बहुवचनान्तत्वेनाकृष्यान्वेयम्। तदयमर्थः, पृथक व्यस्तैः सह समस्तैश्च दोषैर्भक्तायनेषु रसास्वादनेषु

हृच्छूलपीड़नयुतं विरसाननत्वं
वातात्मके भवति लिङ्गमरोचके तु।
हृद्दाहचोषबहुता मुखतिक्तता च
मूर्च्छा सतृड्भवति पित्तकृते तथैव॥
कण्डूगुरुत्वकफसंस्रवसादतन्द्राः
श्लेष्मात्मके मधुरमास्यमरोचके तु।
सर्व्वात्मके पवनपित्तकफा बहूनि
रूपाण्यथास्य हृदये समुदीरयन्ति॥
संरागशोकभयविप्लुतचेतसस्तु
चिन्ताकृतो भवति सोऽशुचिदर्शनाच्च॥ ३॥

स्रोतःस्ववततेषु, चित्तविपर्य्यये भयशोकादिनिमित्तचित्तवैकल्ये: हृदि चित्ताधिष्ठाने हृदये प्रगाढ़मवतते व्याप्ते दूषिते सतीतियावत् नान्ने रुचिर्भवतीति योजना। यद्वा हृदीति हृच्छब्दोऽयं "मञ्चाःक्रोशन्ति" इतिवदुपचारात् हृदयस्थे साधकसमाख्येऽग्नावेव प्रवर्त्तते, तस्मिंश्च दोषावतते सर्व्वैरेवाभिलाषैः सह अन्नाभिलाषः समूलघातमुपहन्यते इति गम्यते। "यत् पित्तं हृदयस्थं तस्मिन् साधकोऽग्निरिति संज्ञा"। सोऽभिप्रार्थितमनोरथ साधनकृदुक्तः। इति सू' २१ अं अतिक्रान्ता वेक्षणात्। नच तावत् पक्षेऽस्मिन् पञ्चमारोचकप्रतीकारं प्रकृत्य "इच्छाभिघात भयशोक हतेऽन्तरग्नौ" इति वक्ष्यमाणवचने जाठरपर्य्यायस्यान्तरग्नेर्निमित्तत्वेनाभिधानं विप्रतिषिद्धं भवत्यन्तरेण ह्यन्तरग्नेरुपघातं कथमपि नोपहन्यते साधकः स्वैरम्। अन्तरग्न्यपरपर्य्यायं पाचकाभिधानं पित्तं प्रकृत्य तत्रस्थमेव चात्मशक्त्या शेषाणां पित्तस्थानानां शरीरस्य चाग्निकर्म्मणा अनुग्रहं करोति" इति हि सू' २१ अं न्यवेदयत्। अत्र चित्तविपर्य्ययाच्चेति पाठः प्रामादिक इत्यवगम्यते असुकरान्वयत्वात्॥ २॥

पञ्चविधं निवेदयति हृच्छूलेति। संरागेति संरागोऽत्र काममूलोऽनुरागः। शब्दाद्यैरेते चित्तविकृतिहेतूनामुपलक्षणम्, तथाच "इच्छा-

वाते वचाम्बुवमनं कृतवान् पिवेच
स्नेहैः सुराभिरथवोष्णजलेन चूर्णम्।
कृष्णाविड़ङ्गयवभस्महरेणुभार्गी-
रास्नैलहिङ्गुलवणोत्तमनागराणाम् ॥ ४ ॥
पित्ते गुड़ाम्बुमधुरैर्वमनं प्रशस्तं
स्नेहः ससैन्धवसितामधुसर्पिरिष्टः ॥ ५ ॥
निम्बाम्बुवामितवतः कफजेऽनुपानं
राजद्रुमाम्बु मधुना तु सदीप्यकं स्यात्।
चूर्णं यदुक्तमथवानिलजे तदेव ॥ ६ ॥
सर्व्वैश्च सर्व्वकृतमेवमुपक्रमेत ॥ ७ ॥
द्राक्षापटोलविड़वेतकरीरनिम्ब-
मूर्व्वाभयाचवदरामलकेन्द्रवृक्षैः।
वीजैः करञ्जनतपत्रचभवैश्च पिष्टै-
र्लेहं पचेत् सुरभिमूत्रयुतं यथावत् ॥
मुस्तां वचां त्रिकटुकं रजनीद्वयञ्च
भार्गीञ्च कुष्ठमथ निर्द्दहनीञ्च पिष्ट्वा।
मूत्रेऽविजे द्विरदमूत्रयुते पचेद्वा
पाठां तुगामतिविषां रजनीञ्च मुख्याम् ॥

भिघातभयशोकहृते" इति वक्ष्यमाण वचनं समन्वितं भवति। विप्लुत मुपद्रुतं "अविप्लुतब्रह्मचर्य्यः" इति स्मृतिश्च। सर्व्वैरित्यादि। चार्थोऽयमथशब्दस्तदयमर्थः। हृदये शरीरे च बहूनि रूपाणि हृच्छूलादीनि विरसाननत्वादीनि च समुदीरयन्तीति ॥ ३ ॥

प्रतीकारक्रममुपदिदिक्षति वात इति। निम्बेति। राजद्रुमः। आरग्वधः।

मण्डूकिमर्कममृताञ्च सलाङ्गलाख्यां
मूले पचेत् तु महिषस्य विधानविद्वा ।
एतान् न सन्ति चतुरो लिहतस्तु लेहान्
गुल्मारुचिश्वसनकण्ठहृदामयाश्च ॥ ८ ॥
साल्यान् सदेशरचितान् विविधांश्च भक्ष्यान्
पानानि मूलफलषाडवरागयोगान् ।
अद्यादृसांश्च विविधान् विविधैः प्रकारै-
र्भुञ्जीत वापि लघुरुच्यमनःसुखानि ॥ ९ ॥
आस्थापनं विधिवदत्र विरेचनञ्च
कुर्य्यान्मृदूनि शिरसश्च विरेचनानि ॥
चौण्यूषणानि रजनीत्रिफलायुतानि
चूर्णीकृतानि यवशूकविमिश्रितानि ।
क्षौद्रायुतानि वितरेन्मुखधावनार्थं-
मन्यानि तिक्तकटुकानि च भेषजानि ॥ १० ॥

गोमूत्रेऽजामूत्रे हस्त्यश्वमूत्रे महिषीमूत्रे च पक्वान् चतुरो लेहानभिधत्ते, ...इति । मुद्गमार्द्रीम् मण्डूकीं द्राक्षाम् । "व्यापोः" क्षयः ॥ ४—८ ॥

प्रलोभ्येष्टि वस्तुनि सन्निहिते लोभगन्धेनासंस्पृष्टानां महर्षीणामपि लोलुपत्वमभि-लाषः जायते, किं पुनरितरेषाम्, इत्येवमन्वानो भगवान् प्राक्प्रियत्वेनाभ्यस्तानि वस्तूनि चेत् समीपे सुष्ठुतरविन्यासविशेषेण स्थापितानि स्युः तर्हि तेषु मध्ये केषु-चिद्वस्तुष्वभिलाषो भविष्यतीति सम्प्रधार्य्याह साल्यानिति । साल्यान् भक्ष्यान् सदेशरचितान् समीपे विन्यस्तान् "सदेशाभ्यास-सविध-समर्याद-सवेशवत्" इत्यमरः । यथाऽभिरुच्यानुरूपमित्यभिसन्धिः । कश्चित्त्वर्थमजानन् लोकतर-कोलाहलभुजापरिहृतविवेकत्वेन सकारे वकारं संयोज्य स्वदेशरचितान् इत्येवं पठित्वा व्याचिख्यासुर्मत्तोन्मत्तवत् प्रलपन् किमिवाजानो वक्तव्यतां व्यनक्ति ॥८।१०॥

मुस्तादि-राजतरुवर्ग-दशाङ्गसिद्धैः
क्वाथैर्जयेन्मधुयुतैर्विविधैश्च लिहैः ।
मूत्रासवैर्गुडकृतैश्च तथा त्वरिष्टैः
धारासवैश्च मधुमाधवतुल्यगन्धैः ॥
स्यादेष एव कफवातकृते विधिश्च
शान्तिं गते हुतभुजि प्रशमाय तस्य ॥ ११ ॥
इष्टाभिघातभयशोककृतेऽन्तरग्नौ
भावान् भवाय वितरेत् खलु शस्तरूपान् ॥
अर्थेषु चाप्यपचितेषु पुनर्भवाय
पौराणिकैः श्रुतिशतैरनुभावयेत् तम् ।

मुस्तेत्यादि । राजतरुवर्गः आरग्वधादिवर्गः । दशाङ्गं दशमूलं मधुकृतं मद्यं माधवम् । अमुमेवविधिं वातकफदुष्टे प्रणष्टे चाग्नावतिदिशति-स्यादिति ॥ ११ ॥

पञ्चममरोचकं प्रति प्रतीकारक्रममुपदिदिक्षति इष्टेति । इष्टाऽभिघातादिभिर्हि हृदयं पीड्यते । हृदयस्थ पुनः साधकोनामाग्निरधितिष्ठति । स चाभिप्रार्थितमनोरथसाधनकृदित्युपदिष्टम् । तस्मिंश्च प्रणष्टे सर्वेऽभिलाषाः प्रणश्यन्ति स च पुनः साधकोऽन्तरग्निरुपघातेनैवोपहन्यत इत्यवोचाम प्रागेव, तदिदं साम्प्रतमुक्तं कृतेऽन्तरग्नाविति । एवञ्चायमर्थः । इष्टाभिघातादिकृते ऽन्तरग्नौ जाठरे साधन समाख्ये वा भवाय "भवः क्षेमे च संसारे" इति मेदिनीकारवचनात् मङ्गलाय प्रस्तुतत्वादरोचकोपशमाय इति तात्पर्य्यम् प्रशस्ताः शस्तियुक्ताः शस्तरूपा स्तांस्तथोक्तान् "प्रशंसायां रूपप्" इति पा सू ५।३।६६। रूपप्प्रत्ययः । भावान् पदार्थान् वितरेदित्यर्थः । अथ चेत् भवाय शस्तरूपा भावा न लभ्यन्ते तर्हि का गति रित्याह अर्थेष्विति । अर्थभूतेषु शस्तरूपेषु भावेषु च अपचितेषु क्षीणेषु चेति यावत् भवायाभिलाषार्थं पौराणिकैः श्रुतिशतैः "श्रुतिः श्रोत्रे च

दैन्यं गते मनसि बोधनमत्र शस्तं
यद्यत् प्रियं तदुपसेव्यमरोचके तु ॥ १२ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रेऽरोचकप्रतिषेधोनाम
सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

तत्कर्म्मण्याख्याय वार्त्तयोः स्त्रियाम्" इति मेदिनीस्मृतेः वार्त्तासमूहे नलराम-युधिष्ठिरादीनामुपाख्यानादिभिरिति निष्कर्षः। तमातुरमनुभावयेत् मतिनिश्चये-नोपपादयेदित्यर्थः। नच तावदनुभावयते रेवमर्थोऽप्रसिद्धः; "अनुभावः प्रभावे स्यात् सताञ्च मतिनिश्चये" इत्यमरे च तदर्थे प्रयोगदर्शनात्। उक्तमर्थमनुवदति दैन्यमिति परिशिष्टं निगदव्याख्यातम् ॥ १२ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
उत्तरतन्त्रेऽरोचकप्रतिषेधोनाम सप्तपञ्चाशत्तमोऽध्यायः ॥

अष्टपञ्चाशोऽध्यायः।

अथातो मूत्राघातप्रतिषेधमध्यायं व्याख्यास्यामः ॥ १ ॥

वातकुण्डलिकाष्ठीला वातवस्तिस्तथैव च।
मूत्रातीतः सजठरो मूत्रोत्सङ्गः क्षयस्तथा ॥
मूत्रग्रन्थिर्मूत्रशुक्रमुष्णवातस्तथैव च।
मूत्रौकसादौ द्वौ चापि रोगा द्वादश कीर्त्तिताः ॥ २ ॥
रौक्ष्याद्वेगविघाताद्वा वायुर्वस्तौ सवेदनम्।
मूत्रं संगृह्य चरति विगुणः कुण्डलीकृतः ॥
सृजेदल्पाल्पमथवा सरुजस्कं शनैः शनैः।
वातकुण्डलिकां तान्तु व्याधिं विद्यात् सुदारुणम् ॥ ३ ॥

अतो "भूयो वक्ष्यामि योगांश्च मूत्राघातोपशान्तये" इत्युदावर्त्तप्रतिषेधे व्याहर्त्तुमुररीकृतं विक्लेदकरत्वेनोपदिष्टस्यमूत्रस्य दोषशसंमनार्थत्वेन भिषग्विद्याया मेकान्ततो विजिज्ञासितव्यमर्थमिमं हित्वा सुदूरमाक्षिप्तोऽस्मि कथाप्रसङ्गेन। आस्तां तावदिदानीं तमेवार्थं प्रवर्त्तयिष्यामि इत्यभिसन्ध्याय तांस्तान् मूत्राघातोपशमनान् योगान् व्याहर्त्तुकामो भगवान् शिष्यशिशिक्षयिषया "रोगमादौ परीक्षेत, ततोऽनन्तरमौषधम्" इति स्मरणात् निदानादिपुरःसरं मूत्राघातप्रतिषेधमधिकरोति अथात इत्यादिना मूत्रस्याहननं येन यस्मा स मूत्राघातः ॥ १ ॥

व्याससमासाभ्यामुपदिष्टं हि शास्त्रं भूयोज्ञानाभिवृद्धये प्रभवतीति ज्ञात्वा प्रथमं तावत् नामतः सङ्घातश्च रोगान् निवेदयति वातेति ॥ २ ॥

रौक्ष्यादिति। अभ्यन्तरमर्थं वस्तेरेवेति ज्ञेयम्। मूत्रं चरति संगृह्येत्युक्तेः। कुण्डलीकृतो वलयीकृतः "कुण्डलं कर्णभूषायां पाशेऽपि वलयेऽपि च" इति

शकृन्मार्गस्य वस्तेश्च वायुरन्तरमाश्रितः ।
अष्ठीलावद्घनं ग्रन्थिं करोत्यचलमुन्नतम् ॥
विण्मूत्रानिलसङ्गश्च तत्राध्मानश्च जायते ।
वेदना जायते वस्तौ वाताष्ठीलेति तां विदुः ॥ ४ ॥
वेगं विधारयेद् यस्तु मूत्रस्याकुशलो नरः ।
निरुणद्धि मुखं तस्य वस्तेर्वस्तिगतोऽनिलः ॥
मूत्रसङ्गो भवेत् तेन वस्तिकुक्षिनिपीड़ितः ।
वातवस्तिः स विज्ञेयो व्याधिः कृच्छ्रप्रसादनः ॥
सन्धार्य्य वेगं मूत्रस्य यो भूयः स्रष्टुमिच्छति ।
तस्य नाभ्येति यदि वा कथञ्चित् संप्रवर्त्तते ॥
प्रवाहतो मन्दरुजमल्पमल्पं पुनःपुनः ।
मूत्रातीतन्तु तं विद्यान्मूत्रवेगविघातजम् ॥ ५ ॥
मूत्रस्य विहते वेगे तदुदावर्त्तहेतुना ।
अपानः कुपितो वायुरुदरं पूरयेद् भृशम् ॥
नाभेरधस्तादाध्मानं जनयेत् तीव्रवेदनम् ।
तं मूत्रजठरं विद्यादधःस्रोतोनिरोधकम् ॥ ६ ॥

भेदिनी च। शकृदिति। शकृन्मार्गो गुदम्। अष्ठीलावर्त्तुलपाषाणभेदो वात व्याध्युपदिष्टा वाताष्ठीला वा। वाताष्ठीलातश्चायं कष्टतरवेदनाविशेषेण भिद्यत इत्युन्नेयम् "वेदना च परावस्तौ" इत्युक्तेः। वेगमिति। कुक्षिसाम्यात् कुक्षि र्मध्यदेशो वस्तेः कुक्षिर्वस्तिकुक्षिस्तत्र निपीड़ितो वस्तिकुक्षिनिपीड़ितः, अनिल-विशेषणमेतत्। वातदुष्टोवस्तिरेव वातवस्तिर्नाम रोग उच्यते, अभेदोपचारात्। सन्धार्य्येति। यदिवेति, निपात समुदायः पक्षान्तरमाशंसति। प्रवाहतो वेगेन प्रवर्त्तयतः। मूत्रं मूत्रवेगमतीतमभ्येति मूत्रातीतस्तं तथोक्तम्। अयन्तु पीनः पुन्येन मूत्रविसृष्टया अल्पमल्पं मूत्रविसर्गेण च पूर्व्वस्माद्भिद्यत इत्यध्यवसेयम्॥ ५॥

वस्तौ वाप्यथवा नाले मणौ वा यस्य देहिनः ।
मूत्रं प्रवृत्तं सज्जेत सरक्तं वा प्रवाहतः ।
स्रवेच्छनैरल्पमल्पं सरुजं वाथ नीरुजम् ।
विगुणानिलजो व्याधिर्मूत्रोत्सङ्गः स संज्ञितः ॥ ७ ॥
रूक्षस्य क्लान्तदेहस्य वस्तिस्थौ पित्तमारुतौ ।
सदाहवेदनं कृच्छ्रं कुर्य्यातां मूत्रसंक्षयम् ॥ ८ ॥
अभ्यन्तरे वस्तिमुखे वृत्तोऽल्पः स्थिर एव च ।
वेदनावानविष्यन्दो मूत्रमार्गनिरोधनः ॥
जायते सहसा यस्य ग्रन्थिरश्मरिलक्षणः ।
स मूत्रग्रन्थिरित्येवमुच्यते वेदनादिभिः ॥ ९ ॥
प्रत्युपस्थितमूत्रस्तु मैथुनं योऽभिनन्दति ।
तस्य मूत्रयुतं रेतः सहसा संप्रवर्त्तते ॥ १० ॥

मूत्रस्येति । तदुदावर्त्तहेतुना मूत्रवेगविघातजोदावर्त्तः । जठरमुदरसमाख्यो-रोग इवेति जठरं मूत्रमूलं जठरं मूत्रजठरम् । वस्ताविति । मणिर्मेढ्राग्रभागः । नालं माध्यं तत् ताभ्यां नालमत्र मेढ्रः । नालग्रहणेनैव मणेरुपालम्भेऽपि पृथगुपादानं प्रपञ्चार्थम् । प्रवाहनवेगेन चेत् स्रक्कयोर्वस्तौ वस्तिमुखे वा सिराधमन्यौ भिद्येते तर्हि रक्तमप्यवश्यं मूत्रेण सह निर्गच्छेदित्युक्तं सरक्तं वेति । मूत्रस्यात्यर्थं सङ्गोऽत्रेति मूत्रोत्सङ्गः स एव संज्ञाजाताऽस्येति "तदस्य" इति पां सू ५।२।३६ इतच् मूत्रोत्सङ्गसंज्ञितः । अभ्यन्तर इति । अश्मर्य्या लक्षणमिव लक्षणमस्येत्यश्मरि-लक्षणः । "ङ्यापोः" इति ह्रस्वः । मूत्रावरोधकोग्रन्थिर्मूत्रग्रन्थिः । वेदना-दिभिरित्यादिग्रहणात् दाहादीनामादेशः । वेदनादिभिरुपलक्षित इत्यर्थः । अत्र विशदमाह तन्त्रान्तरम् "रक्तं वातात्कफाद्दुष्टं वस्तिद्वारे सुदारुणम् । ग्रन्थिं कुर्य्यात् स कृच्छ्रेण सृजेन्मूत्रं तदावृतम् । अश्मरीसमशूलं तं मूत्रग्रन्थिं प्रचक्षते" इति ॥ ६—९ ॥

प्रत्युपस्थितेति । पुरस्तात् प्रवर्त्तते इत्यञ्जसा अवस्थानाभावत्वेनापेक्षं

पुरस्ताद्वापि मूत्रस्य पश्चाद्वापि कदाचन ।
भस्मोदकप्रतीकाशं मूत्रशुक्रं तदुच्यते ॥ ११ ॥
व्यायामाध्वातपैः पित्तं वस्तिं प्राप्यानिलाहतम् ॥
वस्तिमेढ्रगुदञ्चैव प्रदहन् स्रावयेदधः ॥
मूत्रं हारिद्रमथवा सरक्तं रक्तमेव वा ।
कृच्छ्रात् प्रवर्त्तते जन्तोरुष्णवातं वदन्ति तम् ॥ १२ ॥
विशदं पीतकं मूत्रं सदाहं बहलं तथा ।
शुष्कं भवति यच्चापि रोचनाचूर्णसन्निभम् ।
मूत्रौकसादं तं विद्याद्रोगं पित्तकृतं बुधः ॥
पिच्छिलं संहतं श्वेतं तथा कृच्छ्रं प्रवर्त्तते ।
शुष्कं भवति यच्चापि शङ्खचूर्णप्रपाण्डुरम् ।
मूत्रौकसादं तं विद्यादामयञ्चापरं कफात् ॥ १३ ॥
कषायकल्कसर्पींषि भक्ष्यान् लेहान् पयांसि च ।
क्षारमध्वासवस्वेदान् वस्तींश्चोत्तरसंज्ञितान् ॥
विदध्यान्मतिमांस्तत्र विधिज्ञाश्मरिनाशनम् ।
मूत्रोदावर्त्तयोगांश्च कार्त्स्न्येनात्र प्रयोजयेत् ॥
कल्कमेर्व्वारुबीजानामक्षमात्रं ससैन्धवम् ।
धान्याम्लयुक्तं पीत्वैव मूत्रकृच्छ्रात्प्रमुच्यते ॥ १४ ॥

पश्चाद्वापीत्यर्व्वाक् च्युतत्वेन तद्विपर्य्यस्तं रेत इत्यनुसन्धेयम् । भस्मोदकप्रतीकाशं स्वप्रामाणतोऽधिकतरमूत्रेण सहमिश्रीभावात् क्षारोदकावभासम् । मूत्रसंसृष्टं शुक्रं मूत्रशुक्रम् ॥१०—११ ॥

उष्णं पित्तं तत्प्रधानोवात उष्णवात स्तत्कृतोऽयं रोगोऽभेदोपचारादुष्ण-वात उच्यते । विशदमिति । मूत्राश्रयः सादो यत्र स मूत्रौकसादः । ओक आश्रय इति हि पर्य्यायौ ॥ १२—१३ ॥

सुरां सौवर्च्चलवतीं मूत्रकृच्छ्री पिबेन्नरः ।
मधु मांसोपदंशं वा पिबेद्वाप्यथ गौड़िकम् ॥
पिबेत् कुङ्कुमकर्षं वा मधूदकसमायुतम् ।
रात्रिपर्य्युषितं प्रातस्तथा सुखमवाप्नुयात् ॥ १५ ॥
दाड़िमाम्लयुतां मुख्यामेलाजीरकनागरैः ।
पीत्वा सुरां सलवणां मूत्रकृच्छ्रात् प्रमुच्यते ॥ १६ ॥
पृथक्पर्ण्यादिवर्गस्य मूलं गोक्षुरकस्य च ।
अर्द्धप्रस्थेन तोयस्य पचेत् क्षीरं चतुर्गुणम् ॥
क्षीरावशिष्टं तच्छीतं सिताक्षौद्रयुतं पिबेत् ।
नरो मारुतपित्तोत्थ-मूत्राघातनिवारणम् ॥ १७ ॥
निष्पीड्य वासना सम्यग्वर्च्चो रासभ-वाजिनाम् ।
रसस्य कुड़वन्तस्य पिबेन्मूत्ररुजापहम् ॥ १८ ॥
मुस्ताऽभयादेवदारु-मूर्व्वाणां मधुकस्य च ।
पिबेदक्षसमं कल्कं मूत्रदोष निवारणम् ॥
अभयामलकाद्यानां कल्कं वदर सम्मितम् ।
अम्भसाऽरुणोपेतम् लवणोपेतम् पिबेन्मूत्ररुजापहम् ॥
उदुम्बरसमं कल्कं द्राक्षाया जलसंयुतम् ।
पिबेत् पर्य्युषितं वारि शीतं मूत्ररुजापहम् ॥

सुरामिति । मधुमद्यम् "मधु यावत् पिबाम्यहम्" इति चक्री । मांसमेव मद्यपानरोचकं द्रव्यमत्रेति मांसोपदंशम् । गुड़कृतं मद्यं गौड़िकम् । दाड़िमेति । मुख्यां सू' ४१ अ" चिरस्थितत्वाद्युक्तगुणयोगात् वरिष्ठाम् ॥ १४—१६ ॥

पृथगिति । पृथक्पर्ण्यादिवर्गस्य पृश्निमाससुद्गपर्णीप्रभृतिसजातीयद्रव्य-समूहस्य । अत्र चतुर्गुणमष्टगुणं द्रव्यद्वैगुण्यतो भवेदित्यतः "द्रव्यादष्टगुणं

निदिग्धिकायाः स्वरसं पिबेत् कुड़वसंमितम् ।
मूत्रदोषहरं कल्कमथवा क्षौद्रसंयुतम् ॥ १९ ॥
प्रपीड्यामलकानान्तु रसं कुड़वसम्मितम् ।
पीत्वागदी भवेज्जन्तुर्मूत्रदोषरुजातुरः ॥
धात्रीफलरसेनैवं सूक्ष्मैलां वा पिबेन्नरः ।
पिष्ट्वाथवा सुशीतेन शालितण्डुलवारिणा ॥
तालस्य तरुणं मूलं त्रपुसस्वरसं तथा ।
श्वेतं कर्कटकश्चैव प्रातस्तं पयसा पिबेत् ॥
शृतं वा मधुरैः क्षीरं सर्पिर्मिश्रं पिबेन्नरः ।
मूत्रदोषविशुद्ध्यर्थं शुक्रदोषहरं परम् ॥ २० ॥
बलाश्वदंष्ट्राक्रौञ्चास्थि-कोकिलाक्षकतण्डुलान् ।
शतपर्व्वकमूलञ्च देवदारु सचित्रकम् ॥
अक्षबीजञ्च सुरया कल्कीकृत्य पिबेन्नरः ।
मूत्रदोषविशुद्ध्यर्थं तथैवाश्मरिशोधनम् ॥ २१ ॥

क्षीरं क्षीरात्तोयं चतुर्गुणम्" इति स्मरणात् शरावद्वितये तोये कुड़वमात्रं क्षीरं कर्ष-द्वयमितञ्च तत्तन्मूलं कल्कीकृत्य पक्तव्यमित्यायातम् । अभयेति । बदरमर्द्धकर्षः । उदुम्बरेति । उदुम्बरं कर्षः । अत्र वारि च पिबेदित्येवं व्याख्येयम् । निदिग्धि-कायां इति । अथवाथवेति योगान्तरं सूचयति । अत्र मूत्रदोषहरं कल्यमिति पाठेतु । कल्यं प्रातः "कल्यं प्रभाते" इति मेदिनी । कर्कट्याः फलं कर्कटम् "फले लुक्" इति पा॰ सू॰ ४।३।१६३ तद्धितलुक् । अत्र श्वेतमिति विशेषणम् "खरबुजा" इति प्रसिद्धस्यैव बीजमादातुम् ॥ १९।२० ॥

बलेति । तण्डुलोऽत्र निस्तुषं बीजम् । शतपर्व्वक इक्षुः ।

पाटलाक्षारमाहृत्य सप्तकृत्वः परिस्रुतम्।
पिबेन्मूत्रविकारघ्नं संसृष्टं तैलमात्रया॥ २२॥
नलेक्षुदर्भाश्मभेद-त्रपुसैर्व्वारुवीजकम्।
क्षीरे परिसृतं तत्र पिबेत् सर्पिःसमायुतम्॥
पाटल्या यावशूकाच्च पारिभद्रात् तिलादपि।
क्षारोदकेन मतिमान् त्वगेलोषणचूर्णकम्।
पिबेद् गुड़ेन मिश्रं वा लिह्यात्लेहान् पृथक् पृथक्॥ २३॥
अत ऊर्द्ध्वं प्रवक्ष्यामि मूत्रदोषे क्रमं हितम्॥ २४॥
स्नेहस्वेदोपपन्नानां हितं तेषु विरेचनम्।
ततः संशुद्धदेहानां हितास्तोत्तरवस्तयः॥ २५॥
स्त्रीणामतिप्रसङ्गेन शोणितं यस्य सिच्यते।
मैथुनोपरमस्तस्य बृंहणश्च विधिः स्मृतः॥ २६॥
ताम्रचूड़वसातैलं हितञ्चोत्तरवस्तिषु।
विधानं तस्य पूर्व्वं हि व्यासतः परिकीर्त्तितम्॥ २७॥
क्षौद्रार्द्धपात्रं दत्त्वा तु पात्रन्तु क्षीरसर्पिषः।
स्वयङ्गुप्ताफलञ्चैव तथैवेक्षुरकस्य च॥

पाटलेति। लोध्रापरपर्य्यायोऽयं मात्राशब्दः। नलेत्यादि। वीजको मातुलुङ्गकः। अत्र नलादीनां चतुर्णां मूलं शेषाणान्तु वीजमेव ग्राहयन्ति। पाटल्या इति। क्षारोदकेन त्वगादिचूर्णकं पिबेत्। गुड़ेन मिश्रं त्वगादिचूर्णकं पृथक् पृथक् वीन् लेहान् लिह्याद्वा॥ २१।२३॥

ताम्रेत्यादि। वसामिश्रं तैलं वसातैलम्। तस्योत्तरवस्तेः, पूर्व्वम् अनुवासनोत्तरवस्तिचिकित्सिते इत्युन्नेयम्। क्षौद्रेति। अर्द्धपात्रमर्द्धाढ़कम्। क्षीरोत्थं सर्पिः क्षीरसर्पिः। इक्षुरकः कोकिलाक्षः समासान्तपदस्थोऽपि

पिप्पलीचूर्णसंयुक्तमर्द्धभागं प्रदापयेत् ।
एतदेकध्यमानीय खजेनाभिप्रमन्थयेत् ।
तस्य पाणितलं चूर्णं लीढ्वा क्षीरं ततः पिबेत् ॥
एतत् सर्पिः प्रयुञ्जानः शुद्धदेहो नरः सदा ।
मूत्रदोषान् जयेत् सर्व्वानन्ययोगैः सुदुर्ज्जयान् ॥
जयेच्छोणितदोषांश्च बन्ध्या गर्भं लभेत च ।
नारी चैतत् प्रयुञ्जाना योनिदोषात् प्रमुच्यते ॥ २८ ॥
बलाकोलास्थिमधुकं श्वदंष्ट्राऽथ शतावरी ।
मृणालञ्च कशेरुश्च वीजानीक्षुरकस्य च ॥
सहस्रवीर्य्यांशुमती पयस्या सह कालया ।
शृगालविन्नातिबला हंसवर्णीयो गणस्तथा ॥
एतानि समभागानि मतिमान् सह साधयेत् ।
चतुर्गुणेन पयसा गुडस्य तुलया सह ॥
द्रोणावशिष्टं तत् पूतं पचेत् तेन घृताढ़कम् ।

फलशब्दोऽत्र बुद्धा समाकृष्यतया चकारेणाकृष्य परेणान्वीयते । अत्र मिलितयोः क्षौद्रसर्पिषोरर्द्धभागं स्वयंगुप्ताफलादीनां चूर्णमादातुमिदमुच्यते स्वयंगुप्तेति । क्षीरोत्थं सर्पिः क्षीरसर्पिः पाणितलं कर्षः ॥ २४।२८ ॥

बलेति । सहस्रवीर्य्या दूर्व्वा, अंशुमती शालपर्णी, पयस्या क्षीरकाकोली, काला कालानुसारिवा, शृगालविन्ना पृश्निपर्णी, अतिबला गोरक्षतण्डुला ; हंसवर्णीयो गणः सू' १८ शे उपदिष्टः काकोल्यादिः । आयुर्व्वेद इदमामनन्ति । "क्वाथ्याच्चतुर्गुणं वारि, पादस्थं स्याच्चतुर्गुणम् ।" "स्नेहात्," इति तदत्र चतुर्गुणपदेन द्रोणचतुष्टयमेव प्रत्येतव्यमभवति द्रोणावशिष्टेन क्वाथेन घृताढ़क

तत्सिद्धं कलसे स्थाप्यं क्षौद्रप्रस्थेन संयुतम् ॥
सर्पिरेतत् प्रयुञ्जानो मूत्रदोषात् प्रमुच्यते ॥ २८ ॥
चित्रकः सारिवा चैव बला कालानुसारिवा ।
द्राक्षा विशाला पिप्पल्यस्तथा चित्रबला भवेत् ॥
तथैव मधुकं पथ्यां दद्यादामलकानि च ।
घृताढ़कं पचेदेभिः कल्कैः कर्षसमन्वितैः ॥
क्षीरद्रोणे जलद्रोणे तत्सिद्धमवतारयेत् ।
शीतं परिस्रुतं चैव शर्कराप्रस्थसंयुतम् ॥
तुगाक्षीर्य्याश्च तत्सर्व्वं मतिमान् परिमिश्रयेत् ।
ततो मितं पिबेत् काले यथादोषं यथाबलम् ॥
वातरेताः श्लेष्मरेताः पित्तरेतास्तु यो भवेत् ।
रक्तरेता ग्रन्थिरेताः पिबेदिच्छन्नरोगताम् ॥
जीवनीयं च वृष्यं च सर्पिरेतद्बलावहम् ।
प्रजाहितं च धन्यं च सर्व्वरोगापहं शिवम् ॥
सर्पिरेतत् प्रयुञ्जाना स्त्री गर्भं लभतेऽचिरात् ।

पाकविधानात् । तथाच समघृतानि बलादीनि क्वाथ्यानि चतुःपलाधिकोनविंशति शरावपरिमितानि गुड़तुला चेति द्रोणमितं क्वाथ्यं जलद्रोणचतुष्टये विपाच्य पादावशिष्टेन तेन क्वाथेन घृताढ़कं पचेदिति निष्कर्षः ॥ २८ ॥

चित्रकइति । चित्रफलानामौषधी "गुर्म्मि" इति विज्ञायते । अत्र

असृग्दोषान् जयेच्चापि योनिदोषांश्च संहतान् ।
मूत्रदोषेषु सर्व्वेषु कुर्य्यादेतच्चिकित्सितम् ॥ ३० ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे मूत्राघातप्रतिषेधो
नामाष्टपञ्चाशोऽध्यायः ॥ ५८ ॥

तुगाचार्य्याश्चापि प्रश्नमेवादित्सन्ति भिषजः प्रश्नाधिकरणात् । परिशिष्टं निगदव्याख्यातम् ॥ ३० ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
उत्तरतन्त्रे मूत्राघातप्रतिषेधोनामाष्टपञ्चाशत्तमोऽध्यायः ॥

एकोनषष्टितमोऽध्यायः।

अथातो मूत्रकृच्छ्रप्रतिषेधमध्यायं व्याख्यास्यामः ॥ १ ॥

वातेन पित्तेन कफेन सर्व्वैस्तथाभिघातैः शकृदश्मरीभ्याम्।
तथापरः शर्करया सुकष्टो मूत्रोपघातः कथितोऽष्टमस्तु ॥२॥

अल्पमल्पं समुत्पीड्य मुष्कमेहनवस्तिभिः।
फलद्भिरिव कृच्छ्रेण वाताघातेन मेहति ॥

यथा च मूत्राघाते कृच्छ्रेण मूत्रयत्यातुरो नियमेन तथैव मूत्रकृच्छ्रेऽपीति कृच्छ्रमूत्रत्वमाधर्म्म्यादिदानीं मूत्रकृच्छ्रमधिकरोति अथात इत्यादिना। मूत्रस्य कृच्छ्रं कृच्छ्रता यत्र तं तथोक्तम्। नन्वेकान्ततो व्यर्थोऽयमारम्भो मूत्राघात-जातीयतया, तेनैव समुपदेशार्हत्वात्। न तावत् व्यर्थः, मूत्रोपघात-विनाकृतत्वेन तद्विजातीयत्वात्। न चैतदश्रद्धेयम्। मूत्राघाते हि मूत्रं चरति संरुद्ध तथा·········विरमूत्रानिलसंग्रह इत्येवं मूत्रोपघाताभिव्यञ्जकानि वचनानि व्याजहार, व्याहरति चेह कृच्छ्रेण मेहतीत्येवं केवलं कृच्छ्रमूत्र-त्वाभिव्यञ्जकानि तानि तानि वचनानि। न च तावदेवं गते मूत्रकृच्छ्रं प्रकृत्य मूत्रोपघातः कथितोऽष्टमोऽस्तु इत्युपपूर्व्वस्य हन्तेः प्रयोगोऽनुपपन्न इत्यपि वाच्यम्। जीवत्सु "सिंहो माणवकः" इत्येवं प्रयोगकर्त्तृषु पूर्व्वाचार्य्येषु कथमपीति ब्रूमः ॥ १ ॥

भगवन् प्राङ्मूत्राघाता द्वादश उपदिष्टाः तद्देशीयोऽयं रोगस्तु पुनः कतिधा भिद्यते इत्येवमाशंसूनपाकरोति वातेनेति। मूत्रोपघातसाम्यात् मूत्रकृच्छ्रसमाख्योऽयं रोगोऽत्र मूत्रोपघात उच्यते एतच्चवोचामोपक्रम एव ॥ २ ॥

हारिद्रमुष्णं रक्तं वा मुष्कमेहनवस्तिभिः ।
अग्निना दह्यमानाभैः पित्ताघातेन मेहति ॥
स्निग्धं शुक्लमनुष्णञ्च मुष्कमेहनवस्तिभिः ।
संहृष्टरोमा गुरुभिः श्लेष्माघातेन मेहति ॥
दाहशीतरुजाविष्टो नानावर्णं मुहुर्मुहुः ।
ताम्यमानः सुकृच्छ्रेण सन्निपातेन मेहति ॥ ३ ॥
मूत्रवाहिषु शल्येन क्षतेष्वभिहतेषु च ।
स्रोतःसु मूत्राघातस्तु जायते भृशवेदनः ।
वातवस्तेस्तु तुल्यानि तस्य लिङ्गानि लक्षयेत् ॥ ४ ॥
शकृतस्तु प्रतीघाताद्वायुर्विगुणतां गतः ।
आध्मानञ्च सशूलञ्च मूत्रसङ्गं करोति हि ।
अश्मरीहेतुकः पूर्व्वं मूत्राघात उदाहृतः ॥ ५ ॥
अश्मरी शर्करा चैव तुल्ये सम्भवलक्षणैः ॥
शर्करायां विशेषन्तु शृणु कीर्त्तयतो मम ।
पच्यमानस्य पित्तेन भिद्यमानस्य वायुना ।
श्लेष्मणोऽवयवा भिन्नाः शर्करा इति संज्ञिताः ॥
हृत्पीड़ा वेपथुः शूलं कुक्षौ वह्निः सुदुर्ब्बलः ।
ताभिर्भवति मूर्च्छा च मूत्राघातश्च दारुणः ॥

अल्पमिति । फलद्भिरिति "ञिफला विशरणे" "फल भेदने" वा धातुः । शरीरं पीड़यद्भिभिन्दद्भिर्वेत्यर्थः । अत्र परिगणनकाले परिगणितोऽप्यश्मरीहेतुको मूत्रकृच्छ्रः पुनर्लक्षणतो नोपदिश्यते अश्मरीनिदाने प्रागुपदेशात्, तस्यैव व्याजेनोपदेष्टुमिदमुच्यते अश्मरीति ॥ ३—५ ॥

अश्मरी-शर्करयोस्तुल्यतां निवेदयति अश्मरीति । एवं तुल्यत्वनिवेदनेनैव

मूत्रवेगनिरस्तासु तासु शाम्यति वेदना ।
यावदन्या पुनर्नैति गुडिका स्रोतसो मुखम् ॥
शर्करासम्भवस्यैतन्मूत्राघातस्य लक्षणम् ॥ ६ ॥
चिकित्सितमतःऽर्द्धमष्टानामपि वक्ष्यते ।
अश्मरीञ्च समाश्रित्य यदुक्तं प्रसमीक्ष्य तत् ॥
यथादोषं प्रयुञ्जीत स्नेहादिकमपि क्रमम् ॥ ७ ॥
श्वदंष्ट्राश्मभिदौ कुम्भीं वृषां कण्टकारिकाम् ।
बलां शतावरीं रास्नां वरुणां गिरिकर्णिकाम् ॥
तथा विदारिगन्धादिं संहृत्य त्रैवृतं पचेत् ।
तैलं घृतं वा तत् पेयं तेन चाप्यनुवासनम् ॥
दद्यादुत्तरवस्तिञ्च वातकृच्छ्रोपशान्तये ॥
श्वदंष्ट्रास्वरसे तैलं सगुडक्षीरनागरम् ।
पक्त्वा तत् पूर्व्ववद्योज्यं तत्रानिलरुजापहम् ॥ ८ ॥
तृणोत्पलादिकाकोली-न्यग्रोधादिगणे कृतम् ।
पीतं घृतं पित्तकृच्छ्रं नाशयेत् क्षिप्रमेव च ॥
दद्यादुत्तरवस्तिञ्च पित्तकृच्छ्रोपशान्तये ॥
एभिरेव कृतः स्नेहस्त्रिविधेष्वेव वस्तिषु ।
हितं विरेचनस्वेक्षु-क्षीरद्राक्षारसैर्युतम् ॥

प्रागुक्तान्यश्मरीनिमित्तमूत्रकृच्छ्रलिङ्गानि शर्करानिमित्ते मूत्रकृच्छ्रे एकान्तत उद्भावनीयानीति बुद्धिमतोह्यम् । शर्करानिमित्ते पुनर्विशेषयति हृत्पीडेति श्वदंष्ट्रेति । कुम्भीवारिपर्णी, "पाना" इति प्रथते । वृषा रक्तचन्दनाभः काष्ठभेदः "पाडव" इति विज्ञायते । तिसृभिः सर्पिस्तैलवसाभिर्हृतं त्रिहृतमेव त्रैवृतम् ॥ ६।८॥

एभिरिति । त्रिविधेषु वस्तिषु निरूहानुवासनोत्तरवस्तिषु ।

सुरसोषकमुस्तादौ-वरुणादौ च संस्कृतम् ।
तैलं तथा यवाग्वादि कफकृच्छ्रे प्रशस्यते ॥
यथादोषोच्छ्रयं कुर्य्यादेतामेव च सर्व्वजे ।
फल्गुवृश्चीरदर्भाश्मसारचूर्णञ्च वारिणा ।
सुरेक्षुरसदर्भाम्बु पीतं कृच्छ्ररुजापहम् ॥ ९ ॥
तथाभिघातजे कुर्य्यात् सद्योव्रणचिकित्सितम् ॥ १० ॥
मूत्रकृच्छ्रे शकृज्जाते कार्य्या वातहरी क्रिया ॥ ११ ॥
स्वेदावगाहावभ्यङ्गा वस्तिचूर्णक्रियास्तथा ।
ये द्वे त्वन्ये तथाकृच्छ्रे तयोः प्रोक्तः क्रियाविधिः ॥१२॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे मूत्रकृच्छ्रप्रतिषेधो नामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥

फल्ग्विति । फल्गु काकोडुम्बरिकाफलम्, वृश्चीरो नामौषधिः "विसखपरा" इति परिचीयते, अश्मसारः शिलाजतु वारिणा पीतं पीतञ्च सुरादिकं कृच्छ्ररुजापहमित्यन्वयः । ये इति । ये अश्मरीशर्करोत्थे द्वे मूत्रकृच्छ्रे तयोः क्रियाविधिः प्रोक्तोऽश्मरीचिकित्सिते इति शेषः । परिशिष्टं निगदव्याख्यातम् ॥ ९—१२ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे मूत्रकृच्छ्रप्रतिषेधोनाम एकोनषष्टितमोऽध्यायः ॥

षष्टितमोऽध्यायः।

अथातोऽमानुषप्रतिषेधमध्यायं व्याख्यास्यामः ॥ १ ॥

निशाचरेभ्यो रक्ष्यस्तु नित्यमेव क्षतातुरः ।
इति यत् प्रागभिहितं विस्तरस्तस्य वक्ष्यते ॥ २ ॥
गुह्यानागतविज्ञानमनवस्थाऽसहिष्णुता ।
क्रिया वाऽमानुषी यस्मिन् स ग्रहः परिकीर्त्त्यते ॥

अवसितन्तावत् कायचिकित्सितं नाम। इदानीन्तूपक्रमागतां भूतविद्यामेव प्रवर्त्तयिष्याम इत्यभिसन्धाय उद्देशमनुसरन्नमानुषोपसर्गप्रतिषेधमधिकरोति अथात इत्यादिना। परमतोदेवादीनामुपदेशादमानुषेति पर्य्युदासवृत्तिकोऽयं नञ् इत्यवश्यं वक्तव्यम्। वदन्ति हि "यदग्रे सन्दिग्धं तच्छेषान्निर्णीयते" इति, तथाच जननमरणशीलत्वेन मानुषसदृशाः, त्रिदशत्वादिना च ततो भिन्ना देवादय एव अमानुषशब्देनाभिप्रेयन्ते, इत्यवगन्तव्यम्, त एव हि "श्रियं विन्दति सौमित्रे पञ्चविंशतिवर्षवत्" इति रामायणस्मरणात् सदा पञ्चविंशतिवर्षीया इव प्रतिभान्ति विबुधत्वादिना चोपदिश्यन्ते। तथाच जन्मस्थितिविनाशात्मिकाभिस्तिसृभिर्दशाभिर्विबुधत्वादिना चाभिव्यज्यन्ते न पुनर्मानुषवत् वृद्धिपरिणामक्षयादिभिरित्यध्यवसेयम् ॥ १ ॥

निशेति। प्रागिति क्षिप्रणीयमनुसन्धत्ते। गुह्येति। गुह्यं रहस्यम्। अनागतं भावि, अनयोर्विज्ञानं गुह्यानागतविज्ञानम्। अनवस्था अनवस्थितिश्चञ्चलत्वमित्येतत्। असहिष्णुता अक्षमत्वं, अमानुषी क्रिया मनुष्येण पाषाणखण्डारोपतुङ्गधारणं दन्तेन वारिद्रोणपरिपूरितकलसाहरणादिक-

अशुचिं भिन्नमर्य्यादं क्षतं वा यदि वाक्षतम् ।
हिंस्युर्हिंसाविहारार्थं सत्कारार्थमथापि वा ॥ ३ ॥
असंख्येया ग्रहगणा ग्रहाधिपतयस्तु ये ।
व्यज्यन्ते विविधाकारा भिद्यन्ते ते तथाष्टधा ॥ ४ ॥
देवास्तथा शत्रुगणाश्च तेषां गन्धर्व्वयक्षाः पितरो भुजङ्गाः ।
रक्षांसि या चापि पिशाचजातिरेषोऽष्टको देवगणो ग्रहाख्यः ॥५॥
सन्तुष्टः शुचिरपि चेष्टगन्धमाल्यो
निस्तन्द्रो ह्यवितथसंस्कृतप्रभाषी ।
तेजस्वी स्थिरनयनो वरप्रदाता
ब्रह्मण्यो भवति च यः स देवजुष्टः ॥६॥

त्वालौकिकं कर्म । अशुचिमिति । भिन्नमर्य्यादं न्यायपथमतिक्रान्तम् हिंस्युः राविश्य दुःखमापादयन्ति, इत्युक्तम् "निशाचरेभ्यो रक्षस्तु नित्यमेव क्षतातुरः" इत्याकूतम् ॥ २।३ ॥

असंख्येया इति । च शब्दस्यानाधिष्ठानोऽयं तुशब्दस्तदयमर्थः । विविधाकारा ये असंख्येया ग्रहगणा ग्रहाधिपतयश्च ते अष्टधा भिद्यन्ते अतोऽष्टावेव तानधिकृत्य कथयिष्याम इत्यभिसन्धायाह देवा इति । देवशत्रवोऽपि पूर्व्वं देवा आसन् पश्चात् देवात्भ्रष्टतया "पूर्व्वदेवासुरद्विष" इत्येवं पूर्व्वदेवेति पर्य्यायशब्देनाभिधीयन्ते तदेषां देवत्वं निरङ्कुशं भवति, गन्धर्व्वादयश्च देवादिकारणत्वात् "भूतोऽमी देवयोनय" इत्येवं कोषकारादिभिरपि देवयोनय उच्यन्ते, अनयैव दिशा "यः सदा देवयोनिषु" इति देवोमाहात्म्यमपि लक्षयन्ति बुद्धिमन्तः । तदिदं साम्प्रतमुक्तम् "देवगणो ग्रहाख्यः" इति । अष्टौ परिमाणमस्येत्यष्टकः ॥ ४।५ ॥

क्रमेण देवादिग्रहजुष्टानां लक्षणान्युपदिदिक्षति सन्तुष्ट इति । इष्टे अभिलषिते प्रिये वा गन्धमाल्ये यस्येति इष्टगन्धमाल्यः सत्यं संस्कृतञ्च प्रभाषितुं शीलमस्येत्यवितथसंस्कृतप्रभाषी स्थिरनयनोऽनिमिषनयनोऽचञ्चलनयन इत्यर्थः । ब्रह्मणो हितो ब्रह्मण्यः विप्रवेदरक्षणकर्त्तेत्यर्थः । "नमो ब्रह्मण्यदेवाय" इति

संस्वेदी द्विजगुरुदेवदोषवक्ता
जिह्माक्षो विगतभयो विमार्गदृष्टिः ।
सन्तुष्टो भवति नचान्नपानजातै-
र्दुष्टात्मा भवति च देवग्रहजुष्टः ॥ ७ ॥
हृष्टात्मा पुलिनवनान्तरोपसेवी
स्वाचारः प्रियपरिगीतगन्धमाल्यः ।
नृत्यन् वा प्रहसति चारु चाल्पशब्दं
गन्धर्व्वग्रहपरिपीड़ितो मनुष्यः ॥ ८ ॥
ताम्राक्षः प्रियतनुरक्तवस्त्रधारी
गम्भीरो द्रुतमतिरल्पवाक् सहिष्णुः ।
तेजस्वी वदति च किं ददामि कस्मै
यो यक्षग्रहपरिपीड़ितो मनुष्यः ॥ ९ ॥
प्रेतेभ्यो विसृजति संस्तरेषु पिण्डान्
शान्तात्मा जलमपि चापसव्यवस्त्रः ।
मांसिप्सुस्तिलगुड़पायसाभिकाम-
स्तद्भक्तो भवति पितृग्रहाभिभूतः ॥ १० ॥

विष्णुपत्नामनन्यत । संस्वेदीति । संस्वेदो सततं स्वेदेनानुविद्धः । जिह्माक्षो वक्रनयनः । विमार्गदृष्टि रसत्पथावलम्बी, ताम्राक्ष इति । द्रुतमतिश्चपल-बुद्धिः । प्रेतेभ्य इति । संस्तरेषु आस्तीर्णकुशेषु, जलमपि विसृजति तर्पयतीत्यर्थः । अपसव्यवस्त्रो वामकरं बहिष्कृत्य दक्षिणस्कन्धार्पितवस्त्रः । प्राचीनावीतीति यावत् । आम्नायते हि "सव्यं बाहुं समुद्धृत्य दक्षिणे तु द्विजातयः । प्राचीना-वीतमित्युक्तं पैत्रे कर्मणि योजयेत्" ॥ इति । तद्भक्तो मांसादिभोजनः । अत्र

भूमौ यः प्रसरति सर्पवत् कदाचित्
सृक्कण्यौ विलिहति जिह्वया प्रसक्तम् ।
निद्रालुर्गुडमधुदुग्धपायसेप्सु-
र्विज्ञेयो भवति भुजङ्गमेन जुष्टः ॥ ११ ॥
मांसासृग्विविधसुराविकारलिप्सु-
र्निर्लज्जो भृशमतिनिष्ठुरोऽतिशूरः ।
क्रोधालुर्विपुलबलो निशाविहारी
शौचद्विड् भवति च रक्षसा गृहीतः ॥ १२ ॥
उद्धस्तः कृशपरुषश्चिरप्रलापी
दुर्गन्धो भृशमशुचिस्तथातिलोलः ।
बह्वाशी विजनहिमाम्बुरात्रिसेवी
व्याचेष्टं भ्रमति रुदन् पिशाचजुष्टः ॥ १३ ॥
स्थूलाक्षस्त्वरितगतिः स्वफेनलेही
निद्रालुः पतति च कम्पते च योऽति ।

तदिति तदा बुद्धया समाकृष्टतया उपसर्जनीभूतानां मांसादीनां परामर्शो नानुपपन्नः "दुःखत्रयाऽभिघाताज्जिज्ञासा, तदवघातके हेतौ" इति साङ्ख्यकारिकावत् । भूमाविति । सृक्कपर्य्यायोऽयं सृक्कणीशब्दः "स सृक्कणीप्रान्तमसृक्प्रदिग्धं प्रलेलिहानो हरिणारिरुच्चैः" इत्यमरटीकायां रघुनाथस्य । सृक्कण्यावोष्ठप्रान्ताविति । उद्धस्त इति । उद्धस्त ऊर्द्ध्वबाहुः । अतिलोलो नितरां चञ्चलः । व्याचेष्टं विकृताङ्गविक्षेपम् ॥९—१३॥

स्थूलाक्षत्वादिनार्द्धश्लोकोक्तलक्षणो म्रियते तथा पर्व्वतादिविच्युतिसमकाले यो ग्रहो यक्षेण संसृज्यते सोऽपीत्युपदेष्टमिदमुच्यते स्थूलेति । दृष्टस्य भावो

यस्माद्द्विद्विरदनगादिविच्युतः सन्
संस्पृष्टो न भवति वार्षिकेन जुष्टः ॥ १४ ॥
देवग्रहाः पौर्णमास्यामसुराः सन्ध्ययोरपि ।
गन्धर्व्वाः प्रायशोऽष्टम्यां यक्षाश्च प्रतिपद्यथ ॥
कृष्णपक्षे च पितरः पञ्चम्यामपि चोरगाः ।
रक्षांसि निशि पैशाचाश्चतुर्द्दश्यां विशन्ति च ॥ १५ ॥
दर्पणादीन् यथा च्छाया शीतोष्णं प्राणिनो यथा ।
स्वमणिं भास्करस्योस्रा यथा देहञ्च देहधृक् ।

वार्षिकं, तेन जुष्टो न भवति हृष्टस्तेन्म्रियत इति निष्कर्षः । श्लोकेऽस्मिंश्चतुर्थपादः "सोऽसाध्यो भवति तथा त्रयोदशाब्दे इत्येवं केनचित् पठ्यते च । देवेति । विशन्ति मानुषशरीरं प्रविशन्तीत्यर्थः ॥१४—१५॥

ननु ग्रहाणां सति शरीरप्रवेशेऽभ्युपगते विशन्तस्ते कथं न दृश्यन्ते इत्याशङ्कां दृष्टान्तेनापनयति दर्पणादीनिति । यत्रादिना जलतैलादीनामादेशः क्रियते । दर्पणादिषु प्रविशन्ती छाया यथा न दृश्यते तथैव प्रविशन्तो ग्रहा अपीति हृदयम् । नन्विदमश्रद्धेयं छायाया दृष्टिविभ्रमत्वेनाभ्युपगमात् । तथाचाहुः "एवं विशालपुरुषाभिमुखेष्वादर्शोदकादिषु स्वच्छेषु चाक्षुषं तेजो लग्नमपि बलीयसा शौर्येण तेजसा प्रतिस्रोतः प्रवर्त्तितं मुखसंयुक्तं मुखं ग्राहयत् दोषबलात् तद्देशतामनभिमुखताञ्च मुखस्याग्राहयत् पूर्व्वदृष्टाभिमुखं दर्शोदकदेशता माभिमुख्यञ्च मुखस्यारोपयतीति प्रतिबिम्बविभ्रमोऽपि लक्षितो भवति" इति, तत्र-भवन्तो वाचस्पतिमिश्राः ; भामती १ पं १ सूं । एवञ्च छायावेशादर्शनं वाग्वस्तुमात्रमेवेति राद्धान्तः । एवं ये प्रत्यवतिष्ठन्ते तानपाकर्त्तुं दृष्टान्तान्तरमुपन्यस्यति शीतोष्णमिति । शीतोष्णपदेनेह तदाश्रय एवोपलभ्यते, गुणानां पृथगवस्थानानुपपत्तेः । प्राणिनः इति, प्राणिशब्देनेह प्राणवच्छरीराण्येव प्रतीयन्ते न पुनर्जीवाः, तेषु शीतोष्णादिप्रवेशस्यैकान्ततोऽसम्भवात् । ननु किमिदमुच्यते

विशन्ति च न दृश्यन्ते ग्रहास्तद्वच्छरीरिणाम् ॥ १६ ॥
तपांसि तीव्राणि तथैव दानं व्रतानि धर्म्मो नियमश्च सत्यम् ।
गुणास्तथाष्टावपि तेषु नित्या व्यस्ताः समस्ताश्च यथाप्रभावम् ॥

शीतोष्णं प्राणिन इति, यदैव हि प्राणिशरीरेषु शीतोष्णं प्रविशति तदैव तच्चिह्नं ग्रमुपलभ्यते स्पर्शेन, न च तावत् त्वाचप्रत्यक्षमचाप्रत्यक्षमेवेति वक्तुं साम्प्रतम्, दृश्यन्त इति दृशिर्हि प्रत्यक्षसामान्यपरः एवेति गम्यते दार्ष्टान्तिके तदभावस्यैवाभिप्रेयमाणत्वात् । एवं विवक्षूनपास्यन् दृष्टान्तान्तरमुपन्यस्यति स्वमणिमिति । इदमत्रावधेयम् । मण्यन्तराणि हि स्वरूपेण प्रविशन्तो भास्करस्योस्रा यथास्वरूपं दृश्यन्ते मणिस्तु पुनः सूर्य्यकान्तं समेत्याग्निस्वरूपेण परिणम्यमाना चक्षुर्भ्यां सहस्रैरपि द्रष्टुं न शक्यन्ते तदिदं साम्प्रतमुक्तं स्वमणिमिति । उस्रा मयूखाः । भगवन्नेतावतापि सम्यक् प्रत्ययो जायते । दृश्यन्ते हि भास्करस्योस्राः समेत्य अग्निरूपेण परिणम्यमानाः प्रविशन्तः स्वमणिप्रभाभिभूतसंसिक्तलोहितवर्णाः सन्तः श्वेतोज्ज्वलज्योतिषा प्रतिभान्ति नीलोज्ज्वलज्योतिषा नीलकाचावृतदीपवदिति ; तद्भूयोऽपि विशदं विज्ञापयतु भगवान् नः कृतार्थीकर्त्तुमित्येवमनुनीतस्तां स्तानन्तेवासिनः प्रीणयन्ननुरूपं दृष्टान्तमुपन्यस्यति यथा देहमिति । देहं गर्भाशयस्थं संसृष्टं शुक्रशोणितम् । देहभृक् जीवः ॥ १६ ॥

नेह तैस्तैर्देवादिशब्दैर्देवादयः प्रत्येतव्याः किन्तर्हि तदनुचरा एव, देवादीनां मानुषशरीरावेशासम्भवात् इत्येवावेदयितुमुपोद्घातसङ्गत्या प्रथमन्तावत् तेषां तपआदियोगयुक्तत्वं निवेदयति तपांसीति । व्रतानि शास्त्रविहितानि पुण्यसाधनानि कर्म्माणि । धर्म्मोऽभ्युदयनिःश्रेयससाधनं कर्म्म । "यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्म्मः" इति भगवान् कणादः । नियम उपवासादिः । "शौचसन्तोषस्वाध्यायेश्वरप्रणिधानानि नियमाः," तथा "नियमस्तु स यत् कर्म्मानित्यमागन्तुसाधनम्" इति हि पातञ्जलादौ स्मर्य्यते ; अष्टौ गुणा अणिमाद्याः प्राग् वेदोत्पत्तावुपदिष्टाः । व्यस्ताः भिन्नाः त्रिचतुष्काः पञ्चषट्का वा । अत्र यथाप्रभावमिति विशेषणात् व्यस्तागुणा असुरादिग्रहाणां समस्ताश्च देवग्रहाणामित्यवसेयम् ।

न ते मनुष्यैः सह संविशन्ति न वा मनुष्यान् क्वचिदाविशन्ति ।
ये त्वाविशन्तीति वदन्ति मोहात् ते भूतविद्याविषयादपोह्याः ॥
तेषां ग्रहाणां परिचारका ये कोटीसहस्रायुतपद्मसंख्याः ।
असृग्वसामांसभुजः सुभीमा निशाविहाराश्च तमाविशन्ति ॥ १७

निशाचराणां तेषां हि ये देवगणसंस्मृताः ।
ते तु तत्सत्त्वसंसर्गाद्विज्ञेयास्तु तदञ्जनाः ॥
देवग्रहा इति पुनः प्रोच्यन्ते शुचयश्च ये ।
देववच्च नमस्यन्ते प्रत्यर्थ्यन्ते च देववत् ॥

नन्वञ्जसा एवं गुणयोगयुक्ता देवादयः कथमपि मानुषैः सह स्वपन्त्याविशन्ति वा तेषां शरीराणीत्यावेदयितुमिदमुच्यते नेति। अपोह्या वाह्याः। तर्ह्येवं के नाम तावदविशन्ति? आह—तेषामिति। ग्रहाणामिति। गृह्यन्ते ग्रस्यन्ते स्वपरिचारकलक्षणेनेति व्युत्पत्त्या ग्रहा। पद्मो दशशङ्खाः। "एकं दश शतञ्चैव सहस्रमयुतं तथा। लक्षञ्च नियुतञ्चैव कोटिरर्बुदमेव च॥ वृन्दः खर्वो निखर्वश्च शङ्ख-पद्मौ च सागरः। अन्त्यं मध्यं परार्द्धं च दश वृद्ध्या यथोत्तरम्" इति स्मरणात्॥ १७॥

नन्विदमश्रद्धेयम्, यदि हि तत्तद्ग्रहाणां परिचारका एवाविशन्तीति स्वीक्रियते कथन्तर्हि अवितथसंस्कृतप्रभाषित्वादीनि तानि तानि कर्म्माणि तेजस्वित्वादयस्ते च ते च गुणा स्तेषु तेषु ग्रहजुष्टेषु मानुषेषु समुपलभ्यन्ते इत्येवंवादिनो निरस्यन्नाह निशेति। अत्र तृतीयपादे तच्छब्दोपादानात् देवेत्यादौ यच्छब्दोऽध्याहार्य्य स्तदयमर्थः ये यद्देवगणसंस्मृता स्ते तत्सत्वसंसर्गात् तदञ्जनाः तत्तत् ग्रहगुणेनान्विता इत्यर्थः; "अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु" इति धात्वर्थस्मरणात्। ग्रहेष्वेतेषु मध्ये देवग्रहान् पुनः कथञ्चिद्विशि-नष्टि देवेति। ये तु पुन र्ग्रहाः शुचयस्ते देवग्रहा इति प्रोच्यन्ते। येनोक्तं "सन्तुष्टः शुचिरपि" इति, ते देववन्नमस्यन्ते नमस्क्रियन्ते देववच्च प्रत्यर्थ्यन्ते प्रार्थ्यन्ते च प्रतिशब्दोऽत्रार्थतो न विवक्ष्यते। "विशुद्धाश्च प्रतिपक्षः" तथा "प्रतिपूज्य

स्वामिशीलक्रियाचारक्रमा एव सुरादिषु ।
निर्ऋतेर्या दुहितरस्तासां सप्रसवाः स्मृताः ॥ १८ ॥
सत्यत्वादप्रवृत्तेषु वृत्तिस्तेषां गणैः कृता ॥
हिंसाविहारा ये केचिद्दिव्यं भावमुपाश्रिताः ।
भूतानीति कृता संज्ञा तेषां संज्ञाप्रवक्तृभिः ॥ १९ ॥

यथान्यायम्" इति मनूक्तवत् । प्रतिपूज्य पूजयित्वेति तदर्थः । यथा प्रत्यर्थ्यन्ते इति प्रतिपूर्वस्यार्थयतेर्विपक्षार्थत्वात् विपक्षीक्रियन्ते अनमस्कृतास्ताभिरिति शेषः । एतेनैतदुक्तं भवति—देवा यथा अपूजिता विपक्षी भवन्ति तथैव तदनुचरा अपीति । उक्तमर्थं दृढ़यति स्वामीति । शक्तावपरपर्य्यायोऽयं क्रमशब्दः "क्रमश्चानुक्रमे शक्तौ" इति मेदिनी च । तदयमर्थः । सुरादिषु देवादिपरिचारकग्रहेषु स्वामिशीलक्रियाचारक्रमाः, तत्तद्भर्तृभूतदेवासुरादिवत् शीलक्रियाचारशक्तयः संसिद्धा इति शेषः । नन्विह जिज्ञास्यं पुनरापतेत् यदि हि देवादिग्रहपरिचारकाणां स्वामिशीलक्रियाचारक्रमाः संसिद्धा स्युस्तर्हि "न ते मनुष्यैः सह संविशन्ति न वा मनुष्यान् क्वचिदाविशन्ति" इत्युच्चैः कथयता भगवता कथमुच्यते "तेषां ग्रहाणां परिचारका ये" इत्युपक्रम्य "तमाविशन्ति" इत्येवं विप्रतिपन्नानपाकरोति निर्ऋतेरिति । निर्ऋतिर्नाम दक्षिण-पश्चिमदिक्पती राक्षसविशेषः । "निर्ऋतौ राक्षसेश्वरः" इति ८१ अं कालिका-पुराणम् । सह समानः प्रसवः उत्पत्तिर्येषां ते सप्रसवाः । दुर्योधनादिवत् सहोत्पन्ना इति निष्कर्षः । एतावता मातृदोषविगर्हितत्वेन दुश्चिकित्स्यादाविशन्तीत्यनुसन्धेयम् । अत्र "स्वामिशीलक्रियाचाराः क्रम एव सुरादिषु । निर्ऋते र्या दुहितरस्तासां स प्रसवः स्मृतः ॥" इत्यनवबोध-परिपठितः पाठः ॥ १८ ॥

नन्वेवंलक्षणास्ते कान् पुनर्मानवानाविशन्तीत्याह सत्यत्वादिति । सत्यत्वं सत्यं देवो देवतेतिवत् तद्धितोऽयमनन्यार्थः । अप्रवृत्तेषु पराङ्मुखेषु । वृत्तिर्जीविका, सा चेह असृग्वसाद्युपहाररूपैवेतिनेयम् । गणैरिति गणशब्देनेह स्वामिभूता देवादय एवाभिप्रेयन्ते ॥ १९ ॥

ग्रहसंज्ञानि भूतानि यस्माद्वेत्त्यनया भिषक्।
विद्यया भूतविद्यात्वमत एव निरुच्यते ॥ २० ॥
तेषां शान्त्यर्थमन्विच्छन् वैद्यस्तु सुसमाहितः।
जपैः सनियमैर्होमैरारभेत चिकित्सितुम् ॥
रत्नानि गन्धमाल्यानि वीजानि मधुसर्पिषी।
भक्ष्याश्च सर्व्वे सर्व्वेषां सामान्यो विधिरुच्यते ॥
वस्त्राणि मद्यमांसानि चीराणि रुधिराणि च।
यानि येषां यथेष्टानि तानि तेभ्यः प्रदापयेत् ॥ २१ ॥

इदानीं भूतविद्येति शब्दं निर्वक्ति हिंसेत्यादिना निरुच्यते इत्यन्तेन ग्रन्थसन्दर्भेण। हिंसाविहारा दुःखप्रदाः दिव्यं भावमुपाश्रिताः प्रागुक्ताष्टविध-देवादिग्रहाणां शीलक्रियाचारशक्तिसदृश-शीलादिमत्त्वेन तद्भावभाविताः। ग्रहसंज्ञानि भूतानि तांस्तान् परिचारकग्रहान् यस्मात् अनया विद्यया वेत्ति अतएव अस्या विद्याया भूतविद्यात्वं निरुच्यते अवयवार्थकथनेनैव समुदित-भूतविद्याशब्दार्थः कथ्यत इति यावत् ॥ २० ॥

तेषामिति। अर्थः कारणमित्यनर्थान्तरम्। "अर्थोऽभिधेये शब्दानां धनकारण-वस्तुषु" इति विश्वः। तदयमर्थः—तेषां ग्रहाणां शान्त्यर्थं शान्तिकारणं शान्त्युपायमिति यावत् अन्विच्छन् अन्वेषयन् वैद्यः सुसमाहितोऽनन्यचित्तः सन् जपादिभिश्चिकित्सितुमारभेत इति योजना। नियमास्त्वत्र शौचादयः "शौच-सन्तोष-तपः-स्वाध्यायेश्वरप्रणिधानानि नियमाः" इति पातञ्जलिदर्शने साधनपादः, "३२ सू"। अत्र सन्तोषः सन्निहितसाधनादधिकस्यानुपादित्सा, तपो व्रतनियमादि, स्वाध्यायः प्रणवादिजपः, प्रणिधानं तस्मिन् परमगुरौ सर्व्व-कर्म्मसमर्पणम्, तेषां ग्रहाणां सामान्यतोऽर्च्चनप्रकारमुपदिदिक्षति रत्नानीति। वीजानि माषसर्षपादीनि। सर्व्वे भक्ष्या मांससूपदधिदुग्धघृतपूरादयो देया इति तात्पर्य्यार्थः। एष सर्व्वेषां ग्रहाणां सामान्यः साधारणो विधिः पूजाक्रम उच्यते। अष्टेषु मध्ये ये ग्रहा यादृशानि वस्त्रादीनि अभिनन्दन्ति तादृशान्येव

हिंसन्ति मनुजान् येषु प्रायशो दिवसेषु तु ।
दिनेषु तेषु देयानि तद्भूतविनिवृत्तये ॥
देवग्रहे देवगृहे हुत्वाग्निं प्रापयेद्बलिम् ।
कुशस्वस्तिकपूपाज्य-च्छत्रपायससम्भृतम् ॥
असुराय यथाकालं विदध्याच्चत्वरादिषु ।
गन्धर्व्वस्य गवां मध्ये मद्यमांसाम्बुजाङ्गलम् ।
हृद्ये वेश्मनि यक्षस्य कुल्माषासृक्सुरादिभिः ।
अतिमुक्तक-कुन्दाब्जपुष्पैश्च वितरेद्बलिम् ।
नद्यां पितृग्रहायेष्टं कुशास्तरणभूषितम् ।
तथैवोपहरेच्चाऽपि नागाय विविधं बलिम् ।
चतुष्पथे राक्षसस्य भीमेषु गहनेषु वा ॥
शून्यागारे पिशाचस्य तीव्रं बलिमुपाहरेत् ॥ २२ ॥

तेभ्यस्तेभ्यः प्रदेयानीत्युपदिष्टमिदमुच्यते वस्त्राणीति। यथेष्टानि यथेप्सितानि। वस्त्रादीनां ग्रहगणानुयायियथेष्टता च इहोक्तं शास्त्रान्तरोक्तञ्चानुसन्धायावगन्तव्या ॥ २१ ॥

ये ये ग्रहा येषु येषु प्रागुक्तेषु पौर्णमास्यादिषु प्रायशो मानवानाविशन्ति तेषु तेष्वेव तेभ्यस्तेभ्यो बलिं दापयितुमिदमुच्यते हिंसन्तीति। सम्प्रति प्रत्येकशो ग्रहाणां पूजोपहारप्रदानादिक्रमं निवेदयति देवेति। स्वस्तिकं तण्डुलचूर्णनिर्म्मितत्रिकोणाकारद्रव्यभेदः। "घृतं स्वस्तिकसिन्दूरम्" इत्यधिवासनद्रव्यज्ञापकं वचनम्। सम्भृतं मिलितं परिपूरितं वा। यथाकालमिति सन्ध्याकालं लक्षयति तदैवाविशन्तीति प्रागुपदेशात्। अत्र बलिप्रकारानुपदेशात्, असृगादिसंसृष्टं स्वस्तिकादिकमेव बलित्वेनाहर्त्तव्यमित्युपदेशः। "असृग्वसामांसभुजः सुभीमा" इति स्मरणात्। हृद्य इति अतिमुक्तकस्तिनिशः मधुरायां तिनाश इति प्रथते। शून्येति। तीव्रं दग्ध-पूति-पर्य्युषितत्वेनोग्रगन्धम् ॥ २२ ॥

पूर्व्वमाचरितैर्मन्त्रैर्भूतविद्यानिदर्शितैः।
न शक्या बलिभिर्जेतुं योगैस्तान् समुपाचरेत्॥
अजर्क्षचर्म्मरोमाणि शल्यकोलूकयोस्तथा।
हिङ्गु मूत्रञ्च वस्तस्य धूममस्य प्रयोजयेत्॥
एतेन शाम्यति क्षिप्रं बलवानपि यो ग्रहः॥
गजाह्वा-पिप्पलीमूल-व्योषामलक-सर्षपान्।
गोधा-नकुल-मार्ज्जार-ऋष्यपित्तप्रभावितान्।
नस्याभ्यञ्जनसेकेषु विदध्याद्योगतत्त्ववित्॥
खराश्वाश्वतरोलूक-करभ-श्व-शृगालजम्।
पुरीषं गृध्रकाकानां वराहस्य च पेषयेत्।
वस्तमूत्रेण तत्सिद्धं तैलं स्यात् पूर्व्ववद्धितम्॥
शिरीषबीजं लशुनं शुण्ठीं सिद्धार्थकं वचाम्।
मञ्जिष्ठां रजनीं कृष्णां वस्तमूत्रेण पेषयेत्।
वर्त्तीश्छायाविशुष्कास्ताः सपित्ता नयनाञ्जनम्॥ २३ ॥

सम्प्रति यथोपहरणीयैर्मन्त्रै रिहोक्तैर्बलिदानादिभिश्चानुपशान्तानां ग्रहाणां धपनादिकमुपदेष्टुमिदमुच्यते पूर्व्वमिति। पूर्व्वं प्रथमं आचरितैः प्रयुक्तैरित्यर्थः। धूपनप्रकारमुपदिदिक्षति अजेति। नस्यादिकं निवेदयति गजेति। गजाह्वा गज-पिप्पली। मार्जारऋष्येति समासेऽपि 'ऋत्यकः' इति "पां सू ६।१।१२८" प्रकृतिभावः "सप्तऋषीणाम्" इतिवत्। अत्र मार्जारऋक्षेत्यपि क्वचित् पठ्यते। तैल-माह खरेति। अश्वतरो गर्दभेनाश्वायामुत्पन्नोऽश्वविशेषः। 'खचर' इत्यभिधीयते। करभश्च करिशावकः, करभश्चोष्ट्रशिशुश्चेति करभावित्थैवं करभशब्देनेह कर्य्युष्ट्रशाव-कावादेयौ। पूर्व्ववदित्यनेन नस्याञ्जनसेकेषु इत्याकृष्यते। शिरीषेति सपित्ते इति पित्तशब्देनेह मत्स्यपित्तमेव नेयम्, अतस्तृतीये नस्ये तदुपदेशसाहचर्य्यात्॥२३॥

नक्तमालफलं व्योषं मूलं श्योनाकविल्वयोः ।
हरिद्रे च कृता वर्त्तिः पूर्व्ववन्नयनाञ्जनम् ॥
सैन्धवं कटुकं हिङ्गु वयःस्थाञ्च वचामपि ।
वस्तमूत्रेण संपिष्य मत्स्यपित्तेन पूर्व्ववत् ।
ये ये ग्रहा न सिध्यन्ति सर्व्वेषां नयनाञ्जनम् ॥ २४ ॥
पुराणसर्पिर्लशुनं हिङ्गु सिद्धार्थको वचा ।
गोलोमी चाजलोमी च भूतकेशी जटा तथा ॥
कुक्कुटीसर्पगन्धा च तथा काण-विषाणिके ।
ऋष्यप्रोक्ता वयःस्था च शृङ्गी मोहनवल्लिका ॥
अर्कमूलं त्रिकटुकं लता स्रोतोजमञ्जनम् ।
नैपाली हरितालञ्च रक्षोघ्ना ये च कीर्त्तिताः ॥
सिंह-व्याघ्रर्क्ष-मार्ज्जार-द्वीपि-वाजि-गवां तथा ।
श्वाविच्छल्लक-गोधानामुष्ट्रस्य नकुलस्य च ॥

नक्तेति अत्र पूर्व्ववदिति विशेषणेन वस्तमूत्रेण संपिष्टं छायाविशुष्कं मत्स्यपित्तेन संयोज्य नयनाञ्जनं कार्य्यम् इत्याख्यापितम् । सैन्धवमिति । वयःस्था हरीतकी अत्र तत्पिष्टमिति पाठे तु टष्टोत्वेत्यूह्यम् "नपुंसकम-नपुंसकेन"—इति इत्येक शेषे एकवद्दा । अञ्जनमिदं स्तौति य इति । ये ये ग्रहा न सिद्ध्यन्ति उक्तेन केनाप्युपायेन न शान्तिमुपयन्ति नयनाञ्जनमिदं तेषां सर्व्वेषां प्रशान्तिमापादयतीत्यर्थः ॥ २४ ॥

संप्रति तैलघृतादीनां द्रव्यगणानुपदिदिक्षति पुराणेति । गोलोमी श्वेतदूर्व्वा, अजलोमी शूकशिम्बी, भूतकेशी श्वेतवचा, निर्गुण्डीति प्राञ्चः । जटा जटामांसी, कुक्कुटी शाल्मली, सर्पगन्धा छत्राकी, काणविषाणिके काकोली-क्षीरकाकोल्यौ, ऋष्यप्रोक्ता शतावरी, वयःस्था हरीतकी, मोहनवल्लिका धुस्तूर-पत्रिका व्यवहारस्तु धुस्तूरेणैव । लता प्रियङ्गुः, स्रोतोजमञ्जनं सौवीरमञ्जनम्,

विट्-त्वग्रोम-वसा-मूत्र-रक्त-पित्त-नखादयः ।
अस्मिन् वर्गे भिषक् कुर्य्यात् तैलानि च घृतानि च ॥
पानाभ्यञ्जननस्येषु तानि योज्यानि जानता ।
अवपीड़ेऽञ्जने चैव विदध्याद्गुटिकीकृतम् ॥
विदधीत परीषेके क्वथितं चूर्णितं तथा ।
उद्धूलने श्लक्ष्णपिष्टं प्रदेहे चावचारयेत् ॥
एष सर्व्वविकारांस्तु मानसानपराजितः ।
हन्यादल्पेन कालेन स्नेहादिरपि च क्रमात् ॥२५
नचायुक्तं प्रयुञ्जीत प्रयोगं देवताग्रहे ।
ऋते पिशाचादन्येषु प्रतिकूलं नचाचरेत् ।
वैद्यातुरौ निहन्युस्ते ध्रुवं क्रुद्धा महौजसः ॥ २६
हिताहितीये यच्चोक्तं नित्यमेव समाचरेत् ।
ततः प्राप्नोति सिद्धिञ्च यशश्च विपुलं भिषक् ॥ २७

इति सुश्रुतसंहितायामुत्तरतन्त्रेऽमानुसोपसर्गप्रतिषेधो
नाम षष्टितमोऽध्यायः ॥ ६० ॥

तत्र "वल्मीकशिखराकारं रूपेनीलोत्पलद्युति । स्रोतोऽञ्जनं प्रशंसन्ति तच्च प्रत्यञ्जने हितम्" इत्युक्तलक्षणम् । नैपाली मनःशिला, रक्षोघ्ना सर्जरस-गुग्गुलु-सर्षपादयः । उद्धूलनमवचूर्णनम् चूर्णावघर्षणमित्येतत् ॥ २५ ॥

नचेति । अयुक्तमशुचिद्रव्यसंसृष्टत्वेनायोग्यम् । प्रतिकूलं तीक्ष्णा-ञ्जनादिकम् प्रहारादिकञ्च । हितेति । यच्चोक्तं रक्षाशाखादिकम् परिशिष्ट मतिरोहितार्थम् ॥ २६—२७ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
उत्तरतन्त्रे अमानुषोपसर्गप्रतिषेधोनाम षष्टितमोऽध्यायः ॥

एकषष्टितमोऽध्यायः ।

अथातोऽपस्मारप्रतिषेधमध्यायं व्याख्यास्यामः ॥ १

स्मृतिर्भूतार्थविज्ञानमपस्तु परिवर्ज्जने ।
अपस्मार इति प्रोक्तस्ततोऽयं व्याधिरन्तकृत् ॥ २

मिथ्यादियोगेन्द्रियार्थ-कर्म्मणामतिसेवनात् ।
विरुद्ध-मलिनाहार-विहारकुपितैर्मलैः ॥
वेगनिग्रहशीलानामहिताशुचिभोजिनाम् ।
रजस्तमोऽभिभूतानां गच्छताञ्च रजस्वलाम् ॥
तथा काम-भयोद्वेग-क्रोध-शोकादिभिर्भृशम् ।
चेतस्यभिहते पुंसामपस्मारोऽभिजायते ॥ ३

चित्तविकृतिजनकत्वसाधर्म्यादिदानीमपस्मारप्रतिषेधमधिकरोति अथात इत्यादिना ॥ १ ॥

समासेनोपदिष्टो ह्यर्थः प्रपञ्चेन निवेदितः सन् भूयोज्ञानाऽभिवृद्धये प्रभवतीतिकृत्वा प्रथमं तावदपस्मारशब्दं निर्वक्ति स्मृतिरिति । विज्ञानं ज्ञानमित्यनर्थान्तरम् । एतावता अपस्मर्य्यते स्मृतिस्त्यज्यते यत्रेत्यपस्मार इत्याख्यानम् ॥ २ ॥

कुतः केषां वा अयमपस्मारोऽभिजायते ? आह मिथ्येति । आदिशब्देनेह विकृतिहेतुत्वादयोगातियोगावुपदिश्येते ते च मिथ्यादियोगाः यथोपदेशं पञ्चकर्म्मणामेव प्रत्येतव्या इन्द्रियार्थानां पृथगुपदेशात् । मिथ्यातियोगेति पाठे तु मिथ्यायोगेऽयोगस्यान्तर्भावः । इन्द्रियार्थाः शब्दस्पर्शरूपरसगन्धाः कर्माणि

संज्ञावहेषु स्रोतःसु दोषव्याप्तेषु मानवः ।
रजस्तमःपरीतेषु मूढ़ो भ्रान्तेन चेतसा ॥
विक्षिपन् हस्तपादौ च विजिह्मभ्रूर्विलोचनः ।
दन्तान् खादन् वमन् फेनं विवृताक्षः पतेत् क्षितौ ॥
अल्पकालान्तरश्चापि पुनः संज्ञां लभेत सः ॥
सोऽपस्मार इति प्रोक्तः स च दृष्टश्चतुर्व्विधः ।
वातपित्तकफैर्नृणां चतुर्थः सन्निपाततः ॥ ४ ॥
हृत्कम्पः शून्यता स्वेदो ध्यानं मूर्च्छा प्रमूढ़ता ।
निद्रानाशश्च तस्मिंस्तु भविष्यति भवत्यथ ॥
वेपमानो दशेद्दन्तान् श्वसन् फेनं वमन्नपि ।
यो ब्रूयाद्विकृतं सत्त्वं कृष्णं मामनुधावति ॥
ततो मे चित्तनाशः स्यात् सोऽपस्मारोऽनिलात्मकः ॥ ५ ॥
तृट्तापस्वेदमूर्च्छार्त्तो धुन्वन्नङ्गानि विह्वलः ।
यो ब्रूयाद्विकृतं सत्वं पीतं मामनुधावति ।
ततो मे चित्तनाशः स्यात् स पित्तभव उच्यते ॥
शीतहृल्लासनिद्रार्त्तः पतन् भूमौ वमन् कफम् ॥
यो ब्रूयाद्विकृतं सत्वं शुक्लं मामनुधावति ।
ततो मे चित्तनाशः स्यात् सोऽपस्मारः कफात्मकः ॥
हृदि तोदस्तृड़ुत्क्लेदस्त्रिष्वप्येतेषु संख्यया ।
प्रलापः कूजनं क्लेशः प्रत्येकन्तु भवेदिह ॥

शरीरचेष्टाः । सम्प्रति सम्प्राप्तमनुविद्धं सामान्यलक्षणमाह संज्ञेति । मूढ़ो जड़इव भ्रान्तेन हिताहितविवेकविनाकृतेन चेतसा उपलक्षित इत्यर्थः । विजिह्मा कुटिला भ्रूर्यस्येति विजिह्मभ्रूः विलोचनो विकृतनेत्रः ॥ २—५ ॥

सर्व्वलिङ्गसमावायः सर्व्वदोषप्रकोपजे ॥ ६

अनिमित्तागमाद्व्याधेर्गमनादकृतेऽपि च ।
आगमाच्चाप्यपस्मारं वदन्त्यन्ये न दोषजम् ॥
क्रमोपयोगाद्दोषाणां क्षणिकत्वात्तथैव च ।

दधिति । धुन्वन् कम्पमानः । वातादिजेषु यथाक्रममेकैकं लक्षणमाह फ्रदीति । संख्यया यथासङ्ख्यमिति तात्पर्य्यम् । त्रिविधेष्वेवापस्मारेषु प्रलापादीनि भवन्तीत्याह प्रलाप इति । सर्व्वेति । समाशयः समवायो मेलनमित्य-नर्थान्तरम् ॥ ६ ॥

अपस्मारस्योक्तं दोषजत्वं द्रढ़यन् मतान्तरमुपन्यस्यति अनिमित्तेति । व्याधे-रपस्मारस्य अनिमित्तागमादकस्मादागमात् अन्ये दोषजं न वदन्तीति समन्वयः । नन्विदमनुपपन्नम् अपस्मारारम्भकदोषदुष्टेरेवानिमित्तागमश्चेदभ्युपगच्छसि तर्हि नास्ति ते काचित् वस्तुक्षतिः,सिध्यति च प्रसिद्धं दोषजत्वमस्य निरङ्कुशम् । एवं विव-क्षूनपाकरोति गमनादिति । अत्र प्रकृतत्वात् प्रतीकार इत्यर्थादाक्षिप्यते । तदय-मर्थः । अकृतेऽपि प्रतीकारे व्याधेरस्य गमनात् । आगमाच्चेति । भवदनुमतेन नस्या-दिना कृतेऽपि प्रतीकारे पुनरागमाच्च न दोषजं मन्यन्ते ; अपस्मारस्य दोषजत्वे-ऽभ्युपगते अन्तरेण दोषोपशमानुपशमौ तन्मूलकत्वात्तस्य गमनागमनानुपपत्तिस्थिरं तिष्ठेदितिभावः । न च तावद्दोषास्तत्र निमित्तकारणमिति वाच्यम्, आमनन्ति हि "दोषा अपि रोगशब्दं लभन्ते" इति चं, विं ६अं । मतमिदं परिहरति क्रमेति । शक्तरपरपर्य्यायो ऽयं क्रम शब्दः "क्रमश्चानुक्रमे शक्तौ" इति मेदिनी, तथाच क्रमोप-योगात् दोषशक्तिप्रत्यनीकभेषजोपयोगादित्यर्थः । अयमभिसन्धिः । यद्यपस्मारोऽयं दोषजो नाभविष्यत् तर्हि तदुपशमार्थं तथाविधभेषजोपयोगं नाकरिष्यदिति । अहो ! अश्रद्धेयमेतत् साम्प्रतमुक्तं हि अन्तरेण दोषोपशमानुपशमौ तन्मूलस्यापस्मारस्य गमनागमनानुपपत्तिस्थिरं तिष्ठेत्, तथाच अकृते प्रतीकारे अपस्मारवेगस्य तिरोभावः कृते चाविर्भावः कथमपि नोपपद्यते, एवंवादिनां मुखमुद्रणायाह दोषाणामिति । क्षणं व्याप्नोतीति ठन् क्षणिकः क्षणिकशब्दोऽयं गौणाठत्या अल्पकालस्थायित्वमाचक्षाणो दोषान् विशिनष्टीतिक्रमः. कारणा-

आगमाद्वैश्वरूप्याच्च स तु निर्व्वर्ण्यते बुधैः ॥ ७ ॥
वर्षत्यपि यथा देवे भूमौ वीजानि कानिचित्।
शरदि प्रतिरोहन्ति तथा व्याधिसमुद्भवः ॥

सुरूपं कार्य्यमिति ज्ञात्वा अपस्मारस्याल्पकालस्थायित्वेन, तदारम्भकदोषाणामपि तथात्वेनानुभवात्। अथ चेदनुभवेऽस्मिंस्ते नाश्वासस्तर्हि ब्रूमः, इदमायुर्व्वेद आमनन्ति "पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः। वायुना यत्र नीयन्ते तत्र वर्षन्ति मेघवत्" इति। तथाच एवमवधेयम् पित्तं कफमुभयं वा सचिवीकृत्याऽकृत्वा वा अपस्मारमुत्पिपादयिषो वातस्य नैसर्गिकचाञ्चल्येन प्रतिक्षणमुपशमप्रकोपाभ्यामनुभूयमानविकल्पकमल्पकालस्थायित्वमभिसमीक्ष्य युक्तमुक्तं क्षणिकत्वादिति। न चाञ्जसा पित्तश्लेष्मान्वये वातस्य क्षणिकत्वमसाम्प्रतमिति वाच्यम्, जीवत्स्वात्रेयान्तेवासिषु कथमपीत्यवधारय, ते हि अनयैव दिशा सान्निपातज्वरलक्षणेऽपि "क्षणे दाहः, क्षणे शीतम्" इत्याहुः। नाऽपिच दाहशीते ते पित्तश्लेष्माणौ जनयत इति वक्तुं युक्तम् वातं प्रकृत्य वदन्ति हि "दाहकृत्तेजसा युक्तः शीतकृत् सोमसंश्रयात्" इति। तथाच क्षणिकत्वाच्च सोऽपस्मारो निवर्ण्यते दोषजत्वेनेति शेषः। जोषमास्व अस्ति च पुनः प्रगाढं हेत्वन्तरमित्यागममाश्रयते आगमाच्चेति। आगमस्तावत् "सिद्धं सिद्धैः प्रयोगैश्च हितश्चात्र परत्र च। आगमः शास्त्रमाप्तानाम्" इत्युक्तलक्षणः, स चात्र "चत्वारोऽपस्मारा वातपित्तकफसन्निपातनिमित्ताः" इति, चं निं ८ अं। नखल्वेतावतैव मे वक्तव्यमवसितम् इत्याह वैश्वरूप्याच्चेति। वैश्वरूप्यात् व्यस्तसमस्तानां दोषाणां नानारूपेणानुविद्धत्वाच्च सोऽपस्मारो दोषजत्वेन निर्व्वर्ण्यते, इति राद्धान्तः ॥ ७ ॥

अथ भवतः श्रद्धामनुरुध्यमानेन मया अकस्मात् दुष्टैर्दोषैः—अपस्मारोऽभिनिर्व्वर्त्तते इति यदभिहितं तत् न वास्तवं किन्तर्हि विप्रकृष्टैः स्तैः स्तैः हेतुभिरेव दुष्टैर्दोषैरपस्मारोऽभिनिर्व्वर्त्तत इत्यावेदयन्नाह वर्षत्यपीति। यथा वर्षत्यपि देवे भूमौ वीजानि भूमावुप्तानि भूम्यधिष्ठितानि च कानिचित् वीजानि शरद्येव प्रतिरोहन्ति न पुनः वर्षसमकालं तथैव व्याधिसमुद्भवोऽपस्माराऽभिनिर्वृत्तिरपि नैव निमित्तवेला—समकालमिति तात्पर्य्यम्। भगवदात्रेयस्याप्ययमेवाशयः,

स्थायिनः केचिदल्पेन कालेनाभिप्रवर्द्धिताः ।
दर्शयन्ति विकारांस्तु विभ्रवरूपान् निसर्गतः ॥
अपस्मारो महाव्याधिस्तस्माद्दोषज एव तु ॥ ८ ॥
तस्य कार्य्यो विधिः सर्व्वो य उन्मादेषु वक्ष्यते ॥
पुराणसर्पिषः पानमभ्यङ्गश्चैव पूजितः ।
उपयोगो यथोक्तानां योगानान्तु विशेषतः ॥
शिग्रुकट्वङ्गकिणिहीनिम्बत्वग्रससाधितम् ।
चतुर्गुणे गवां मूत्रे तैलमभ्यञ्जने हितम् ।
गोधानकुलनागानां पृषतर्क्षगवामपि ।
पित्तेषु सिद्धं तैलञ्च पानाभ्यङ्गेषु पूजितम् ॥
तीक्ष्णैरुभयतोभागैः शिरश्चापि विशोधयेत् ।
पूजां रुद्रस्य कुर्व्वीत तद्गणानाञ्च नित्यशः ॥

यदाह "अधिशेते यथा भूमिं वीजं काले ऽवरोहति । अधिशेते तथा धातून् दोषः कालेऽवकुप्यति ।" इति च ज्वरचिकित्सितम् । न चायमुत्पत्तिक्रमः शाश्वतिक इत्याह स्थायिन इति । स्थायिनः स्थितिशीलाः न पुनः क्षणिकाः इति तात्पर्य्यम् । अल्पेन कालेन प्रवर्द्धिताः सन्निकृष्टहेतूपबृंहितत्वादित्यभिसन्धिः । एवञ्च गुरुभोजनादिना यत् सद्य एवाजीर्णादयः प्रादुर्भवन्ति तदप्यविप्रतिसिद्धं भवतीत्यनुमेयम् । निगमयति अपस्मार इति ॥ ८ ॥

प्रतीकारक्रमसुपदिदिक्षति तस्येति । उपयोगः प्रयोगः । यथाग्रन्थेनैव 'उ० २७।१० अ०' उपदिष्टाः स्कन्दग्रहादयो देवग्रहादयश्चाऽभिप्रेयन्ते । शोभाञ्जनादिकाथसाधितं तैलं पुनश्चतुर्गुणे गवां मूत्रे पक्वा—ऽभ्यङ्गार्थं प्रयोजयितु-मिद मुच्यते शिग्रुिति । कट्वङ्गः श्योनाकः, किणिही अपामार्गः । किङ्किणीति पाठोलिपिप्रमादादायातः । अत्र किणिह्याः मूल-पत्र-शाखाः, शेषाणान्तु

कुलत्थयवकोलानि शणबीजं पलङ्कषाम् ।
जटिलां पञ्चमूल्यौ द्वे पथ्याश्चोत्क्वाथ्य यत्नतः ।
वस्तमूत्रयुतं सर्पिः पिवेत् तद्वातिके हितम् ॥
काकोल्यादिप्रतीवापं सिद्धं वा प्रथमे गणे ।
पयोमधुसितायुक्तं घृतं तत् पैत्तिके हितम् ॥
कृष्णावचामुस्तकाद्यैर्युक्तमारग्वधादिके ।
पक्वं तन्मूत्रवर्गेषु श्लेष्मापस्मारिणो हितम् ॥ ८ ॥
सुरद्रुमवचाकुष्ठ-सिद्धार्थव्योषहिङ्गुभिः ।
मञ्जिष्ठारजनीयुग्म-समङ्गात्रिफलाम्बुदैः ॥
करञ्जवीजशैरीष-गिरिकर्णीहुताशनैः ।
सिद्धं सिद्धार्थकं नाम सर्पिर्मूत्रचतुर्गुणम् ॥
कृमिकुष्ठगरश्वास-बलासविषमज्वरान् ।
सर्व्वभूतग्रहोन्मादानपस्मारांश्च नाशयेत् ॥

त्वचोपाख्याः। गोधेति। पृषतः शुभ्रविन्दुमान् मृगभेदः, ऋक्षो भल्लुकः। तीक्ष्णैरिति। उभयतोभागैर्वमनविरेचनैः, शिरश्चविशोधयेत् शिरोविरेचनैरेव। काकोल्येति। अत्र वाशब्दात् काकोल्यादिप्रतीवापं जलचतुर्गुणसिद्धं घृतं प्रथमेगणे विदारिगन्धादिक्वाथकल्के वा सिद्धमिति नेयम् अत्र पयोमधुसितायुक्त मित्यविशेषेणोक्तेऽपि "घृतसमं पयोदत्वा पक्तव्यम् पूतशीते च समघृते मधुसिते पादिके प्रक्षेप्ये" इत्युपदेशः। कृष्णेत्यादि। पिप्पल्यादिगणचितयकल्कं द्विगुणे आरग्वधादिक्वाथे द्विगुणे च यथा लाभं मूत्रवर्गे घृतं विपक्तव्य मित्याहुः ॥ ८ ॥

सुरेति। समङ्गा वराहक्रान्ता, करञ्जो नामौषधिः "गोकरञ्जा" इति ख्यते।

दशमूलेन्द्रवृक्षत्वङ्मूर्वाभार्गीफलत्रयैः ।
सम्पाकश्रेयसीसप्तपर्णापामार्गफल्गुभिः ॥
एतैः कल्कैश्च भूनिम्ब-पूतीकव्योषचित्रकैः ।
त्रिवृत्पाठानिशायुग्म-सारिवाद्वयपौष्करैः ॥
कटुकामदयन्त्युग्रा-नीलिनीक्रिमिशत्रुभिः ।
सर्पिरेभिश्च गोक्षीरदधिमूत्रसकृद्रसैः ॥
साधितं पञ्चगव्याख्यं सर्व्वापस्मारभूतनुत् ।
चातुर्थकक्षयश्वासानुन्मादांश्च नियच्छति ॥ १० ॥
वातिकं वस्तिभिश्चापि पैत्तिकन्तु विरेचनैः ।
कफजं वमनैर्धीमानपस्मारमुपाचरेत् ॥ ११ ॥
भार्गीशृते पचेत् क्षीरे शालितण्डुलपायसम् ।
त्र्यहं शुद्धाय तद्भोज्यं वराहायोपकल्पयेत् ॥
ज्ञात्वा च मधुरीभूतं तं विशस्य तदुद्धरेत् ।
त्रीन् भागांस्तस्य चूर्णस्य किण्वभागेन संसृजेत् ॥
मण्डोदकार्थे देयश्च भार्गीक्वाथः सुशीतलः ।
शुद्धे कुम्भे निदध्याच्च सम्भारं तं सुरां ततः ॥

गिरिकर्णी अपराजिता हुताशनश्चित्रकः । दशमूलेति । इन्द्रवृक्षः कुटजः, श्रेयसी गजपिप्पली, फल्गुः काकोडुम्बरिका । पूतीकश्चिरविल्वः । मदयन्ती नवमल्लिका "काठमल्लिका" इति परिचीयते, उग्रा वचा, नीलिनी नाम क्षुपविशेषः "वननील" इत्यभिधीयते । पर्णापामार्गपीलुभिरितिपाठे तु पीलुः कोङ्कणदेशप्रसिद्धस्तालकाण्ड मितिप्राच्यः ॥ १०—११ ॥

भार्गीति । शुद्धाय अभुक्ताय । मधुरीभूतं विगतार्द्रयामलत्वेनानुभूताभि-निर्वृत्तामाशयपाकम् विशस्य हत्वा किण्वं सुराबीजं "किण्वादिभ्यो मद-

जातगन्धां जातरसां पाययेदातुरं भिषक् ॥ १२ ॥
शिरां विध्येदथ प्राप्तां मङ्गल्यानि च धारयेत् ॥ १३ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रेऽपस्मारप्रतिषेधो
नाम एकषष्टितमोऽध्यायः ॥ ६१ ॥

शक्तिवत्” इति साङ्ख्यसूत्रम् । शुद्धे लोध्रादिलेपितत्वेन विशुद्धे, कुम्भ इति सामान्येनोक्तोऽपि घृतकुम्भ इत्येव प्रत्येतव्यम् सामान्यशब्दविशेषादौपयौगिकत्वाच्च । सम्भारम् समस्तम् । परिशिष्टमतिरोहितार्थम् ॥ १२—१३ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
उत्तरतन्त्रे अपस्मारप्रतिषेधोनामैकषष्टितमोऽध्यायः ॥ ६१ ॥

द्विषष्टितमोऽध्यायः।

अथात उन्मादप्रतिषेधमध्यायं व्याख्यास्यामः ॥ १ ॥

मादयन्त्युन्न्यद्गता दोषा यस्मादुन्मार्गमाश्रिताः।
मानसोऽयमतो व्याधिरुन्माद इति कीर्त्तितः॥
एकैकशः समस्तैश्च दोषैरत्यर्थमूर्च्छितैः।
मानसेन च दुःखेन स पञ्चविध उच्यते॥

सम्प्रति चित्तविकृतिजनकत्वसाधर्म्म्यात् प्रायः प्रतिकारसाम्यात् भूतविद्यापरिपठितत्वाच्चोन्मादप्रतिषेधमधिकरोति अथात इत्यादिना। आचार्य्या हि शिष्याणां व्यवसायाऽभिवृद्धये प्राग् वक्तव्यमर्थं सूत्ररूपेणोपदिश्य प्रपञ्चेन वृत्तितो निवेदयन्तीति प्रथमन्तावत् सङ्क्षेपतो रोगतत्त्वमवगमयितुमुन्मादशब्दं निर्व्वक्ति मादयन्तीति। यस्मादुद्गताः प्रवृद्धा व्यस्ता समस्ताश्च दोषा उन्मार्गमाश्रिता विमार्गमागता हृदयं शिरश्चाधिष्ठिता इति यावत्। मादयन्ति मनोविकार मुत्पादयन्ति तस्मात् मानसोऽयं व्याधिरुन्माद इत्येवं कीर्त्तितः। एतावता व्याधावस्मिन् मनःप्रसादनवत् दोषोपशमनमप्यवश्यं कार्य्यमित्युपदिष्टं भवति व्याजेन, कारणसद्भावे हि कार्य्यभूता व्याधयो नैव समूलघातमुपहन्यन्ते, इति निश्चीयते। न च तावत् दोषास्त्वत्रनिमित्तकारणामित्यध्यवसितव्यम्; "दोषा अपि रोगशब्दं लभन्ते" इत्यात्रेयस्मरणात्। अत्र मदयन्तीति पाठः पूर्व्वजानां प्रमादादेव सर्व्वजनीनत्वेन प्रचलतीति गम्यते। मदेर्मनोविकारजननार्थे मित्त्वानुपपत्तेः। न चैतदश्रद्धेयम् तत्रभवता माधवाचार्य्येण "मदोहर्षग्लेपनयोः। दैवादिकस्य मित्त्वार्थोऽय मनुवादः। मदयति हर्षयति

विषाद्भवति षष्ठश्च यथास्वं तत्र भेषजम्।
स चाप्रवृद्धस्तरुणो मदसंज्ञां विभर्त्ति च ॥ २ ॥
मोहोद्वेगौ स्वनः श्रोत्रे गात्राणामपकर्षणम्।
अत्युत्साहोऽरुचिश्चान्ने स्वप्ने कलुषभोजनम् ॥
वायुनोन्मथनञ्चापि भ्रमश्चक्रमतस्तथा।
यस्य स्यादचिरेणैवमुन्मादं सोऽधिगच्छति ॥ ३ ॥
रूक्षच्छविः परुषवाग्धमनीततो वा
श्वासातुरः कृशतनुः स्फुरिताङ्गसन्धिः।
आस्फोटयन् पठति गायति नृत्यशीलो
विक्रोशति भ्रमति चाप्यनिलप्रकोपात् ॥
तृट्स्वेददाहबहुलो बहुभुग्विनिद्र-
श्छायाहिमानिलजलान्तविहारसेवी।
तीक्ष्णो हिमाम्बुनिचयेऽपि स वह्निशङ्की
पित्ताद्दिवा नभसि पश्यति तारकाश्च ॥

क्लेपयति चेत्यर्थः। क्लेपनं दुःखमन्यत्र मादयति चित्तविकारमुत्पादयतीत्यर्थः" इति धातुवृत्तावुपदेशात् ॥ १—२ ॥

पूर्व्वरूपमाह मोहेति। अत्युत्साहः कर्त्तव्यकार्य्येष्वतितरामनुरागः। उन्मथनं पीड़नम् चंक्रमतश्चङ्क्रमणात् भ्रमश्चक्रवद् गात्रभ्रमणम्। क्रमशो रूपाण्याह रूक्षेति। छविः कान्तिरितिपर्य्यायौ। स्फुरिताङ्गसन्धिः ईषत् कम्पिताङ्गसन्धिः। अत्र अङ्गग्रहणेनैव सन्धेरुपलम्भेऽपि पृथगुपादानं प्रपञ्चार्थम्, वैशिष्ट्यमाख्यातुं वा। आस्फोटयन् करतलादिशब्दं कुर्व्वन् अटति गच्छति भ्रमति निरन्तरं चलति विक्रोशति रोदिति। तृड़िति। विहरति परिक्रामत्यस्मिन्निति विहारो विहारभूमिः। छाया हिमानिल जलान्तविहारभूमिश्च सेवितुं शीलमस्येति छायाहिमानिलजलान्तविहारसेवी।

छर्द्यग्निसादसदनारुचिकासयुक्तो
योषिद्विविक्तरतिरल्पमतिप्रचारः ।
निद्रापरोऽल्पकथनोऽल्पभुगुष्णसेवी
रात्रौ भृशं भवति चापि कफप्रकोपात् ॥
सर्व्वात्मके त्रिभिरपि व्यतिमिश्रितानि
रूपाणि वातकफपित्तकृतानि विद्यात् ।
सम्पूर्णलक्षणमसाध्यमुदाहरन्ति
सर्व्वात्मकं क्वचिदपि प्रवदन्ति साध्यम् ॥ ४ ॥
चौरैर्नरेन्द्रपुरुषैररिभिस्तथान्यै-
र्वित्रासितस्य धनबान्धवसंक्षयाद्वा ।
गाढं क्षते मनसि च प्रियया रिरंसो-
र्जायेत चोत्कटतरो मनसो विकारः ॥
चित्रं स जल्पति मनोऽनुगतं विसंज्ञो
गायत्यथो हसति रोदिति चापि मूढः ॥ ५ ॥
रक्तेक्षणो हतबलेन्द्रियभाः सुदीनः
श्यावाननो विषकृते च भवेद्विसंज्ञः ॥ ६ ॥

छर्द्यग्नीति । अल्पमतिप्रचारः, अल्पबुद्धिरल्पगतिश्चेत्यर्थः । सर्व्वेति । अत्र "सर्व्वात्मके पवन-पित्त-कफा यथास्वम् । संहर्षिता इव च लिङ्गमुदीरयन्ति" इति पाठेतु । लिङ्गजातस्य तन्नितरां प्रकृष्टमेव भवतीत्युपदेष्टुमिदमुच्यते संहर्षिता इवेति ज्ञेयम् ॥ ३—४ ॥

चौरैरिति । मनोऽनुगतं हृदयवस्थितं मनोविकारमूलं तं तं भावविशेष-मित्यर्थः । ५।६ ॥

स्निग्धं स्विन्नन्तु मनुजमुन्मादार्त्तं विशोधयेत्।
तीक्ष्णैरुभयतोभागैः शिरसश्च विरेचनैः॥
विविधैरवपीडैश्च सर्षपस्नेहसंयुतैः।
योजयित्वा च तच्चूर्णं घ्राणे नस्यन्तु योजयेत्॥
सततं धूपयेच्चैनं श्वगोमांसैः सुपूतिभिः।
सर्षपाणाञ्च तैलेन नस्याभ्यङ्गौ हितौ सदा॥
दर्शयेदद्भुतान्यस्य वदेन्नाशं प्रियस्य च।
भीमाकारैर्नरैर्नागैर्दान्तैर्व्यालैश्च निर्व्विषैः॥
भीषयेत् सततं पाशैः कशाभिर्वाऽथ ताड़येत्।
यन्त्रयित्वा सुषुप्तं वा त्रासयेत् तं तृणाग्निना॥
प्रतुदेदारयाचैनं मर्म्माघातं विवर्ज्जयेत्।
सापिधानेऽजरत्कूपे सततं वा निवासयेत्॥ ७॥

प्रतिकारक्रममुपदिदिक्षति स्निग्धमिति। अथ प्रथमन्तावत् स्नेहस्वेदानन्तरं तीक्ष्णैर्वमनविरेचनशिरोविरेचनैर्विशुद्धमातुरं बहुशस्त्वः सार्षपतैलसंसृष्टेनावपीड़ेनोपपाद्य तत्तच्छिरोविरेचनौषधैर्नस्यं दातुमिदमुच्यते स्निग्धमिति। अत्र घ्राणे नस्यमिति घ्राणपदं करकङ्कणन्यायात् झटित्यवबोधार्थम्। प्रतुदेदिति। आरा चर्म्मप्रभेदकः सूचीभेदः "आराग्रमात्रोह्यवरोऽपि" इति श्रुतिः। अन्यथा भीतिमुत्पिपादयिषति सापीति। अत्र संशयः किमयं कूपशब्द उदपाने प्रवर्त्तते आहोस्वित् गर्त्त इति। कुतः पुनः संशयः "कूप उदपानन्तु पुंसि वा" तथा "कूपो गर्त्ते च नौकायागुण वृक्षे" इत्यमरोणादिकोषयोरुभयथा पर्य्यायदर्शनात्। किन्तावत् प्राप्तम्, गर्त्त इति, कुतः? सततं वा निवासयेदित्युक्तेः तथाहि "भूमौ खातोऽल्पविस्तारो गम्भीरो मण्डलाकृतिः बद्धोऽबद्धः स कूपः स्यात्"। इत्युक्तलक्षणे कूपे प्रकृतिस्थस्यापि वास आकाशवास इव बुद्धिमारोहति किं पुनरुन्मत्तस्येति साम्प्रतमध्यवस्यामो गर्त्त इति। अतएव वाग्भटेनाऽप्युक्तम् "वद्धं श्वभ्रे विनिक्षिपेत्" इति।

त्र्यहात् त्र्यहाद्यवागूश्च दद्यात्सक्तून् अथैव वा ।
शीतलानम्बुयुक्तान् वा कुल्माषान् वा बहुश्रुतः ॥
द्रव्यं यद्दीपनीयञ्च तत् पथ्यं तस्य योजयेत् ॥
विड़ङ्ग-त्रिफला-मुस्त-मञ्जिष्ठा-दाड़िमोत्पलैः ।
श्यामैलवालुकैलाभिश्चन्दनामरदारुभिः ॥
बर्हिष्ठरजनीकुष्ठ-पर्णिनीशारिवाद्वयैः ।
हरेणुकात्रिवृद्दन्ती-वचातालीशकेशरैः ॥
क्षिरोरं साधितं सर्पिर्मालतीकुसुमैः सह ।
गुल्मकासज्वरश्वास-क्षयोन्मादनिवारणम् ॥
एतदेव हि सम्पक्वं जीवनीयोपसम्भृतम् ।
चतुर्गुणेन दुग्धेन महाकल्याणमुच्यते ॥

जीर्णश्च स गर्त्तापरपर्य्याय: कूपोदुष्टवातादिपरिपूरितत्वेनावश्यं निवसतोऽस्याश्च मरणं वापादयिष्यतीति सम्प्रधार्य्य विशिनष्टि अजरदिति । अत्रास्याश्च जन-कल्यादिदोषपरिहारप्राधान्यादजरदिति विशेषणं परिहृतेतरात्ययिकदोषमिव कूपं लक्षयतीति नेयं यथा काकेभ्यो दधि रक्षतामित्युक्ते उपघातप्राधान्यात् श्वादिभ्योऽपि रक्षणं प्राप्तं भवति तद्वत् । एवञ्च मथुराप्रदेशप्रसिद्धभूमिगृहवत् विजृम्भितो विन्यस्तशयनासनान्नपानो हस्तान्तर्न्यस्तिमित प्रदीप: सच्छिद्रपिधान: प्रहरणविनाकृतो गर्त्तोऽत्राजरत् कूपशब्देन विवक्षितो भवतीत्यनुसन्धेयम् ॥५।७॥

त्र्यहादिति । त्र्यहं प्राप्येति त्र्यहात् दिनान्तरमित्यर्थ: । तर्पणान् सक्तून् कुल्माषान् अर्द्धस्विन्नान् गोधूमादीन् स्मर्य्यते हि "अर्द्धस्विन्नाश्च गोधूमा: अन्येच चणकादय: कुल्माषा इति कथ्यन्ते" इति । हृदेहितं द्रव्यं घृतादिकमित्येतत् । कल्याणकं घृतमुपदिदिक्षति विड़ङ्गेति । श्यामा वृद्धदारक: एलवालुकं नामौषधि: "नालुका" इति परिचीयते । बर्हिष्टं ह्रीवेरं पर्णिनो शब्देनेह अविशेषात् चतस्रो-माषादि पर्णिन्यो लभ्यन्ते । शारिवाद्वयं "अनन्तमूलं श्यामलतेति च प्रथते । घृतमिदं

अपस्मारं ग्रहं शोषं क्लैब्यं कार्श्यमवीजताम् ।
घृतमेतन्निहन्त्याशु ये चादौ गदिता गदाः ॥ ८ ॥
वहिष्ठकुष्ठमञ्जिष्ठा-कटुकैलानिशाद्वयैः ।
तगरत्रिफलाहिङ्गु-वाजिगन्धामरद्रुमैः ॥
वचाजमोदाकाकोली-मेदामधुकपद्मकैः ।
सशर्करं शृतं सर्पिः पक्वं क्षीरचतुर्गुणम् ॥
बालानां ग्रहजुष्टानां पुंसां दुष्टाल्पमेधसाम् ।
ख्यातं फलघृतं स्त्रीणां वन्ध्यानाञ्चाशु गर्भदम् ॥ ९ ॥
ब्राह्मीमैन्द्रीं विडङ्गानि व्योषं हिङ्गु सुरां जटाम् ।
विषघ्नीं लशुनं रास्नां विशल्यां सुरसां वचाम् ॥
ज्योतिष्मतीं नागविन्नामनन्तामभयां तथा ।

महाकल्याणकसंज्ञया विशिनष्टि एतदिति। जीवनीयोपसंभृतं "सु ३८ शं उपदिष्ट-काकोल्यादिगणसंमिश्रं; घृतस्यास्य महाकल्याणकसंज्ञातउपदेशात् प्रागुक्तस्य कल्याणकसंज्ञा अर्थादाक्षिप्यते। आदौ निगदिता गदा कल्याणकोपदिष्टा गुल्मकासादयः ॥ ८ ॥

फलघृतं निवेदयति वहिष्ठेति। अत्र तैनेदं त्रिफलेति पाठो लिपि-प्रमादात् प्रचलतीति गम्यते निरन्वयत्वात् तगरत्रिफलेति पाठस्तु "मञ्जिष्ठा कुष्ठतगर त्रिफला" इत्यष्टाङ्गहृदयोपदिष्ट-फलघृतपाठसाम्यात् न्याय्य इत्यध्यवसेयम् ॥ ९ ॥

ब्राह्मीमिति। ब्राह्मी स्वनामप्रसिद्धा, ऐन्द्री इन्द्रवारुणी "गुर्मं मी" इति विज्ञायते। सुरा, सुराह्व देवदार्विति यावत्। जटा जटामांसी विषघ्नी नामौषधिः "निर्व्विषी" इति प्राच्यैरुपदिश्यते। विशल्या गुडूची सुरसा तुलसी ज्योतिष्मती "लताफट्की" इत्यभिधीयते। नागविन्ना इन्द्रवारुणीभेदः "ज्योतिष्मतीं नागरञ्च अनन्तामभयां तथा" इत्यपि पठ्यते अनन्ता अनन्तमूलं

सौराष्ट्रीञ्च समांशानि गजमूत्रेण पेषयेत् ।
छायाविशुष्कास्तद्वर्त्तीर्योजयेद्विधिकोविदः ॥
अवपीड़ेऽञ्जनेऽभ्यङ्गे नस्ये धूमे प्रलेपने ।
उरोऽपाङ्गललाटेषु शिराश्चास्य विमोक्षयेत् ॥ १० ॥
अपस्मारक्रियाश्चापि यथोद्दिष्टाश्च कारयेत् ।
शान्तदोषं विशुद्धञ्च स्नेहवस्तिभिराचरेत् ॥ ११ ॥
शोकशल्यं व्यपनयेदुन्मादे पञ्चमे भिषक् ।
उन्मादेषु च सर्व्वेषु कुर्य्याच्चित्तप्रसादनम् ॥ १२ ॥
मृदुपूर्व्वां मदेऽप्येवं क्रियां विद्वान् प्रयोजयेत् ॥ १३ ॥
विषजे मृदुपूर्व्वाञ्च विषघ्नीं कारयेत् क्रियाम् ॥ १४ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे उन्मादप्रतिषेधो नाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥

भूतविद्यातन्त्रं समाप्तम् ॥

सौराष्ट्री "फिट्कारी" इत्याख्यायते। शिरा विमोक्षयेत् शिराव्यधविधिमवेक्ष्येति शेषम्। यथोद्दिष्टा कौमारभृत्योपदिष्टस्कन्धग्रहादिप्रतिषेधोक्ता ममानुग्रप्रतिषेधो- पदिष्टदेवग्रहाद्युक्ताश्चेत्यर्थः। उन्मादेष्विति मदोऽप्रवृद्धस्तरुण उन्मादः आमनन्ति हि "स चाप्रवृद्धस्तरुणोमदसंज्ञां विभर्त्ति च" इति, विषघ्नीं क्रियां कल्पस्थाने निरदिक्षत्। परिशिष्टं निगद व्याख्यातम् ॥ १०।१४ ॥

इति श्रीहाराणचन्द्र चक्रवर्त्ति विरचिते सुश्रुतार्थं सन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे उन्मादप्रतिषेधोनाम द्विषष्टितमोऽध्यायः।

त्रिषष्टितमोऽध्यायः ।

अथातो रसभेदविकल्पमध्यायं व्याख्यास्यामः ॥ १ ॥

दोषाणां पञ्चदशधा प्रसरोऽभिहितस्तु यः ।

त्रिषष्ट्या रसभेदानां तत्प्रयोजनमुच्यते ॥ २ ॥

अवसितन्तावद्भूतविद्यसमाख्यं तन्त्रम् । इदानीन्तु तन्त्रभूषणत्वेनाभिहिता ये चत्वारोऽध्याया अवशिष्यन्ते तानेव प्रवर्त्तयिष्याम इत्यभिसन्धाय क्रमागतत्वेन व्याचिख्यासितं रसभेदविकल्पं नामाध्यायमधिकरोति अथात इत्यादिना । रसस्य भेदो विशेषस्तस्य विविधः कल्पोऽत्र, अथवा रसस्य भेदोविविधं कल्प्यतेऽनेनेति रसभेद-विकल्पः । पूर्व्वं हि रसविशेषविज्ञानीये "ते च भूयः परस्परसंसर्गात् त्रिषष्टिधा भिद्यन्ते" इति यत् सङ्ख्यामात्रेण रसस्य भेदं निवेदयाम्बभूव न च तं तं भेदं नापि च तदुपयोगक्रमं सहसा सर्व्वभिषजो विज्ञास्यन्तीति सम्प्रधार्य्य तत्तदविज्ञेयतादोषविरहितत्वेन भूषयितुमस्यारम्भादेव तन्त्रभूषणत्वं सुष्ठ्ववगम्यते ॥ १ ॥

प्रकृतमनुसरति दोषाणामिति अभिहितो व्रणप्रश्ने इति शेषः । रसभेदानां त्रिषष्ट्या परमतो वक्ष्यमाणया तत् प्रयोजनं तस्य प्रसरस्य कार्य्यम् प्रसरप्रतीकार इति निष्कर्षः । "प्रयोजनं कार्य्यहेत्वोः" इत्यमरः । इदमत्रावधेयम् । सञ्चयप्रतीपावस्थयोर्हि दोषा नातिप्रबला भवन्ति अप्ररूढबलत्वाच्च ते तत्तद्रसभेदानपेक्ष्यप्रतीकारा भवन्ति । स्थानसंश्रयादयश्च भावाः सन्तोऽपि तद्विपर्य्यस्ताः प्रसरत एवाभिनिर्व्वर्त्तन्ते, तदिह ते प्रसरग्रहणेनैव गृहीता भविष्यन्तीति तांस्तान् भावान् हित्वा प्रसरमधिकृत्योपदेशो नानुपपन्नः ॥ २ ॥

अविदग्धा विदग्धाश्च भिद्यन्ते ते त्रिषष्टिधा ।
रसभेदत्रिषष्टिन्तु वीक्ष्य वीक्ष्यावचारयेत् ॥
एकैकेनानुगमनाद्भागशो य उदीरिताः ।
दोषाणां तत्र मतिमांस्त्रिषष्टिन्तु प्रयोजयेत् ॥ ३ ॥
यथाक्रमं प्रवृत्तानां द्विकेषु मधुरो रसः ।
पञ्चानुक्रमते योगानम्लस्तुर एव च ॥
त्रींश्चानुगच्छति रसो लवणः कटुको द्वयम् ।
तिक्तः कषायमन्वेति ते द्विका दश पञ्च च ॥ ४ ॥

सम्प्रति "त्रिषष्टया रसभेदानां तत्प्रयोजन मुच्यते" इति संक्षेपेणोक्तमर्थं स्फोरयति अविदग्धा इति । अविदग्धा अन्येनासंसृष्टाः, विदग्धाश्च तद्विपर्य्यस्ताः । वीक्ष्य वीक्ष्य पौनःपुन्येन दोषभेदविकल्पे वक्ष्यमाणं तं तं दोषभेदं यत्नतो विमृश्य रसभेदत्रिषष्टिं त्रिषष्टिधा भिन्नं तं तं रसमवचारयेत् प्रयोजयेदित्यर्थः । नन्वविदग्धा विदग्धाश्च भिद्यन्ते ते त्रिषष्टिधा इति तु प्रागप्युपदिष्टं ते च भूयः परस्परसंसर्गात् त्रिषष्टिधा भिद्यन्ते" इत्यनेन रसविशेषविज्ञानीये, न च तावदेतावताऽस्माकं सम्यक् प्रत्ययो जायते तद्भूयोऽपि कृपया तथा विशदं विज्ञापयतु भगवान् यथा च वयं यथावत् प्रयोक्तॄणामुत्थापयितुं शक्ष्यामो ये चास्माननुलक्ष्यन्ते यांश्च वयमनुलक्ष्यामहे इत्येवमनुनीतो भगवानाह एकैकेनेति । भागशोरसाना मेकैकेन मधुरादिनानुगमनात् ये त्रिषष्टि भेदा उदीरिता भविष्यन्ति मतिमान् समीक्ष्यकारित्वेन बुद्धिमान् त्रिषष्टिं तांस्तान् भेदान् दोषाणां तत्र प्रसरे प्रयोजयेदित्यर्थः । "एकैकेनानुगमनं भागशो यदुदीरितं दोषाणां तत्र मतिमान् त्रिषष्टिन्तु प्रयोजयेत् । इत्येवं पाठे तु रसानां यद् भागशः एकैकेनानुगमनमुदीरितं भविष्यति तत्र जातां त्रिषष्टिं दोषाणां तत्र प्रसरे प्रयोजयेदित्येवं व्याख्येयम् ॥ ३-४ ॥

तद्यथा—मधुराम्लः ।१। मधुरलवणः ।२। मधुरकटुकः ।३। मधुरतिक्त । ४ । मधुरकषायः । ५ ।—एते पञ्चानुक्रान्ता मधुरेण । अम्ललवणः । १ । अम्लकटुकः ।२। अम्लतिक्तः ।३। अम्लकषायः । ४ । एते चत्वारोनुक्रान्ता अम्लेन । लवणकटुकः । १ । लवणतिक्तः । २ । लवणकषायः । ३ ।—एते त्रयोऽनुक्रान्ता लवणेन । कटुतिक्तः ।१। कटुकषायः । २ ।—द्वावेतावनुक्रान्तौ कटुकेन । तिक्तकषायः । १ ।—एक एवानुक्रान्तस्तिक्तेन ॥

एवमेते द्विकसंयोगाः पञ्चदश व्याख्याताः। त्रिकान् वक्ष्यामः॥५॥

आदौ प्रयुज्यमानस्तु मधुरो दश गच्छति ।
षडम्लो लवणस्तस्मादर्द्धन्त्वेकं रसः कटुः ॥

मधुराम्ललवणः ।१। मधुराम्लकटुकः ।२। मधुराम्लतिक्तः ।३। मधुराम्लकषायः । ४ । मधुरलवणकटुकः । ५ । मधुरलवणतिक्तः । ६ । मधुरलवणकषायः । ७ । मधुरकटुकतिक्तः । ८ । मधुरकटुककषायः । ९ । मधुरतिक्तकषायः । १० ।—एवमेषां त्रिकसंयोगानां दशानामादौ मधुरः प्रयुज्यते । अम्ललवणकटुकः । १ । अम्ललवणतिक्तः । २ । अम्ललवणकषायः । ३ । अम्लकटुकतिक्तः । ४ । अम्लकटुककषायः । ५ । अम्लतिक्तकषायः।६।—एवमेषां षण्णामादावम्लः प्रयुज्यते। लवणकटुकतिक्तः । १ । लवणकटुककषायः । २ । लवणतिक्तकषायः ।३। एवमेषां त्रयाणामादौ लवणः प्रयुज्यते । कटुतिक्तकषायः।१। एवमेकस्यादौ कटुकः प्रयुज्यते ॥ ६ ॥

एवमेते त्रिकसंयोगाः विंशतिर्व्याख्याताः । चतुष्कान् वक्ष्यामः ॥ ७ ॥

चतुष्करससंयोगान् मधुरो दश गच्छति ।
चतुरोऽम्लस्तु गच्छेच्च लवणस्त्वेकमेव तु ॥

मधुराम्ललवणकटुकः । १ । मधुराम्ललवणतिक्तः । २ । मधुराम्ललवणकषायः । ३ । मधुराम्लकटुकतिक्तः । ४ । मधुराम्लकटुककषायः । ५ । मधुराम्लतिक्तकषायः । ६ । मधुरलवणकटुकतिक्तः । ७ । मधुरलवणकटुककषायः । ८ । मधुरलवणतिक्तकषायः । ९ । मधुरकटुकतिक्तकषायः । १० ।—एवमेषां दशानामादौ मधुरः प्रयुज्यते । अम्ललवणकटुकतिक्तः । १ । अम्ललवणकटुककषायः । २ । अम्ललवणतिक्तकषायः । ३ । अम्लकटुकतिक्तकषायः । ४ ।—एवमेषां चतुर्णामादावम्लः प्रयुज्यते । लवणकटुकतिक्तकषायः । १ ।—एवमेकस्यादौ लवणः प्रयुज्यते ॥ ८ ॥

एवमेते चतुष्करससंयोगाः पञ्चदश कीर्त्तिताः । पञ्चकान् वक्ष्यामः ॥ ९ ॥

पञ्चकान् पञ्च मधुर एकमम्लस्तु गच्छति ॥ १० ॥

मधुराम्ललवणकटुकतिक्तः । १ । मधुराम्ललवणकटुककषायः । २ । मधुराम्ललवणतिक्तकषायः । ३ । मधुराम्लकटुकतिक्तकषायः । ४ । मधुरलवणकटुकतिक्तकषायः । ५ ।—एवमेषां पञ्चानां पञ्चकरस-

---

सुखावबोधाय एकैकेनानुगमनप्रकारं निवेदयति तद् यथेत्यादिना कषाय इत्यन्तेन ग्रन्थसन्दर्भेण । यथा अरुन्धतीं दिदर्शयिषुः प्रथमं स्थूलां तारां दर्शयति

संयोगानामादौ मधुरः प्रयुज्यते । अम्ललवणकटुकतिक्त-
कषायः । १ । एवमेकस्वादावम्लः प्रयुज्यते ॥ ११ ॥

एवमेते षट् पञ्चकरससंयोगा व्याख्याताः । षट्कमेकं वक्ष्यामः ।

एकस्तु षट्कसंयोगः ॥

मधुराम्ललवणकटुकतिक्तकषायः—एवमयमेकः षट्कसंयोगः ॥१२

एकैकस्य षड्रसा भवन्ति । मधुरोऽम्लो लवणः, कटुक, स्तिक्तः, कषाय, इति ॥ १३ ॥

भवति चात्र ।

एषा त्रिषष्टिर्व्याख्याता रसानां रसचिन्तकैः ।
दोषभेद-त्रिषष्ट्यान्तु प्रयोक्तव्या विचक्षणैः ॥ १४ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे रसभेदविकल्पो
नाम त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

तथैवेह पञ्चदशधा प्रसरमधिकृत्य रसभेदत्रिषष्ट्याः प्रयोगमभिहितवान्, वस्तुतस्तु परमतो दोषभेदविकल्पे ये त्रिषष्टिर्दोषभेदा उपदेक्ष्यन्ते तेष्वेव त्रिषष्टिधा भिन्ना रसा उपयुज्यन्त इत्युपदेष्टुमिदमुच्यते एषेति निगदव्याख्यातम् ॥ ५।१४ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्ति विरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
उत्तरतन्त्रे रसभेदविकल्पोनाम त्रिषष्टितमोऽध्यायः ।

चतुःषष्टितमोऽध्यायः ।

अथातः स्वस्थवृत्तमध्यायं व्याख्यास्यामः ॥ १ ॥

सूत्रस्थाने समुद्दिष्टः स्वस्थो भवति यादृशः ।
तस्यादितो रक्षणं हि चिकित्सायां मयोदितम् ।
तस्मिन्नर्थाः समासोक्ता विस्तरस्तस्य वक्ष्यते ॥ २ ॥

यस्मिन् यस्मिन्नृतौ ये ये दोषाः कुप्यन्ति देहिनाम् ।
तेषु तेषु प्रदातव्या रसास्ते ते विजानता ॥ ३ ॥

प्रक्लिन्नत्वाच्छरीराणां वर्षासु खलु देहिनाम् ।
मन्देऽग्नौ कोपमायान्ति संघर्षान्मारुतादयः ॥

इदमत्र निरदिक्षत् "इह खल्वायुर्व्वेदप्रयोजनं व्याध्युपसृष्टानां व्याधिपरिमोक्षः स्वस्थस्य रक्षणञ्च" इति ; तत्र रसभेदविकल्पान्तो व्याधिपरिमोक्षविधिर्निरवशेषं निवेदितः सम्प्रति च पारिशेष्यात् स्वस्थस्य रक्षणविधिं निवेदयिष्यामि इत्यभिसन्धाय स्वस्थवृत्तं नामाऽध्यायमधिकरोति अथात इत्यादिना । वृत्तमत्र हितानां प्रवर्त्तनम्, आमनन्ति च "गुरुपूजा घृणा शौचं सत्यमिन्द्रियनिग्रहः । प्रवर्त्तनं हितानाञ्च तत् सर्व्वं वृत्तमुच्यते" । इति स्वस्थवृत्तमाचष्टे इति विधि अपि च स्वस्थवृत्तम् । १ ।

सूत्रेति । समुद्दिष्टः "समदोषः समाग्निश्च" इत्यादिना दोषधातुमलक्षयवृद्धिविज्ञानीये इत्युक्तेयम् । तस्येत्यादि । आदितः आदौ, चिकित्सायां चिकित्सितस्थाने "२४शं" अनागताबाधप्रतिषेधनीये इति शेषः । प्रकृतमनुसरति

तस्मात् क्लेदविशुद्ध्यर्थं दोषसंहरणाय च ।
कषायतिक्तकटुकै रसैर्युक्तमथोद्रवम् ॥
नातिस्निग्धं नातिरूक्षमुष्णं दीपनमेव च ।
देयमन्नं नृपतये यच्चलघ्वोक्तमादितः ॥
तप्तावरतमम्भो वा पिबेन्मधुसमायुतम् ।
अह्नि मेघानिलाविष्टेऽत्यर्थशीताम्बुसङ्कुले ।
तरुणत्वाद्विदाहश्च गच्छन्त्योषधयस्तदा ।
मतिमांस्तन्निमित्तश्च नैव व्यायाममाचरेत् ।
अत्यम्बुपानावश्यायग्राम्यधर्म्मातपांस्त्यजेत् ॥
भूवाष्पपरिहारार्थं शयीत च विहायसि ॥४ ॥
सेव्याः शरदि यत्नेन कषायस्वादुतिक्तकाः ।
क्षीरेक्षुविकृतिक्षौद्र-शालिमुद्गादिजाङ्गलाः ॥
सलिलञ्च प्रसन्नत्वात् सर्व्वमेव तदा हितम् ।
सरःस्वाप्लवनञ्चैव कमलोत्पलशालिषु ॥
प्रदोषे शशिनः पादाश्चन्दनञ्चानुवासनम् ।
तिक्तस्य सर्पिषः पानैरसृक्स्रावैश्च युक्तितः ॥

यस्मिन्निति । ते ते प्रत्यनीका इति तात्पर्य्यम् । देयमित्यादौ उक्तं द्रवद्रव्यविधौ पानीयवर्गे "वर्षास्वान्तरिक्षमौद्भिदं वा सेवेत" इत्यनेन। तप्तावरतं शृतशीतम् विहायसि खट्वादिपरिच्छिन्न आकाशे इति नेयम् ॥ २ -४ ॥

शारदं वृत्तमधिकरोति सेव्याइति । पादा अंशवः। तिक्तस्य सर्पिषः कुष्ठचिकित्सिते उपदिष्टस्य तिक्तकस्य महातिक्तकस्य चेत्यर्थः। असृक्स्रावै-रिति बहुवचनं बलाबलमभिसमीक्ष्य यथान्यायमादोषोपशमात् पक्षार्द्ध समाहं दशाहं वा अन्तरीकृत्य सिराव्यधः कार्य्यइत्याख्यातुमित्याहुः प्राञ्चः,

वर्षासूपचितं पित्तं हरेच्चापि विरेचनैः ।
नोपेयात् तीक्ष्णमम्लोष्णं क्षारं स्वप्नं दिवाऽऽतपम् ॥
रात्रिजागरणञ्चैव मैथुनञ्चापि वर्ज्जयेत् ।
स्वादु शीतजलं मद्यं शुचि स्फटिकनिर्म्मलम् ॥
शरच्चन्द्रांशुनिर्धौतमगस्त्योदयनिर्व्विषम् ।
प्रसन्नत्वाच्च सलिलं सर्व्वमेव तदा हितम् ॥
सचन्दनं सकर्पूरं वासश्चामलिनं लघु ।
भजेच्च शारदं माल्यं सौधोः पानञ्च युक्तितः ॥
पित्तप्रशमनं यच्च तच्च सर्व्वं समाचरेत् ॥ ६ ॥
हेमन्तः शीतलो रूक्षो मन्दसूर्य्योऽनिलाकुलः ।
ततस्तु शीतमासाद्य वायुस्तत्र प्रकुप्यति ॥

तथाच साम्प्रतमुक्तं युक्तित इति । दिवास्वप्नमिति सम्बन्धः । स्वाद्वित्यादि मद्यपविषयम् । स्वादु द्राक्षादिकृतत्वेन मधुरं समष्टतं शीतलं जलमत्रेति शीतजलम् । अतितरां स्वच्छत्वेन विशुद्धस्फटिकवन्निर्म्मलम्, शुचिस्फटिकनिर्म्मलम्, मद्यविशेषणमेतत् । वर्षास्वान्तरीक्षमौभिदञ्च जलं व्यधत्त, अत्र तु नादेयादिकं सर्व्वमेव जलं विधत्ते शरदिति । चन्द्रांशवोऽहि सुधा ते च पुनः शरदि सर्व्वथा निर्म्मला भवन्त्यतस्तत्सम्पर्केण जलमत्यर्थमुपादेयतामुपयान्ति तदिदं साम्प्रतमुक्तं शरच्चन्द्रांशुनिर्धौतमिति । अगस्त्योदयनिर्व्विषम् । आकाशे नक्षत्ररूपेणागस्त्यमुनेरुदयोऽगस्त्योदयः । अस्मिंश्च देशे तस्मिन् सौरभाद्रस्य चतुर्दशदिवस एव भवत्यपि शरद्येव जलं प्रसीदति न त्वेव सद्यः, यथा दक्षिणायने उदगयने वा प्रवृत्ते भूमावुप्ते पतिते वा वीजे शीतमुष्णमङ्कुरो न सद्यः प्रवर्त्तते तद्वत्, एवञ्च "अगस्त्योदये विषविशुद्धिः" इति स्मृतेऽपि, शरद्विषयत्वेनोपदेशो नानुपपन्नः ॥ ५।६ ॥

कोष्ठस्थः शीतसंस्पर्शादन्तःपिण्डीकृतोऽनलः ।
रसमुच्छोषयत्याशु तस्मात् स्निग्धं तदा हितम् ॥
हेमन्ते लवण-क्षार-तिक्ताम्ल-कटुकोत्कटम् ।
ससर्पिस्तैलमहिममशनं हितमुच्यते ॥
तीक्ष्णान्यपि च पानानि पिबेदगुरुभूषितः ।
तैलाभ्यक्तः सुखोष्णे च वारिकोष्ठेऽवगाहयेत् ॥
साङ्गारधाने महति कौषेयास्तरणास्तृते ।
शयीत शयने तस्मिं स्तौ गर्भगृहोदरे ॥
स्त्रीः स्निग्धागुरुधूपाढ्याः पीनोरुजघनस्तनीः ।
प्रकामञ्च निषेवेत मैथुनं तर्पितो नृपः ॥
मधुरं तिक्तकटुकमम्लं लवणमेव च ।
अन्नपानं तिलान् माषाञ्छाकानि च दधीनि च ॥
तथेक्षुविकृतीः शालीन् सुगन्धांश्च नवानपि ।
प्रसहानूपमांसानि क्रव्यादविलशायिनाम् ।
औदकानां प्लवानाञ्च पादिनाञ्चोपसेवयेत् ॥
मद्यानि च प्रसन्नानि यच्च किञ्चिद्बलप्रदम् ।
कामतस्तन्निषेवेत पुष्टिमिच्छन् हिमागमे ॥ ७ ॥
एष एव विधिः कार्य्यः शिशिरे समुदाहृतः ॥
शीते साग्नौ निवाते च गुरुप्रावरणे गृहे ॥

हेमन्तवृत्तमधिकरोति हेमन्त इति। पिण्डीकृतसाम्यात् पिण्डीकृतः सेवेत इति तात्पर्य्यम्। ज्वलदङ्गारा धीयन्तेऽस्मिन्नित्यङ्गारधानम् अङ्गारधानिका अङ्गारशकटीति पर्य्यायाः, ज्वलदङ्गारपात्रमित्येतत् तेन सह वर्त्तमानः साङ्गारधानः। साङ्गारयाम इति प्रामादिकः पाठः। वसुमेव विधि

यायात् सर्वं वधू भिश्च प्रशस्तागुरुभूषित: ।
दिवास्वप्नमजीर्णञ्च वर्ज्जयेत् तत्र यत्नत: ॥ ८ ॥
हेमन्ते निचित: श्लेष्मा श्लेष्माच्छीतशरीरिणाम् ।
तीक्ष्णाद्यसन्ते कुपित: कुरुते च गदान् बहून् ॥
ततोऽम्लमधुरस्निग्ध-लवणानि गुरूणि च ।
वर्ज्जयेद्दमनादीनि कर्म्माण्यपि च कारयेत् ॥
षष्टिकान्नं यवाञ् शीतान् मुद्गगान् नीवारकोद्रवान् ।
लावादिविष्किररसैर्द्दाद्र्यूषैश्च युक्तित: ॥
पटोल-निम्ब-वार्त्ताकु-तिक्तकैश्च हिमात्यये ।
सेवेन्मध्वासवारिष्टान् सीधुमाध्वीकमाधवान् ॥
व्यायाममञ्जनं धूमं तीक्ष्णाश्च कवलग्रहम् ।
सुखाम्बुना च सर्व्वार्थान् सेवेत कुसुमागमे ॥
तीक्ष्णरूक्षकटु क्षारकषायं कोष्णमद्रवम् ।
यवमुद्गमधुप्रायं वसन्ते भोजनं हितम् ॥
व्यायामोऽत्र नियुद्धाध्व-शिलानिर्घातजो हित: ।
उत्सादनं तथा स्नानं वनिता: काननानि च ।
सेवेत निर्झरेश्चापि हेमन्तोपचितं कफम् ।
शिरोविरेकवमन-निरूहकवलादिभि: ॥

शिशिरेऽतिदिशन्ति एष इति । पत्र एव इत्यादिना भतिदेशेनैव शीत ह्लादिभोजनाख्यानोपलब्धे ऽपि पुनराख्यानं नितरां मौपयौगिकत्वमाख्यातु-मिच्छन्तीयम् । ८ ॥

वसन्तऋतुमधिकरोति हेमन्त इति । सेवेदिति । मधुकृत आसवो माधव:, सवम् सीधमाध्वीकमाधवत्यपि पठ्यते । व्यायामं पुनर्विशिनष्टि

वर्ज्जयेन्मधुरस्निग्ध-दिवास्वप्नगुरुद्रवान् ॥ ९ ॥
व्यायाममुष्णमायासं मैथुनञ्चातिशोषि च ।
रसांश्चाग्निगुणोद्रिक्तान् निदाघे परिवर्ज्जयेत् ॥
सरांसि सरितो वापि वनानि रुचिराणि च ।
चन्दनानि परार्द्ध्यानि स्रजः सकमलोत्पलाः ॥
तालवृन्तानिलान् हारांस्तथा शीतगृहाणि च ।
घर्म्मकाले निषेवेत वासांसि सुलघूनि च ॥
शर्कराखण्डदिग्धानि सुगन्धीनि हिमानि च ।
पानकानि च सेवेत मन्थांश्चापि सशर्करान् ॥
भोजनञ्च हितं शीतं सघृतं मधुरद्रवम् ।
शृतेन पयसा रात्रौ शर्करामधुरेण च ॥
प्रत्यग्रकुसुमाकीर्ण-शयने हर्म्म्यसंस्थिते ।
शयीत चन्दनार्द्राङ्गः स्पृश्यमानोऽनिलैः सुखैः ॥ १० ॥
तापात्यये हिता नित्यं रसा ये गुरवस्त्रयः ।
पयो मांसरसाः कोष्णास्तैलानि च घृतानि च ।
बृंहणञ्चापि यत्किञ्चिदभिष्यन्दि तथैव च ॥
निदाघोपचितस्यैव प्रकुप्यन्तं समीरणम् ।
निहन्यादनिलघ्नेन विधिना विधिकोविदः ॥

व्यायाम इति । नियुद्धं बाहुयुद्धम्, अध्वा अध्वगमनम्, शिलानिर्घातः शिलया शाखाऽभिहननम्, नियुद्धादिषु जायते इति नियुद्धाध्वशिलानिर्घातजः ॥ ९ ॥

शीतहस्तमधिकरोति व्यायाम मिति । परार्द्ध्यानि श्रेष्ठानि "परार्द्ध्यवर्णा-स्तरणा" इति रघुः । मन्थं "सू ४६ अं । ४२४ श्लोक" उपादिष्टम् । सद्यः प्रसूतं नवीनकुसुमं सद्यस्ककुसुममित्येतत् ॥ १० ॥

नदीजलं रूक्षमुष्णमुदमन्थं तथातपम् ।
व्यायामञ्च दिवास्वप्नं व्यवायञ्चात्र वर्ज्जयेत् ।
यवषष्टिकगोधूमान् शालींश्चाप्यनवांस्तथा ॥
हर्म्म्यमध्ये निवाते च भजेच्छय्यां मृदूत्तराम् ॥
सविषप्राणिविण्मूत्र-लालानिष्ठीवनादिभिः ।
समाप्लुतं तदा तोयमान्तरीक्षं विषोपमम् ।
वायुना विषदुष्टेन प्रावृषेण्येन दूषितम् ।
तद्धि सर्व्वोपयोगेषु तस्मिन् काले विवर्ज्जयेत् ॥
निरूहैर्वस्तिभिश्चान्यैस्तथान्यैर्मारुतापहैः ।
कुपितं शमयेद्वायुं वार्षिकं चाचरेद्विधिम् ॥ ११ ॥
ऋतावृतौ य एतेन विधिना वर्त्तते नरः ।
घोरानृतुकृतान् रोगान् नाप्नोति स कदाचन ॥ १२ ॥
अत ऊर्द्ध्वं द्वादशाशनप्रविचारान् वक्ष्यामः
तत्र शीतोष्णस्निग्धरूक्षद्रवशुष्कैककालिकद्विकालिकौषध-
युक्तमात्राहीनदोषप्रशमनवृत्त्यर्थाः ॥ १३ ॥

प्रावृड्वृत्तमधिकरोति तापात्यय इति । गुरवो रसा मधुराम्ललवणाः । हर्म्म्येति । मृदूत्तराम् मृद्वाच्छादनां मृदूपरिभागामिति यावत् । सविषेति । प्रथमोहि वृष्टेः कालः प्रावृडुच्यते तत्र हि वातेन पर्व्वतसानुं शिखरं वा, नीते मेघे ग्रैष्मिकाः सर्पकीटलूतादयस्तमधितिष्ठन्ति, अधिष्ठितेषु च तेषु पुनः प्रतिवातेनापसारितो द्रवीभूतश्च स मेघो यदा वर्षति तदा त्वचस्थानाशुकरत्वात् क्रूरैस्तै दंदश्यते संसृज्यते च विण्मूत्रादिभिस्तदिदं साम्प्रतमुक्तं सविषेति । वायुनेति । विषदुष्टेन शालपुष्पादिविषौषधिपुष्पगन्धादिदोषयुक्तेन प्रावृषेण्येन 'प्रावृषएण्यः' इति ४।३।१२।पां सू एण्यः ; प्रावृषि भवेन वायुना दूषितं तदान्तरीक्षं तोयमित्यर्थः । ११।१२ ।

१ । तृष्णोष्णमदद्दाहार्त्तान् रक्तपित्तविषातुरान् ।
मूर्च्छार्त्तान् स्त्रीषु च क्षीणान् शीतैरन्नैरुपाचरेत् ॥
२ । कफवातामयाविष्टान् विरिक्तान् स्नेहपायिनः ।
प्रक्लिन्नदेहांश्च नरानुष्णैरन्नैरुपाचरेत् ॥
३ । वातिकान् रुक्षदेहांश्च व्यवायोपहतांस्तथा ।
व्यायामिनश्चापि नरान् स्निग्धैरन्नैरुपाचरेत् ॥
४ । मेदसाभिपरीतांस्तु स्थूलान् मेहातुरानपि ।
कफाभिपन्नदेहांश्च रुक्षैरन्नैरुपाचरेत् ॥
५ । शुष्कदेहान् पिपासार्त्तान् दुर्व्वलानपि च द्रवैः ।
६ । प्रक्लिन्नकायान् व्रणिनः शुष्कैर्मेहिनमेव च ॥
७ । एककालं भवेद्देयो दुर्व्वलाग्निविवृद्धये ।
८ । समाग्नये तथाहारो देयः कालमथोभयम् ॥
९ । औषधद्वेषिणे देयस्तथौषधसमायुतः ।
१० । मन्दाग्नये रोगिणे च मात्राहीनः प्रशस्यते ॥
११ । यथर्त्तुदत्तस्त्वाहारो दोषप्रशमनः स्मृतः ।
१२ । अतः परन्तु स्वस्थानां वृत्त्यर्थं सर्व्वमेव च ॥
द्वादशान्नप्रविचारानेतानेव प्रचक्षते ॥ १४ ॥

पूर्व्वं हिताहितीये आतुराणां व्यवस्थितमाहारद्रव्यं नास्ति, तेषान्तु रोगादिकमभिसमीक्ष्याहारो निरूपणीय इत्युक्तमर्थमार्त्तवव्याध्युपद्रुताना मनुक्ता-हारप्रकारोपदेशव्याजेन स्फोरयन् प्रतिजानीते अत इति । अत्र प्रक्लिन्नकायानां शुष्कान्नविधानादेव रूक्षदेहिंतेभ्यः शुष्कान्नं देयमित्युपदेशः। विधिरयं प्रस्तुतत्वा दार्त्तवव्याधिप्रत्यनीकाहारविचारविषयत्वेन प्रतीतोऽप्यातुरसामान्या-हारविचारमेव विषयीकरोतीति प्रत्येतव्यम् वाधकाभावात् । वदन्ति हि "एकत्र

अत ऊर्द्धं दशौषधकालान् वक्ष्यामः ॥ १५ ॥

तत्र निर्भक्तं प्राग्भक्तमधोभक्तं मध्येभक्तमन्तराभक्तं सभक्तं सामुद्गं मुहुर्मुहुर्ग्रासं ग्रासान्तरञ्चेति दशौषधकालाः ॥ १६ ॥

१ । तत्र निर्भक्तं तु यत् केवलमेवौषधमुपयुज्यते ।

वीर्य्याधिकं भवति भेषजमन्नहीनं
हन्यात् तथामयमसंशयमाशु चैव ।
तद्बालवृद्धयुवतीमृदवोऽथ पीत्वा
ग्लानिं परां समुपयान्ति बलक्षयञ्च ॥

२ । प्राग्भक्तं नाम तद्‌यत्तु प्राग्भक्तस्योपयुज्यते ।

शीघ्रं विपाकमुपयाति बलं न हिंस्या-
दन्नावृतं नच मुहुर्वदनान्निरेति ।
प्राग्भक्तसेवितमथो बलमादधाति
दद्याच्च वृद्धशिशुभीरुवराङ्गनाभ्यः ॥

निर्द्दिष्टः शास्त्रार्थोऽन्यथाऽपि नीयते बाधकाभावात्” इति । अतःपरम् आर्त्तवातु-र्य्योपशमानन्तरमित्यर्थः । वृत्त्यर्थं स्थित्यर्थं स्वास्थ्यरक्षणार्थमित्येतत् । सर्व्वं स्वास्थ्यहेतुत्वात् शीतोष्णादिकमेकादशविधं रसषट्कञ्चेति नेयम् “सर्व्वरसाभ्यासो बलकराणाम्” इति चरकस्मरणात् । उपसंहरति द्वादशेति ॥ १३।१४ ॥

सम्प्रति यादृशे आर्त्तवे व्याधौ यदा यदा भेषजान्युपयोज्यानि स्युस्तानेव कालान् निवेदयितुं प्रतिजानीते अत इति । इदमत्रावधेयम् औषधशब्दमिमम् प्रकृतत्वादार्त्तवव्याधिविषयत्वेन प्रतीतमपि व्याधिसामान्य-विषयत्वेनैवादित्सन्त्याचार्य्या बाधकाभावात् । प्रस्तुतान् दशौषधकालान् लक्षणतो निवेदयन्नाह तत्रेति । तत्र निर्भक्तादिषु मध्ये । भक्तस्याभावो निर्भक्तं तदस्यास्तीति अकारे मत्वर्थीये निर्भक्तं प्रस्तुतत्वादन्नेन विनाकृतमौषध-मित्याख्यातम् । एतदेव पुन विशदयति तत्र निर्भक्तं तु यदिति । एतावतैव प्राग्भक्तमधोभक्तं मध्येभक्तमन्तराभक्तं, सभक्तमित्यपि प्रायेण व्याख्यातम् । प्राग्-

३। अधोभक्तं नाम यद्भुक्त्वा पीयते।
पीतं यदन्नमुपयुज्य तदूर्द्ध्वकाये
हन्याद्गदान् बहुविधांश्च बलं दधाति॥

४। मध्येभक्तं नाम यन्मध्ये भक्तस्य पीयते।
मध्ये तु पीतमुपहन्त्यविसारिभावाद्
ये मध्यदेहमभिभूय भवन्ति रोगाः॥

५। अन्तराभक्तं नाम यदन्तरा पीयते पूर्व्वापरयोर्भक्तयोः।
हृद्यं मनोबलकरन्त्वतिदीपनीयं
पथ्यञ्च सम्भवति चान्तरभक्तमेतत्॥

६। सभक्तं नामौषधेषु यत् साध्यते भक्तम्।
पथ्यं सभक्तमबलाबलयोर्हि नित्यं
तद्द्वेषिणामपि तथा शिशुवृद्धयोश्च॥

७। सामुद्गं नाम यद्भक्तस्यादावन्ते च पीयते।
दोषे द्विधा प्रविसृते तु समुद्गसंज्ञ-
माद्यन्तयोर्यदशनस्य निषेव्यते तु॥ १७॥

भक्तमिति। अन्नाहूतं भक्तात् प्रागभ्यवहृतत्वेनान्नेनाच्छादित मित्यर्थः। मध्येभक्त मिति। मध्यं भक्तस्येति मध्येभक्तं "पारे मध्ये षष्ठ्या वा"इति (पां सू २।१) इत्यव्ययी- भावः। "तत्सन्नियोगेन मध्यशब्दस्यैकारान्तत्वं निपात्यते" इति काशिका- स्मरणात् मध्येभक्त मिति रूपम्। अर्द्धभोजनानन्तरं यदौषधमुपयुज्यते तन्मध्ये- भक्तं नाम। अन्तराभक्तमिति। मध्यापरपर्य्यायोऽयमन्तराशब्दोऽव्ययम्। पूर्व्वापरयोः प्रातर्माध्याह्निकयो र्नैशमाध्याह्निकयो र्वा मध्ये यद्भेषजं प्रयुज्यते तदन्तराभक्तमुच्यते। सभक्त मिति यौगपद्येऽव्ययीभावः। सामुद्गमिति। समुद्गस्य

८ । मुहुर्मुहुर्नाम सभक्तमभक्तं वा यदौषधं मुहुर्मुहुरुपयुज्यते ॥

श्वासे मुहुर्मुहुरतिप्रसृते च कासे

हिक्कावमीषु च वदन्त्युपयोज्यमेतत् ॥

९ । ग्रासन्तु तत् यत् पिण्डव्यामिश्रम् ।

ग्रासेषु पीतमुपयाति विपक्कमाशु ।

दृष्टेऽवलेषु च हितं प्रवदन्ति सन्तः ॥

१० । ग्रासान्तरं नाम यदुभयोर्ग्रासयोर्मध्ये प्रयुज्यते ।

ग्रासान्तरेषु वितरेद्वमनीयधूमान्

श्वासादिषु प्रथितदृष्टगुणांश्च लेहान् ॥

एवमेते दशौषधकालाः ॥ १८ ॥

सम्पुटस्येदमिति सामुद्गम् । सम्पुटितमन्नमिति तात्पर्य्यम् । तत् करोतीति पिबेत् भुक्तस्यादावन्ते च पीयते इत्युपदेशात् प्रक्षतत्वाच्च अन्नसम्पुटकारकमौषधमिति हृदयम् ॥ १५—१७ ॥

मुहुर्मुहुरिति । मुहुर्मुहुरुपयोज्यमौषधं मुहुर्मुहुरित्युच्यते उपचारात् । ग्रासमिति । अन्नेन सह ग्रस्यते यत्तद् ग्रासम् । ग्रासं नाम यत्पिण्डव्यामिश्रमिति वृत्तावुपदेशात् । ग्रासान्तरमिति । ग्रासयोरन्तरं मध्यमिति ग्रासान्तरम् । अत्र आश्रयाश्रयिणोरभेदाद् ग्रासान्तरप्रयोज्यमौषधं ग्रासान्तरमुच्यते । बहुवचनं तु अनेकशः प्रयोज्यत्वमाख्यातुम् । वमनीयधूमाश्च चिं ४० अं अभिसमीक्ष्यादेयाः । निर्भक्तादीनामेषां कालत्वं कालोपाधिकत्वादेवाध्यवसितव्यम् । आमनन्ति हि "न सोऽस्ति प्रत्ययो लोके यत्र कालो न भासते" इति । कश्चिदत्र मुहुर्मुहुरित्यस्यानन्तरं प्रक्रान्तं ग्रासं ग्रसित्वा "ग्रासान्तरं नाम यत् पिण्डव्यामिश्रम्" इति ग्रासलक्षणमेव ग्रासान्तरलिङ्गत्वेनोपन्यस्य "ग्रासमिदं समूलकाषमाकषन्" "तन्मात्रान्तरदर्शनाद् ग्रासं बोद्धव्यम्" इत्यभिदधानो दुर्व्याख्यातृत्वेन "गौ र्गौः काम-दुधा सम्यक् प्रयुक्ता स्मर्य्यते बुधैः । दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति" इति काव्यादर्शकारद्विवचनविषयत्वेनात्मानं स्वच्छन्दतो निवेदयतीति मन्तव्यम् ॥१८॥

विसृष्टे विण्मूत्रे विशदकरणे देहे च सुलघौ
विशुद्धे चोद्गारे हृदि सुविमले वाते च सरति।
तथान्नश्रद्धायां क्षुदुपगमने कुक्षौ च शिथिले
प्रदेयस्त्वाहारो भवति भिषजां कालः स तु मतः॥ १९ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे स्वस्थवृत्तं नाम
चतुःषष्टितमोऽध्यायः॥ ६४ ॥

सम्प्रत्याहारकालं निवेदयति विसृष्ट इति। परिशिष्टं निगदव्याख्यातम्। शास्त्रमिदमातुराणां व्याधिपरिमोक्षणार्थं स्वस्थानां स्वास्थ्यानुवर्त्तनार्थं चोपदिश्यत इति हि प्रागुपदिष्टम्। तत्र च स्वास्थ्यानुवर्त्तनमेव प्रधानं मन्यन्ते भिषजो व्याधिपरिमोक्षणस्यापि स्वास्थ्यावाप्त्यभिप्रायिकत्वात्। तच्च स्वास्थ्यं यथानुवर्त्तते तथात्रोपदिष्टम्। उपदिष्टौ चास्मिन् सामान्येनोपदिष्टयो राहारौषधयोः कालोपयोगप्रकारौ, तदस्याध्यायस्य तन्त्रभूषणत्वं निरङ्कुशमुपपन्नमित्यध्यवसेयम्॥ १९ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
उत्तरतन्त्रे स्वस्थवृत्तं नाम चतुःषष्टितमोऽध्यायः॥ ६४ ॥

पञ्चषष्टितमोऽध्यायः ।

अथातस्तन्त्रयुक्तिं नामाध्यायं व्याख्यास्यामः ॥ १ ॥

द्वात्रिंशत् तन्त्रयुक्तयो भवन्ति । तद्यथा,—अधिकरणं योगः पदार्थो हेत्वर्थ उद्देशो निर्द्देश उपदेशोऽपदेशः प्रदेशोऽतिदेशोऽपवर्गो वाक्यशेषोऽर्थापत्तिर्विपर्य्ययः प्रसङ्ग एकान्तोऽनेकान्तः पूर्व्वपक्षो निर्णयोऽनुमतं विधानमनागतावेक्षणमतिक्रान्तावेक्षणं संशयो व्याख्यानं स्वसंज्ञा निर्व्वचनं निदर्शनं नियोगो विकल्पः समुच्चय ऊह्यमिति ॥ २ ॥

अथासां तन्त्रयुक्तीनां किं प्रयोजनमित्युच्यते—वाक्ययोजनमर्थयोजनञ्च ॥ ३ ॥

इदमत्रामनन्ति "यथा खरश्चन्दनभारवाही भारस्य वेत्ता नतु चन्दनस्य । एवं हि शास्त्राणि बहून्यधीत्य चार्थेषु मूढाः खरवद्वहन्ति" इति तदिदानीं तन्त्रान्ते वक्ष्यमाणं दोषभेदविकल्पं तावत् सुखावगम्यत्वेन परिहृत्य तन्त्रेऽस्मिन् अल्पाव्यक्तलेशोक्ता निगूढा वा ये ये अर्थाः सन्ति तेषां प्रसाधनार्थं युक्तीरभिधातुं स्वस्थवृत्तादनन्तरं तन्त्रयुक्तिं नामाध्यायमधिकरोति अथात इत्यादिना । परमतस्तन्त्रयुक्तीनां वाक्ययोजनमर्थयोजनञ्च प्रयोजनमित्युपदेशात् दुर्व्विज्ञेयानामर्थानां सुखेन विज्ञानार्थं शब्दा अर्थाश्च युज्यन्ते आभिरित्येवं युक्तिशब्दं निर्व्वक्ति । तन्त्रस्य युक्तयो यत्रेति तन्त्रयुक्तिः । अध्यायस्यास्य एवं युक्तिगर्भत्वादेव तन्त्रभूषणत्वं सुष्ठवगन्तव्यम् ॥ १ ॥

भवन्ति चात्र श्लोकाः ।

असद्वादिप्रयुक्तानां वाक्यानां प्रतिषेधनम् ।
स्ववाक्यसिद्धिरपि च क्रियते तन्त्रयुक्तितः ॥
व्यक्ता नोक्ताश्च ये ह्यर्था लीना ये चाप्यनिर्म्मलाः ।
लेशोक्ता ये क्वचित् तन्त्रे तेषाञ्चापि प्रसाधनम् ॥
यथाम्बुजवनस्यार्कः प्रदीपो वेश्मनो यथा ।
प्रबोध्यस्य प्रकाशार्थास्तथा तन्त्रस्य युक्तयः ॥ ४ ॥

१ । तत्र यमर्थमधिकृत्योच्यते तदधिकरणम् । यथा—रसं दोषं वा ॥ ५ ॥

२ । येन वाक्यं युज्यते स योगः । यथा—

तैलं पिबेच्चामृतवल्लिनिम्ब-हिंस्राभयावृक्षकपिप्पलीभिः ।
सिद्धं बलाभ्याञ्च सदेवदारु हिताय नित्यं गलगण्डरोगी ॥

अत्र सिद्धं पिबेदिति प्रथमं वक्तव्ये तृतीयपादे सिद्धं प्रयुक्तम्, एवं दूरस्थानामपि पदानामेकीकरणं योगः ॥ ६ ॥

३ । योऽर्थोऽभिहितः सूत्रे पदे वा स पदार्थः । अपरिमिताश्च पदार्थाः । यथा—स्नेहस्वेदाञ्जनेषु निर्दिष्टेषु द्वयोस्त्रयाणामर्थानामुपपत्तिर्दृश्यते । तत्र योऽर्थः पूर्व्वापरयोगसिद्धो भवति स ग्रहीतव्यः । यथा—वेदोत्पत्तिं व्याख्यास्याम इत्युक्ते सन्दिह्यते,

---

कति नाम किं नामधेया वा तन्त्रयुक्तयः ? आह द्वात्रिंशदिति । तन्त्रयुक्तीनां प्रयोजनं दर्शयन्नाह अत्रेति ॥ २–४ ॥

नाम मात्रेणोपदिष्टास्तास्ता युक्तीर्विवृणोति तत्रेति ॥ ५—६ ॥

पदार्थं नाम तन्त्रयुक्तिमधिकरोति य इति । स्नेहशब्दोहि प्रेमणि

कतमस्य वेदस्यायमुत्पत्तिं विवक्षुरिति। ऋग्वेदादयस्तु वेदाः, तत्र विद् विचारणे विद्लृ लाभे इत्येतयोश्च धात्वोः प्रयोगात् ; तत्र पूर्व्वापरयोगमुपलभ्य प्रतिपत्तिर्भवति आयुर्व्वेदोत्पत्तिमयं विवक्षुरित्येवं पदार्थः ॥ ७ ॥

४ । यदन्यदुक्तमन्यार्थसाधकं भवति स हेत्वर्थः । यथा

तैलादिषु च प्रवर्त्तते, स्वेदशब्दश्च शरीरान्निःसृते जले तापस्वेदादौ च, अञ्जनशब्दश्च पुनः सौवीराञ्जने कज्जले चेति साम्प्रतमुक्तं स्नेहस्वेदाञ्जनेष्वित्यादि । उपपत्ति र्युक्तियुक्ततेत्यर्थः । उपलब्धिः प्रतिपत्ति र्वेति पाठस्त्वतिशोभनः । उक्तमर्थं पुनः स्वतन्त्रसन्दर्भमुपन्यस्य स्फोरयन्नाह यथेति । सन्दिह्यते संशयो जायते सन्देहप्रकारं निवेदयति कतमस्येति । कुतः पुनः सन्देहः ? आह ऋगिति । एवशब्दस्यानाधिष्ठानोऽयं तु शब्दस्तदयमर्थः ऋग्वेदादयः सर्व्व एव वेदाः, अविशेषेण वेदशब्दवाच्याः, अत्र हेतुः विदिति । अत्र विद विचारणे विद्लृलाभे इत्येतयोश्च धात्वोरिति वार्थोऽयं च शब्दः । तथाच वेत्तेर्विन्दते र्वा प्रयोगात् इति तात्पर्य्यम् । न च तावत् इत्येतयो रिति समासस्थितेनैतदा परामृष्टयोर्धात्वोः पाक्षिकहस्तया व्याख्यानमप्रसिद्धमिति वाच्यम् । उपनयनविधौ दण्डधारणं प्रकृत्य "ब्राह्मणो वैल्व-पालाशौ क्षत्रियो वाट-खादिरौ" इति मनूक्तौ तथैव दर्शनात् । ब्राह्मणो वैल्वं पलाशं वा क्षत्रियो वाटं खादिरं वा दण्डमर्हति इति हि तदर्थः । एवं हृदीकृतं संशयमपाकरोति तत्रेति । पूर्व्वयोगश्चात्र उपोद्घातसङ्गत्या "अथ खलु भगवन्तम्" इत्युपक्रम्य "उपपन्ना नः शिष्यत्वेन" इत्यन्त उपदिष्टो ग्रन्थ सन्दर्भः । अत्र "सन्दिह्यते बुद्धिः" इत्येवं पाठस्त्वेकान्तेनासमञ्जस इत्यध्यवसेयम् सन्देहस्य बुद्धिविशेषरूपत्वेन बुद्धेः सन्दिह्यते इति सन्देहकर्म्मत्वानुपपत्तेः । तथा "ऋग्वेदादयस्तु वेदा स्तत्र पूर्व्वापरयोगमुपलभ्य विदविचारणे विद विन्दत्येतयोश्च धात्वोरनेकार्थयोः प्रयोगः पश्चात् प्रतिपत्तिर्भवति" इत्यपि पाठः पठनपाठनयोर्विरलप्रचारत्वात् विसंष्ठुलः सञ्जात इत्यवश्यं वक्तव्यम् । असुकराभ्वयत्वात् विदित्यादौ प्रक्रमभङ्गात् अनेकार्थयोरित्यस्यानुपयोगाच्च ॥ ७ ॥

मृत्पिण्डोऽद्भिः प्रक्लिद्यते तथा माषदुग्धप्रभृतिभिर्व्रणः प्रक्लिद्यत इति ॥ ८ ॥

५। समासकथनमुद्देशः। यथा—शल्यमिति ॥ ९ ॥

६। विस्तरवचनं निर्द्देशः। यथा—शारीरमागन्तु चेति ॥ १०

७। एवमित्युपदेशः। यथा—
तथा न जागृयाद्रात्रौ दिवास्वप्नञ्च वर्ज्जयेत् ॥ ११ ॥

८। अनेन कारणेनेत्यपदेशः। यथोपदिश्यते मधुरेण श्लेष्माभिवर्द्धत इति ॥ १२ ॥

९। प्रकृतस्यातिक्रान्तेन साधनं प्रदेशः। यथा—देवदत्तस्यानेन शल्यमुद्धृतं तस्माद् यज्ञदत्तस्याप्ययमेवोद्धरिष्यतीति ॥१३॥

१०। "इतरत्र विहितस्य विधेरितरत्र प्रयोगायोपदेशोऽतिदेशः

हेत्वर्थं नाम तन्त्रयुक्तिं निवेदयति यदिति। अन्यदुक्तं यदनुक्तमन्यार्थं साधयति हेतोस्तात्पर्य्यं सचिवीभवत्येति शेषः, स हेत्वर्थः। उक्तमर्थं दृष्टान्तेन विशदयति यथेति। अयमभिसन्धिः। यस्मादद्भिर्मृत्पिण्डप्रक्लेदनवत् माषदुग्ध प्रभृतिभि व्रणः प्रक्लिद्यते तस्माद् व्रणी तान्येकान्ततो नाभ्यवहरेदित्युपलम्भात् हेत्वर्थत्वमस्य विस्पष्टं प्रतिभाति। उपदेशं नाम तन्त्रयुक्तिं लक्षयति एवमिति। उदाहरति यथेति ॥ ८—११ ॥

अपदेशं नाम तन्त्रयुक्तिमाह अनेनेति। कापटपर्य्यायत्वेन प्रसिद्धो ऽयमपदेशशब्दोऽत्र स्वसंज्ञातः सहेतुकमुपदेशे प्रवर्त्तत इत्यवधेयम्। प्रदेशं नाम तन्त्रयुक्तिमधिकरोति प्रकृतस्येति। अतिक्रान्तेन प्रकृतस्य साधनं प्रदेश उच्यते। उक्तमर्थमुदाहरणेनावगमयति यथेति। प्रकृतमत्र यज्ञदत्तस्य शल्योद्धरणम् तच्च अतिक्रान्तेनातीतेन भिषजो देवदत्तसम्बन्धिशल्योद्धरणकर्तृत्वेन साधनं

यथा एष एव विधिः कार्य्यः शिशिरे समुदाहृतः” । इति ॥ १४

११ । अभिव्याप्यापकर्षणमपवर्गः । यथा—अस्वेद्या विषोपसृष्टा अन्यत्र कीटविषोपसृष्टादिति ॥ १५ ॥

१२ । येन पदेनानुक्तेन वाक्यं समाप्यते स वाक्यशेषः । यथा शिरःपाणिपादपार्श्वपृष्ठोदरोरसामित्युक्ते पुरुषग्रहणमन्तरेणापि गम्यते पुरुषस्येति ॥ १६ ॥

१३ । यदकीर्त्तितमर्थादापद्यते सार्थापत्तिः । यथा ओदनं भोक्ष्य इत्युक्तेऽर्थापन्नं भवति नायं पिपासुर्य्यवागूमिति ॥१७॥

१४ । यद्यत्राभिहितं तस्य प्रातिलोम्यं विपर्य्ययः । यथा—कृशाल्पप्राणभीरवो दुश्चिकित्स्या इत्युक्ते विपरीतं गृह्यते दृढादयः सुचिकित्स्या इति ॥ १८ ॥

१५ । प्रकरणान्तरेण समापनं प्रसङ्गः । यद्वा प्रकरणान्तरितो

सिद्धिर्भवतीतिसिद्धेः प्रदेशत्वमुपपन्नमित्यूह्येयम् । अतिदेशं नाम तन्त्रयुक्ति मधिकरोति इतरत्रेति । अत्र प्रकृतस्यानागतस्य साधनमतिदेशः । यथा यनेनास्य वायुरूर्द्ध्व मुत्तिष्ठति तेनोदावर्त्तः स्यादित्येवं चाम्मुतत्तुश्रुता एव पठन्तीति गम्यते, एवं विधायास्तन्त्रयुक्तेस्तन्त्रेऽस्मिन् गन्धमात्रेणाप्यर्थं साधयितुमसमर्थत्वेन मत्तोन्मत्तवचनवत् प्रतिभातत्वात् ॥ १२—१४ ॥

अपवर्गं नाम तन्त्रयुक्तिं निवेदयति अभीति । अभिव्याप्य साकल्येन संबध्य अपकर्षणम् हानेन ग्रहणमपवर्गः । वाक्यशेषं नाम तन्त्रयुक्ति मुपक्रमते येनेति । अत्र “पुरुषग्रहणं विनापि गम्यते पुरुष एवोक्त इति” इत्येवं पाठः प्रामाणिक इति निर्णीयते व्यन्वयायोगात् ॥ १५—१८ ॥

योऽर्थः पुनरुक्तः समाप्यते स प्रसङ्गः। यथा—पञ्च-महाभूतशरीरिसमवायः पुरुषस्तस्मिन् क्रिया सोऽधिष्ठानमिति वेदोत्पत्तावभिधाय भूतविद्यायां पुनरुक्तं यतोऽभिहितं पञ्चमहाभूतशरीरिसमवायः पुरुष इति; स खल्वेष कर्म्मपुरुषश्चिकित्सायामधिकृतः ॥ १९ ॥

१६। यदवधारणेनोच्यते स एकान्तः। यथा—त्रिवृद्विरेचयति मदनफलं वामयतीति ॥ २० ॥

१७। क्वचित् तथा क्वचिदन्यथेति यः सोऽनैकान्तः। यथा—केचिदाचार्य्या ब्रुवते द्रव्यं प्रधानं, केचिद्रसं, केचिद्वीर्य्यं, केचिद्विपाकमिति ॥ २१ ॥

१८। आक्षेपपूर्व्वकः प्रश्नः पूर्व्वपक्षः। यथा—कथं वातनिमित्ताश्चत्वारः प्रमेहा असाध्या भवन्तीति ॥ २२ ॥

१९। तस्योत्तरं निर्णयः। यथा—शरीरं प्रपीड्य पश्चादधो गत्वा वसामेदोमज्जानुविद्धं मूत्रं विसृजति वातः एवमसाध्या वातजा इति। यथा चोक्तम्—

कृत्स्नं शरीरं निष्पीड्य मेदोमज्जवसायुतः।
अधः प्रकुप्यते वायुस्तेनासाध्यास्तु वातजाः ॥ २३

प्रसङ्गं नाम तन्त्रयुक्तिं व्याहरति प्रकरणान्तरेणेति। अत्र "योऽर्थोऽसकृदुक्तः" एवं पाठेतु, असकृच्छब्दस्यात्र पुनरर्थे तात्पर्य्यमित्यवश्यं वक्तव्यं तथैवोदाहृतत्वात्। एकान्तं नाम तन्त्रयुक्तिं व्याहरति यदिति। अत्र त्रिवृदित्यादावेवकारमन्तरेणाप्येवकारार्थो लक्षणीयः, एकान्तोदाहरणत्वेनोपन्यस्तत्वात् "असति बाधे सर्व्वं

२० । परमतमप्रतिसिद्धमनुमतम् । यथा—अन्यो ब्रूयात् सप्त रसा इति तच्चाप्रतिषेधादनुमन्यते कथञ्चिदिति । २४ ॥

२१ । प्रकरणानुपूर्व्व्याभिहितं विधानम् । यथा—सक्थिमर्म्माण्येकादश प्रकरणानुपूर्व्व्याभिहितानि ॥ २५

२२ । एवं वक्ष्यतीत्यनागतावेक्षणम् । यथा—श्लोकस्थाने ब्रूयाच्चिकित्सितेषु वक्ष्यामीति ॥ २६ ॥

२३ । यत् पूर्व्वमुक्तं तदतिक्रान्तावेक्षणम् । यथा—चिकित्सितेषु ब्रूयात् श्लोकस्थाने यदीरितमिति ॥ २७ ॥

२४ । उभयथादर्शनं संशयः । यथा—किं पित्तव्यतिरेकादन्योऽग्निराहोस्वित् पित्तमेवाग्निरिति ? २८ ॥

२५ । तन्त्रे अतिशयोपवर्णनं व्याख्यानम् । यथा—इह पञ्चविं-

वाक्यं सावधारणम्" इति न्यायाच्च । अनुमतं नाम तन्त्रयुक्तिं विवृणोति परेति । अप्रतिषेधादनिराकरणात् । अत्र अप्रति पाद्येति पाठो मसीसम्पातविभ्रमात् प्रचलतीति गम्यते ॥ १८—२७ ॥

संशयं नाम तन्त्रयुक्तिं व्याकरोति उभयथेति । अत्र "तलहृदयाऽभिघातः प्राणहरः, पाणिपादच्छेदनमप्राणहरम्" इत्येवं पाठे तु तलहृदयं नाम पाणिपादाश्रितं तदुपघातश्चेत् प्राणहरः स्यात् तदाश्रितनाशे आश्रयनाशदोष आपद्येत प्राणेषूपहतेषु पाणिपादस्याऽप्युपघातात् आहोस्वित् पाणिपादच्छेदनच्छेदप्राणहरं स्यात् तर्हि तलहृदयाऽभिघातः प्राणहर" इत्यनुपपन्नं स्यात् पाणिपादच्छेदेनैव तलहृदयाऽभिहननफलोपपत्तेरित्येवं संशयो लक्षणीयः ॥ २८ ॥

व्याख्यानं नाम तन्त्रयुक्तिं व्याहरति तन्त्रे इति । अतिशयोपवर्णनम् अधिकार्थस्य कथनम् । स्वमतानुयायिव्याचिख्यासितार्थव्याख्यानप्रसङ्गेनेतिनियम्

शतिकः पुरुषो व्याख्यायते। अन्येष्वायुर्व्वेदतन्त्रेषु भूतादि-प्रकृतिविकृत्यारब्धचिन्तः॥ २८ ॥

२६। अन्यशास्त्रासामान्या स्वसंज्ञा। यथा मिथुनी-कृतयो र्वातपित्तयो र्वातश्लेष्मणोः पित्तश्लेष्मणोश्च द्वन्द्वशब्देन ग्रहणं तथाभूतयो स्तैलसर्पिषोश्च यमकशब्देनेति॥ ३० ॥

२७। निश्चितं वचनं निर्व्वचनम्। यथा—आयुर्विद्यतेऽस्मिन्ननेन वा आयुर्विन्दतीत्यायुर्व्वेदः॥ ३१ ॥

परमत स्तथैवोदाहृतत्वात्। उक्तमर्थं दृष्टान्तेनावगमयति इहेति। पुरुषस्य पञ्चविंशतिकत्वन्त्वष्टौ प्रकृतयः षोड़श विकाराः पुरुषः पञ्चविंशतितमः इत्येवं लक्षणीयम्। एवं स्वमतानुशिष्टमर्थं वर्णयित्वा अतिशयार्थं वर्णयति अन्येष्वित्यादिना। अत्रान्येष्वित्यनेन यान्यायुर्व्वेदतन्त्राणि लक्ष्यन्ते तानि तु कालप्रकर्षात् विनष्टानीति गम्यते प्रत्यक्षाविषयीभावात्। भूतादीति। इदमत्रामनन्ति हि "अव्यक्तान्महानुत्पद्यते तल्लिङ्ग एव तल्लिङ्गाच्च महतस्तल्लिङ्ग एवाहङ्कार उत्पद्यते। स च त्रिविधो वैकारिकस्तैजसो भूतादिरिति" इति साङ्ख्याः। तथाच भूतादिग्रहणेनैवाव्यक्तादीनां लाभात् भूतादिप्रकृतिविकृत्यारब्धचिन्त इत्येवं संक्षिप्तवचनेनाऽपि पञ्चविंशतिकः पुरुष एव वर्णितो भवति भूतादि-प्रकृतिविकृत्यारब्धा चिन्ता यस्य स तथोक्तः पञ्चविंशतिकः पुरुष इत्येवमर्थस्योपलम्भात्॥ २८ ॥

स्वसंज्ञां नाम तन्त्रयुक्तिं निवेदयति अन्येति। निर्व्वचनं नामतन्त्रयुक्ति-मधिकरोति निश्चितमिति। अत्र प्रकृतिप्रत्यययोरर्थकथनेनेति विशेषणीयम्॥ ३०—३१ ॥

२८ । दृष्टान्तेनार्थः प्रसाध्यते यत्र तन्निदर्शनम् । यथाग्निर्वायुना सहितः कोष्ठे वृद्धिं गच्छति तथा वातपित्तकफदुष्टो व्रण इति ॥ ३२ ॥

२९ । इदमेव कर्त्तव्यमिति नियोगः । यथा—पथ्यमेव भोक्तव्यमिति ॥ ३३ ॥

३० । इदं वेति विकल्पः । यथा—रसौदनः सघृता यवागूर्वा ॥ ३४ ॥

३१ । इदञ्चेदञ्चेति समुच्चयः । यथा—मांसवर्गे एणहरिणादयो लावतित्तिरिसारङ्गाश्च प्रधानमिति ॥ ३५ ॥

३२ । यदनिर्द्दिष्टं बुद्धिमता तदूह्यम् । यथाभिहितमन्नपानविधौ चतुर्व्विधञ्चान्नमुपदिश्यते भक्ष्यं भोज्यं लेह्यं पेयमित्येवं चतुर्व्विधे वक्तव्ये द्विविधमभिहितम् अतोह्यम् अन्नपाने विशिष्टे तयोर्ग्रहणे कृते चतुर्णामपि ग्रहणं भवति । किञ्चान्यत् । अन्नेन भक्ष्यमवरुद्धन्त्वन्नसाधर्म्म्यात् । पेयेन लेह्यं द्रवसाधर्म्म्यात् । चतुर्व्विधश्चाहारः प्रायेण द्विविधः प्रसिद्ध इति ॥३६॥

निदर्शनं नाम तन्त्रयुक्तिमवगमयति दृष्टान्तेति । अत्र दृष्टान्तव्यक्तिर्निदर्शनमित्यसाम्प्रतम् व्यक्तिशब्दस्यापार्थकत्वात् ॥ ३२—३६ ॥

ऊह्यं नाम तन्त्रयुक्तिमधिकरोति यदिति । अन्नपानयोर्वैशिष्ट्यं स्फोरयति चतुर्व्विध इति । द्विविधोऽन्नपानरूपः प्रसिद्धो लोके प्रथितः । तथाच अन्नपानग्रहणेन चतुर्णां ग्रहणं नानुपपन्नम् । प्रधानेन व्यपदेशा भवन्ति इति हि न्यायः । पक्षान्तरमाश्रयते किञ्चेति । अन्यत् ब्रूम इति शेषः ।

भवन्ति चात्र—

सामान्य लक्षणेनैता व्यासतः संप्रदर्शिताः।
विशेषस्तु यथायोगमुपधार्य्यों विपश्चिता ॥ ३७ ॥
द्वात्रिंशद्युक्तयो ह्येतास्तन्त्रसारगवेषणे।
मया सम्यग्विनिर्दिष्टाः शब्दन्यायार्थसंयुताः ॥
यो ह्येता विधिवद्वेत्ति दीपीभूतास्तु बुद्धिमान्।
स पूजार्हो भिषक्श्रेष्ठ इति धन्वन्तरेर्मतम् ॥ ३८ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे तन्त्रयुक्तिर्नाम
पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

उपसंहरति सामान्येति। सामान्यलक्षणेन साधारणलक्षणेन "योऽर्थोऽभिहितः सूत्रे पदेवा" इत्येवमविशिष्टेन लक्षणेनेति यावत्। व्यासत उदाहरणोपन्यासेन विस्तरतः। शब्दस्य न्यायसङ्गतोऽर्थः शब्दन्यायार्थः तेन संयुताः शब्दन्यायार्थसंयुताः। परिशिष्टमतिरोहितार्थम् ॥ ३७—३८ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
उत्तरतन्त्रे तन्त्रयुक्ति र्नाम पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

षट्षष्टितमोऽध्यायः ।

अथातो दोषभेदविकल्पं नामाध्यायं व्याख्यास्यामः ॥ १ ॥

अष्टाङ्गायुर्वेदविदं दिवोदासं महामतिम् ।
छिन्नशास्त्रार्थसन्देहं सूक्ष्मागाधागमोदधिम् ॥
विश्वामित्रसुतः श्रीमान् सुश्रुतः परिपृच्छति ॥ २ ॥

द्विषष्टिर्दोषभेदा ये पुरस्तात् परिकीर्त्तिताः ।
कति तत्रैकशो ज्ञेया द्विशो वाप्यथवा त्रिशः ॥ ३ ॥

तस्य तद्वचनं श्रुत्वा संशयच्छिन्महातपाः ।
प्रीतात्मा नृपशार्दूलः सुश्रुतायाह तत्त्वतः ॥४॥

त्रयो दोषा धातवश्च पुरीषं मूत्रमेव च ।
देहं सन्धारयन्त्येते ह्यव्यापन्ना रसैर्हितैः ॥ ५ ॥

सम्प्रत्यनुयोगवशात् दोषभेदविकल्पं नामाध्यायमधिकरोति अथात- इत्यादिना । १ ॥ अनुयोगप्रकारं निवेदयति अष्टाङ्गेति ॥ १—२ ॥

अत्र पुरस्तादिति रसभेदविकल्पं लक्षयति । अवसितन्तावदुपदिदिक्षित- मर्थजातं प्रायेण, माकार्षीदधुना स्मृतिविभ्रमादपार्थकत्वेनोद्वेजकमनुयोगमित्यभि- सन्धाय भगवान् धन्वन्तरिराचार्य्य उत्तरं पठन् प्रागुक्तमर्थजातं स्मारयति त्रय- इत्यादिना । अत्र त्रय इत्यादिनोक्तमर्थं दोषधातुमलक्षयवृद्धिविज्ञानीये वेदोत्पत्तौ च "दोषधातुमलमूलं हि शरीरम्" इत्यादिना तथा "प्राणिनां पुनर्मूलमाहारः"

पुरुषः षोड़शकलः प्राणास्त्वेकादशैव ये ॥ ६ ॥
रोगाणान्तु सहस्रं यच्छतं विंशतिरेव च ॥ ७ ॥
शतानि पञ्च द्रव्याणां त्रिसप्तत्यधिकानि च ॥ ८ ॥
व्यासतः कीर्त्तितानीह भिन्ना दोषास्त्रयोऽगुणाः ।
द्विषष्टिधा भवन्त्येते भूयिष्ठमिति निश्चयः ॥ ९ ॥

इत्यादिना च प्रकीर्त्तयाञ्चभूव, पुरुषः षोड़शकलः इति तु वेदोत्पत्तौ "पञ्चमहाभूतशरीरिसमवायः" इत्यादिना प्राणांश्च गर्भव्याकरणे "अग्निः सोम" इत्यादिना। अत्र पुरुषग्रहणेनैवात्मनोग्रहणादेकादशेति नानुपपन्नम्; प्राणत्वमस्य प्राणलिङ्गत्वादेव प्राप्तं भवतीति शिष्टानां पित्ताद्युपदेशेनोपदिष्टानां प्राणरूपेणाध्यस्तानामग्नीषोमादीनामिहोपदेशः साम्प्रतमेव, रोगाणां विंशत्यधिकानि एकादशशतानि, भेषजद्रव्याणां त्रिसप्तत्यधिकानि पञ्चशतानि च समस्ततो व्यासतः कीर्त्तितानीह तन्त्रे इत्यर्थः। अत्र कीर्त्तितं तद्धीति पाठे तु "नपुंसकमनपुंसकेन" इति पां सूं १।२।६९। एकशेष एकवद्भावो हि शब्दस्य एव शब्दस्थानमधितिष्ठतीति नेयम्। अत्र अन्नकृतं मानसं वीर्य्यं षोड़शकला यस्येति षोड़शकलः। नचैतदश्रद्धेयम् "षोड़शकलः सौम्य पुरुषः" इति छान्दोग्यश्रुतेः। ६ पं ७ खण्ड। अत्राह भगवान् भाष्यकारः शङ्कराचार्य्यः,—"अन्नस्य भुक्तस्य योऽणिष्ठो धातुः स मनसि शक्तिमधात् साऽन्नोपहिता मनसः शक्तिः षोड़षधा प्रविभज्य पुरुषस्य कलात्वेन निर्दिदिक्षिता, तया मनस्यन्नोपहितया शक्त्या षोड़शधा प्रविभक्तया संयुक्तस्तद्वान् कार्य्यकारणसङ्घातलक्षणो जीवविशिष्टः पुरुषः षोड़शकल उच्यते" इति। प्रकृतमनुसरति भिन्ना इति। भूयिष्ठमगुणा विगुणा विकृता इति यावत्। एते त्रयो दोषा भिन्ना द्विषष्टिधा भवन्तीति निश्चयइति। एतेनार्थात्सिद्धं भवति मनागगुणास्तु त्रेधा षोढ़ा नवधा ततो वा किञ्चिदधिकप्रकारा भवन्ति नत्वेव द्विषष्टिधेत्यभिसन्धिः ॥ १—९ ॥

त्रय एव पृथग् दोषा द्विशो नव समाधिकैः ।
त्रयोदशाधिकैकद्वि-सम-मध्योल्वणैस्त्रिशः ॥ १० ॥

भेदप्रकारं स्फुटीकृत्यावगमयति त्रय इति । अत्र दोषा इति सामान्येनोक्तमपि कुपिता इत्येव प्रत्येतव्यं प्रागगुणा इति विशेषणात्, तत्र कुपितत्वं प्रवृद्धत्वेनेति नेयम् । परमतः "पश्चाशदेवन्तु सह भवन्ति त्रयमागतैः" इत्युक्तेः । वदन्ति च "यदग्रे सन्दिग्धं तच्छेषान्निर्णीयते" इति । तदयमर्थः । पृथगेव प्रवृद्धा दोषास्त्रयः द्विशः समाधिकैश्च नव इति, तद्यथा प्रवृद्धोवातः स्वस्थौ पित्तश्लेष्माणौ, प्रवृद्धं पित्तं स्वस्थौ वातश्लेष्माणौ, प्रवृद्धः श्लेष्मा स्वस्थे वातपित्ते, एवं पृथगेव कुपिता दोषा स्त्रयः । ३ । द्विशइति । द्वाभ्यां द्वाभ्यां निष्पद्यन्ते इति द्विशः समाधिकैरित्यधिकशब्दश्चायं प्रवृद्धयोर्द्वयोर्द्वयोर्दोषयोस्तारतम्येनाधिक्यं व्यनक्तीति गम्यते, समशब्देनैव तुल्यप्रवृद्धयोर्द्वयोराम्नातत्वात् । समाधिकैरिति "प्रकृत्यादिभ्य उपसङ्ख्यानम्" इति तृतीया, एतेन शेषा अपि तृतीया व्याख्याताः । तथाच द्विशो नव समाधिकैरिति । प्रवृद्धदोषद्वितयाऽभिनिर्वृत्ता नवभेदाः समाधिकैरेव दोषैर्भवन्तीति निष्कर्षः । एवञ्च समं वृद्धाभ्यां द्वाभ्यां द्वाभ्यां दोषाभ्यां त्रयोभेदा स्तारतम्येन च वृद्धाभ्यां द्वाभ्यां द्वाभ्यां दोषाभ्यां षड़ित्येवं नव इत्यायातम् । तद्यथा, वातपित्ते समं वृद्धे स्वस्थः श्लेष्मा, वातश्लेष्माणौ समं वृद्धौ स्वस्थं पित्तं, तथा पित्तश्लेष्माणौ समं वृद्धौ स्वस्थो वात इति त्रयः ।३॥ तारतम्येन च वृद्धाभ्यां द्वाभ्यां द्वाभ्यां षड्भेदाश्च एवं लक्षणीयाः, तद्यथा वातपित्तयोर्वृद्धयोरधिकं वृद्धोवातः स्वस्थः श्लेष्मा ।१। वातपित्तयोर्वृद्धयोरधिकं वृद्धं पित्तं स्वस्थः श्लेष्मा ।२। वातश्लेष्मणोर्वृद्धयोरधिकं वृद्धो वातः स्वस्थं पित्तम् ।३। वातश्लेष्मणो र्वृद्धयोरधिकं वृद्धः श्लेष्मा स्वस्थं पित्तम् ।४। पित्तश्लेष्मणोर्वृद्धयोरधिकं वृद्धं पित्तं स्वस्थो वातः ।५। पित्तश्लेष्मणोर्वृद्धयोरधिकं वृद्धः श्लेष्मा स्वस्थोवातः ।६। इत्येवं षट् । मिलित्वा नव। तारतम्येन साम्येन चाधिकैः स्त्रिभि र्दोषैस्त्रयोदश भेदानभिधत्ते त्रयोदशेति । त्रिश स्त्रयोदश भेदाः अधिकवृद्धैकादिभिर्दोषैर्भवन्तीति योजना । एतेनैतदुक्तं भवति, एकाधिकवृद्धैस्त्रिभिर्दोषैस्त्रयः, द्व्यधिकवृद्धैस्त्रिभिर्दोषैस्त्रयः, समवृद्धैस्त्रिभिर्दोषैरेकः, हीनमध्योल्वणैश्च दोषैः षड़ित्येवं त्रयोदश इति । क्व च तावत् मध्योल्वणैश्चेत्यस्य हीनमध्योल्वणैरित्येवं व्याख्यानं व्याचष्टुः साङ्ख्यिकात्तमभिमत

पञ्चाशदेवन्तु सह भवन्ति त्रयमागतैः ॥ ११ ॥

इति वाच्यं, तथाहि मध्योल्वणैरिति मध्यशब्दोऽपि मानतः पूर्व्वापरयोरन्तरालवर्त्तिनं दोषमभिधत्ते उल्वणशब्दस्येह आधिक्येन प्रव्यक्तं दोषमिति निश्चीयते "स्फुटं प्रव्यक्तमुल्वणम्" इत्यमरस्य । तथा च मध्यशब्दोऽयमुल्वणशब्दसान्निध्यात् यथा हीनं दोषमपेक्षते तथैवोल्वणशब्दस्य प्रतियोगित्वेन तमेवेति मन्दधियोऽप्यध्यवस्यन्त्यनायासेनेति सम्प्रधार्य्य "मितञ्च सारञ्च वचो हि वाग्मिता" इत्येवं मन्वानो भगवान् हीनमध्योल्वणैरिति वक्तव्ये वाग्मित्वेन शिष्यान् विभावयन् मितस्य सारस्य च वचसो निदर्शनत्वेन मध्योल्वणशब्दमात्रं प्रायुङ्क्तेत्यध्यवसेयम् । नह्यञ्जसा व्याख्यानमिदं न्यक्कार्य्यं जीवत्स्वात्रेयान्तेवासिषु कथमपीति ब्रूमः ते हि अमुमेवार्थं व्यक्तमाहुः "द्व्युल्वणैकोल्वणैः षट् स्युर्हीनमध्याधिकैश्च षट् । समैश्चैको विकारा स्ते सन्निपातास्त्रयोदश" इति चं सू १७ अं । ते च त्रयोदश भेदाः यथा—वाताधिकवृद्धा वृद्धवातपित्तश्लेष्माणः, पित्ताधिकवृद्धा वृद्धवातपित्तश्लेष्माणः, श्लेष्माधिकवृद्धा वृद्धवातपित्तश्लेष्माणः, इत्येकाधिकवृद्धास्त्रयोदोषभेदाः । ३ । वातपित्ताधिकवृद्धा वृद्धवातपित्तश्लेष्माणः, वातश्लेष्माधिकवृद्धा वृद्धवातपित्तश्लेष्माणः,:पित्तश्लेष्माधिकवृद्धा वृद्धवातपित्तश्लेष्माणः । इति द्विदोषाधिकवृद्धा स्त्रयः । ३ । समं वृद्धा वातपित्तश्लेष्माणः । इति समवृद्धैरेकः । १ । हीनमध्याधिकैश्च षट् यथा, वृद्धोवातो वृद्धतरं पित्तं वृद्धतमः श्लेष्मा इति प्रथमः । वृद्धोवातो वृद्धतरः श्लेष्मा वृद्धतमं पित्तम् इति द्वितीयः । २ । वृद्धं पित्तं वृद्धतरः श्लेष्मा वृद्धतमो वातः । इति तृतीयः । ३ । वृद्धं पित्तं वृद्धतरो वातः वृद्धतमः श्लेष्मा इति चतुर्थः । ४ । वृद्धः श्लेष्मा वृद्धतरो वातः वृद्धतमं पित्तम् । इति पञ्चमः । ५ । वृद्धः श्लेष्मा वृद्धतरं पित्तम् वृद्धतमो वातः इति षष्ठः । ६ । एवं षड्भिर्हीनमध्योल्वणदोषात्मकैः सह सं ख्याता एकाद्यधिकवृद्धदोषाभिनिर्वृत्तादयः सप्त, त्रयोदशेति नेयम् ॥ १० ॥

प्रतिपादयितारोऽपि प्रतिपित्सितमर्थं प्रतिपित्सूनां सुखप्रतिपत्तये भागशः प्रतिपिपादयिषन्तीति ज्ञात्वा दोषाणां द्विषष्टिधा भेदान् विजिज्ञापयिषु र्भगवान् प्रथमं तावदुपदिष्टाः पञ्चविंशतिर्भेदा वक्ष्यमाणैः पञ्चविंशत्या भेदैः सह सङ्ख्याताः पञ्चाशद्भवन्तीत्याह पञ्चाशदिति । अत्र एवमिति निर्देशात् यथावृद्धैस्तथैव

क्षीणमध्याधिक-क्षीण-क्षीण-द्वन्द्वैस्तथापरैः ।
द्वादशैवं समाख्यातास्त्रयो दोषा द्विषष्टिधा ॥ १२ ॥

क्षयमागतैरित्युक्तं भवति तथाच "त्रय एव पृथग् दोषाः" इत्यादिव्याख्यानेनैव क्षीणदोषात्मका पञ्चविंशतिभेदा अपि प्रायेण व्याख्याताः । तदेवं ब्रूमः संक्षेपेण । त्रयएव पृथक् क्षीणा दोषाः । इति त्रयः ।३। क्षीणैः द्विशो नव समाधिकैः, इति नव ।९। त्रिश स्त्वेकाधिकक्षीणैस्त्रयः ।३। द्विदोषाधिकक्षीणास्त्रयः ।३। समक्षीणैस्त्रिभिर्दोषैरेकः ।१। एवं क्षीणै र्हीनमध्याधिकैः क्षीणक्षीणतरक्षीणतमै-श्चेति यावत् । षट् ।६। इति मिलित्वा पञ्चविंशतिः, पूर्व्वैः सह सङ्ख्याताः पञ्चाशदेव भवन्तीति ॥ ११ ॥

क्षीणेत्यादि । क्षीणमध्याधिकैः, क्षीणद्वयद्वन्द्वैस्तथाऽपरैः क्षीणैकद्वन्द्वैश्च द्वादश भेदा भवन्तीति समन्वयः । अत्र क्षीणाऽधिकशब्दमध्यवर्त्ती मध्यशब्दोऽयं सममेवाऽभिधत्त इति निश्चीयते, यो हि न क्षीणो नाऽपि चाधिकः स च मध्यत्वेन यथा समान इति ; तु धूलिधूसरचरणा हालिकाऽप्यध्यवस्यन्ति ; तथाच क्षीण-मध्याधिकैरिति त्रयाणां दोषाणामेकः क्षीणः एकः स्वस्थः एकस्त्वधिकः एवं क्षीणसमाधिकैरेकविधो भेदः षड्विधो भवतीति नियम् । तद्यथा । क्षीणवात-समपित्तवृद्धश्लेष्मात्मको भेदः प्रथमः । क्षीणवातसमश्लेष्मवृद्धपित्तात्मको द्वितीयः । क्षीणपित्तसमवातवृद्धश्लेष्मात्मक स्तृतीयः । क्षीणपित्तसमश्लेष्मवृद्धवातात्मकश्चतुर्थः । क्षीणश्लेष्मसमवातवृद्धपित्तात्मकः पञ्चमः । क्षीणश्लेष्मसमपित्तवृद्धवातात्मकः षष्ठः । इति षट् ।६। क्षीणक्षीणवृद्धैः, क्षीणद्वन्द्ववृद्धैकैस्त्रिविधस्तथाऽपरैर्भिन्नैः, क्षीणैकवृद्धद्वन्द्वैश्चेति यावत् त्रिविधो भवतीति शेषः । तद्यथा क्षीणवातपित्त-वृद्धश्लेष्मात्मकः प्रथमः । क्षीणवातश्लेष्मवृद्धपित्तात्मको द्वितीयः । क्षीणपित्त-श्लेष्मवृद्धवातात्मकस्तृतीयः ।३। क्षीणैकवृद्धद्वन्द्वात्मकास्तु त्रयोभेदाः, यथा—क्षीण-श्लेष्मवृद्धवातपित्तात्मकः प्रथमः, क्षीणपित्तवृद्धवातश्लेष्मात्मकोद्वितीयः, क्षीणवात-वृद्धपित्तश्लेष्मात्मकस्तृतीयः ।७। एवं द्वादश । एते हि द्वादश पूर्व्वैः सह गणिताः द्विषष्टिधा भवन्तीति युक्त मुक्तमेवमिति ॥ १२ ॥

मिश्रा धातुमलैर्दोषा यान्त्यसंख्येयतां पुनः ।
तस्मात् प्रसङ्गं संयम्य दोषभेदविकल्पनैः ।
रोगं विदित्वोपचरेद्रसभेदैर्यथेरितैः ॥
भिषक् कर्त्ताऽथ करणं रसा दोषास्तु कारणम् ।
कार्य्यमारोग्यमेवैकमनारोग्यमतोऽन्यथा ॥ १२ ॥
अध्यायानान्तु षट्षष्ट्या ग्रथितर्थपदक्रमम् ।
एवमेतदशेषेण तन्त्रमुत्तरमूर्जितम् ॥

भेदास्तेते शुद्धदोषान् प्रत्येवोपदिष्टाः वस्तुतस्तु विकृता दोषा अनेकधा प्रसरन्तो धातुमलैः सह मिश्रीभूय नानाविधान् व्याधीन् जनयन्तीति प्रसरप्रकाराणामसंख्येयत्वात् साम्प्रतमिदमुच्यते मिश्रा इति । तस्मादिति । तस्मादपरिसङ्ख्येयत्वात् प्रसङ्गं दोषधातुमलसंसर्गप्रसक्तिं सूक्ष्मसूक्ष्मतरसूक्ष्मतमतत्तत्संसर्गपरतामिति यावत् संयम्य संकुच्य यथास्थूलं संसर्गमाश्रित्येति हृदयम् । यथेरितैर्दोषभेदविकल्पनैर्यथोपदिष्टैर्भिन्नै र्दोषै रोगं विदित्वा यथेरितै रसभेदविकल्पोपदिष्टै रसविशेषविज्ञानीयोपदिष्टैश्च रसैरुपाचरेत् प्रतिकुर्य्यादित्यर्थः । कुतस्त्वेवमुच्यते ? एवमनुयुक्तो भगवान् धन्वन्तरिचार्य्य उत्तरं पठति भिषगिति । इदमत्राकूतम् । आप्ता एव हि ऋषयस्तपोज्ञानबलेन तांस्तानपरिसंख्येयान् दोषभेदान् रसभेदांश्च पश्यन्ति नत्वेव प्राकृता भिषजः, ते तु स्वमतिपरिमाणम् यथास्थूलं तांस्तान् दोषभेदान् रोगहेतुत्वेनाभिसमीक्ष्य यथास्थूलं तैस्तै रसभेदैः प्रतिकुर्युस्तदिदं साम्प्रतमुक्तं भिषगिति । अनारोग्यमिति । अतोऽन्यथा तत्तद्दोषभेदप्रसङ्गसंयमनमन्तरेण अनारोग्यं नैवारोग्यं सम्भवेत् तत्तद्विविधसूक्ष्मसूक्ष्मतरसूक्ष्मतमभेदानामासेतरैर्भिषग्भिरविज्ञेयत्वेन प्रतीकारासम्भवादित्यभिसन्धिः ॥ १२ ॥

अध्यायानामिति । अर्थयुक्तं पदम् अर्थपदं ग्रथितोऽर्थपदक्रमो यत्र तत् तथोक्तम् । ऊर्जितमत् सर्व्वप्रमाणसिद्धत्वेन आप्तत्वेन च समर्जितम् ।

स्पष्टगूढ़ार्थविज्ञानमगाढ़मन्दचेतसाम् ।
यथाविधि यथाप्रश्नं भवतां परिकीर्त्तितम् ॥ १४ ॥
सहोत्तरन्त्वेतदधीत्य सर्व्वं ब्राह्मं विधानेन यथोदितेन ।
न हीयतेऽर्थान्मनसोऽभ्युपेतादेतद्वचो ब्राह्ममतीव सत्यम् ॥१५॥
सहोत्तरन्त्वेतदधीत्य सर्व्वं ब्राह्मं विधानेन यथोदितेन ।
न हीयतेऽर्थान्मनसोऽभ्युपेतादेतद्वचो ब्राह्ममतीव सत्यम् ॥१५॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे दोषभेदविकल्पो
नाम षट्षष्टितमोऽध्यायः ॥ ६६ ॥

इति श्रीसुश्रुताचार्य्यविरचित आयुर्व्वेदशास्त्रे
उत्तरतन्त्रं समाप्तम् ।

स्पष्टेति। स्पष्टं गूढ़ार्थ-विज्ञानं यत्रेति स्पष्टगूढ़ार्थ-विज्ञान-मेतदुत्तरं तन्त्रम्। अगाढ़मन्दचेतसामिति। गाढ़: सेवित इत्यनर्थान्तरम्। "तपस्विगाढ़ां तमसां प्राप" इति रघुः। तथा चागाढा न सेविता मन्दचेतसो यैस्तेषां तथोक्तानां पण्डित-सेवित्वेन मनस्विनामिति यावत्। वदन्ति हि "यदि सन्तं सेवति यद्यसन्तम् तपस्विनं यदि वा स्तेनमेव। वासो यथा रङ्गवशं प्रयाति तथा स तेषां वशमभ्युपैति"। इति महाभारतम् उद्योगपर्व्व। अगाधामन्दचेतसामिति पाठे तु अगाधमतिगम्भीरम्। अमन्दमनल्पञ्च चेतो येषां तेषां तथोक्तानां भवतां यथाप्रश्नं यथाविधि परिकीर्त्तितमिति योजना। तन्त्रस्यास्य ब्रह्मणा प्रोक्तत्वेनात्यर्थं विश्वसनीयत्वमभीष्टफलदत्वञ्चाचष्टे सहोत्तरमिति। ब्रह्मणा प्रोक्तं ब्राह्मम्। सहेत्यादिद्विरभ्यासः संहिता-परिसमाप्तिं द्योतयति यथा "अनावृत्तिः शब्दादनावृत्तिः शब्दात्" इति ब्रह्मसूत्रे, यथाच "ते मयि सन्तु ते मयि सन्तु" इति छान्दोग्योपनिषदि तद्वत्। परिशिष्टमतिरोहितार्थम् ॥ १४—१५ ॥

इति पावनाप्रदेशान्तर्गतनाकालियाग्रामवास्तव्यस्वर्गीयानन्दचन्द्रात्मज-
वैद्यगङ्गाधरकविराजान्तेवासिश्रीहाराणचन्द्रचक्रवर्त्तिविरचिते
सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये उत्तरतन्त्रे दोषभेदविकल्पोनाम
षट्षष्टितमोऽध्यायः ॥ ६६ ॥

समाप्तञ्चेदं सुश्रुतार्थसन्दीपनभाष्यम् ।
ॐ तत् सत् ॥

आम्नायकल्पनरतोऽवचितैः प्रयत्ना-
द्रोगोपशान्तिकरसद्वचनप्रसूनैः ।
श्रीसुश्रुतो मुनिवरो गिरमर्चयिष्यन्
यां संहितास्रजमिमामकरोन्मनोज्ञाम् ॥ १ ॥

सम्मोहनी सुमनसामपि सा मुनीनां
संसर्पिनिर्म्मलयशश्चयसौरभेण ।
या कर्षति स्म सततं प्रभविष्णुरारात्
सर्व्वं सुधीजनमधुव्रतवृन्दमेव ॥ २ ॥

यस्या निपीय सुवचोमकरन्दसारं
तद्भूरितन्त्रमधुचक्रमिह व्यधत्त ।
यस्मात् क्षरन्ति खलु भेषजसन्मधूनि
सिद्धानि रोगशमनानि जयन्ति लोके ॥ ३ ॥

उत्साहतस्तदभिवीक्ष्य सतां हिताय
श्रीसुश्रुतोक्तिमधुमत्तमनोलुपोऽयम् ।
साङ्ख्यादिशास्त्रनिचयं निपुणं विभाव्य
भाष्यं व्यधाद्विमलसुश्रुतसंहितायाः ॥ ४ ॥

क्षीणः पीततया सुरैरनुदिनं ताराचयानां यथा
हारैणानिति चन्द्रमा दिवि तथा क्षोणौ ममायं सुतः ।
अन्यादेव भुवि स्फुरद्गुणसमाहाराख्यहारैः पिता
ध्यात्वैवं किल यस्य नाम विदधे हाराणचन्द्रं मुदा ॥ ५ ॥

आनन्दचन्द्र-धरणीसुरनन्दनोऽसौ
मातुश्च सुन्दरमणेर्मणिरात्मनीनः ।
वङ्गेषु यः परमपावनपावनान्त-
र्नीकालियाप्रसवनः श्रितराजसाहिः ॥ ६ ॥

भवभयविनिहन्त्री यत्र सर्व्वार्थदात्री
विलसति शिवयुक्ता कालिका जाह्नवी च ।
अभिभवति समृद्धिस्पर्द्धया या दिवञ्च
सुरुचिरकलिकातामाश्रितो यत्नतस्ताम् ॥ ७ ॥

सन्दिग्धं कुशलैः समं बहुविधैस्तर्कैः समालोचयं-
स्तथ्ये निर्म्मलमानसो वसुसमुद्राब्दप्रजोर्थ्यदयाः ।
श्रीत्सुश्रुयाच्छ्रुतिपक्षसिद्धिशशिमे शाके समारभ्य तद्
द्वीपाम्नायवसुच्छदाकरमिते तत्रानयत् पूर्णताम् ॥ ८ ॥

चन्द्रे कलङ्कः कुसुमेषु कीटाः
प्रायेण रम्येष्वपि सन्ति दोषाः ।
ममात्र भाष्येऽपि सुचिन्तितार्थे
मन्ये कथञ्चित् स्खलनेन भाव्यम् ॥ ९ ॥

संशोध्य तत् सर्व्वमपेतदोषा-
गुणान् प्रगृह्णन्तु यदीह ते स्युः ।
तन्वन्तु च प्रीतिवशात् समन्तात्
समीरणो गन्धमिवादरेण ॥ १० ॥

हृदि जनकजनन्योः पादपद्मे दधानो
बुधवररुचिमयशामासुकामोऽत्र शश्वत् ।
स्वविहितमिदमिष्टोद्भासिभाष्यप्रसूनं
समुपहरति ताभ्यां भक्तिसद्गन्धमिश्रम् ॥ ११ ॥

एषा सुश्रुतसंज्ञिता सुरधुनी दिव्यावबोधप्रसू-
रायुर्व्वेदहिमाचलादुपगता सद्भावशुद्धोदका ।
नानारोगमलापकर्षणकरी भैषज्यरत्नोज्ज्वला
च्छेदावर्त्तमयो चिरं विजयते भाष्यप्रसूनाञ्चिता ॥ १२ ॥

———